लालसोपि श्रद्दधानुभवानात्तरनुचानयैश्चोपनिषदर्थश्रद्धयाध्यात्मविजिज्ञासमानः परमार्थतत्त्वक्रमाद्दृत्तिर्व्याचष्टे चेतः स्वप्रकाश
साक्षिके मात्रिके रसातिशयेयि स्वात्मनेव साक्षात्कारिष्यता यथा चपरिहृतचापलमात्मनस्वामृतसरमितिभडम्परउत्तिनिराया समेवमा
नसंततथाह मकथयं भैषभचरितस्य परमपुरुषस्क्तौ स्वर्गे इत्येवमादिकं। अभीष्टसिद्धावपि खंडनानामखंडराज्ञामिव श्रीवमाज्ञा॥
तत्तानि कस्मान्न यथाभिलाषं सेव्यान्ति केप्यर्ध्वं निर्याजपथ्य। तदेतादृशीषु सर्वास्वपि दर्शनस्थितिषु कामममास्माकीनाः खंडन
युक्तयः प्रगल्भन्ते। यासामीश्वरपरवशाविश्वव्यवस्थामनावस्थाय निरसनमशक्यं। तासामवतारणार्थमयं प्रावादुकगवा
दोपन्यासः। तथाहि। यदि श्रून्यवादानिर्वचनीयपक्षयोराश्रयणं तदा तावदमूषां निराबाधैव सर्वपथीनता। यदि तु
प्रमाणानि सत्तामुपगम्य तावलंबते तथापि लक्षणखंडनेन लक्ष्यखंडनयुक्तौ नाचत्ताद्विषयप्रमाणविशेखंडनेन प्र
मितं तास्पर्श्यं। नच प्रमात्रादिलक्षणप्रमाणखंडनेन अपसिद्धांतापत्तिः। तादृश्याः सूत्रव्याख्यायाः खंडयमानत्वात्। नच
वाच्यं लक्षणाविशेषवस्तुव्यवस्थापकं प्रमाणविशेषसूत्रादिव्याख्या विशेषखंडनपरं केवलं लक्षणं न तत्प्रमाणं तरव्याख्या
तरं च वाच्यं प्रसज्येत भवतोपीति। वितंडाकथामवलंब्य खंडनानां वक्तव्यत्वात्। तत्र च व्याहतस्वपक्षनिर्वाहं प्रतिपद्य नु यो
गानवकाश एवं च सति वादिदर्शनमाश्रित्यापि खंडनप्रयोगो निर्बाध एव एकदेशिवत्प्रतवस्थानुशक्यत्वात्। वैयाकरणनामि

विशिष्टस्याभेदः प्रकाशेते स स्मृतावंतर्भावयितुमशक्यः । अननुभूतत्वेन संस्कारानुपनेयत्वात् । अत एव न तृतीयोपि । नाप्यनुभ
वेंतर्भावयितुमसौ शक्यः । प्रत्यभिज्ञानकालेनुभवेन प्रागवस्थाया अभेदनात् । संवेदने वानुभव एवेति शेषपक्षेंतर्भावः स्यात् । स चानु
रूपयिष्यते । अत एव न द्वितीयः । प्रागवस्थाविशिष्टाभिन्नतांशेनुभवस्वीकारे प्रागवस्थावैशिष्ट्यमप्यनुभवविषय एव निविष्टमिति च
रमेयत्वप्रवेशः । अथ प्रागवस्थाविशिष्टादभिन्न इत्ययमर्थो नैकांशः तत्र प्रागवस्थाविशिष्ट इत्यत्रांशे स्मृतित्वमभिन्न इत्यत्रांशे वानुभवत्वमिति
च्येत । एवं न हि प्रागवस्थाविशिष्टः स इत्यनाविशिष्टोऽभिन्नत्वायमिति स्मृत्यनुभूतिभ्यामावेदितं भवति । प्रागवस्थाविशिष्टाश्रयतयात्वभेदः केना
पि न प्रकाशित इति । स एव प्रागवस्थाविशिष्टः स एवायमिति प्रत्यभिज्ञाया अशरीरं न स्यात् । अथानुभवेनयोः सावस्तुभूपमानधर्म्याश्रयतयाऽभे
दो बोधितः स क्रोडांतरमनालंब्य न पर्यवस्यतीति केन चित्खलु कस्यचिद्भेदो भवति स च स्मृत्यंशोपनीतमेव संनिधानात् क्रोडांतरं प्रागवस्थावि
शिष्टरूपमालंबत इति अभेदस्य प्रागवस्थाविशिष्टाश्रयता सिद्धिरिति । तदेतत्तुच्छतरं । क्रोडांतरमालंबत इति क्रोडांतराश्रितो भवति । उत क्रोडां
तराश्रिततया ज्ञायत इति । आद्ये अभेदस्येदानीं प्रागवस्थाविशिष्टधर्म्याश्रयणेनापत्तेः पूर्वं प्रागवस्थाविशिष्टेदानीं विशिष्टयोर्भेदः स्यात् । द्विती
यस्तु पदे क्रोडांतराश्रिततयेदंतावच्छिन्नधर्म्यभेदस्यैव ज्ञानात् तत्स्मृतौ नांतर्भावयितुं शक्यं नाप्यनुभवे इदंत्वस्य क एव दोषः । किंचायं दा प्रत्यभिज्ञा
न स इत्यंशे स्मृतिरयमित्यंशे वानुभव इत्येकं ज्ञानमभ्युपेयते तदा धर्मिणामादायापि स्मृत्यनुभवसंकरो दुर्वारः । तथा हि संस्कारेण तत्तामात्र
मुपनीयते । न तावद्विशिष्टो वा धर्मी आद्ये स इति प्रत्यभिज्ञाया शरीरं न स्यात् । तत्तायाः केवलायाः संस्कारेणोपनीतत्वात् । नापि द्वितीयः । तथा सत्यय
मित्यनुभवांशेपि धर्म्मिप्रकाशो वक्तव्य एवान्यथा इदंतामात्रप्रकाशोऽयमिति तच्छरीरं न स्यात् । एवं च संस्कारस्य चेंद्रियस्य चोभयमिप्रतीतिहेतोरुभयसं
पनियानैकविशिष्टांशे भिन्नाभ्यां ज्ञानाभ्यामुत्पन्नं वा । उत्तारणाद्वयसंभेदादभेदभानाज्ञानेन । प्रथमे प्रत्यभिज्ञानस्यैकज्ञानव्यक्तिताभ्युपगमव्या
घातः । भेदपक्षोक्तदूषणापातश्च । द्वितीये धर्म्यंशे प्रत्यभिज्ञायाः स्मृतित्वमनुभवत्वमपीत्यनुभूतिस्मरणसंकर इति विषयव्यवस्थयापि नियमो भग्नः ।

ख· मू·

१७

अथोच्यते माभूद्विषयोपाधिभेदाद्व्यवस्थानं रूपाध्यन्तरानुभविष्यति। तद्यथा संस्कारजत्वमादाय स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमा
दाय चानुभवत्वव्यवस्थानमिति विरोधपरिहारोऽस्तु। नाप्रमात्वसामान्यमनंगीकारे प्रमात्वरूपताया विषयव्यवस्थितौ वोपगमे नोपाध्यन्तरोपमाभिपि
स्मृतिअनुभूतित्वयोरेकस्मिन्नेव धर्मिण्यपर्थेनिवेशात् प्रमात्वाप्रमात्वयोरेकविषयत्वे वा किंचिज्ज्ञानविकल्प्या नामध्यात्मभावाभावसंवेदनात् स्मृ
तित्वानुभूतित्वयोरपि परस्परभिन्नज्ञानयोः स्वतःप्रतिभानेन विषयनिरूपणव्यवस्थित्यनंगीकारे स्मृतित्वादेरिक्तायामपि स्मृत्यपवगतप्रसंगात्। यदि
च संस्कारजत्वमेव स्मृतित्वं तदा तस्यैव विरोधेऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिनुपपन्नः स्यात् इति नान्यस्य चेतसि निविशते। अथान्य
स्मृतित्वं नाम तदाप्यनुपपत्तिः तथाहि। संस्कारजत्वं संस्कारादनन्तरं नियमेन भावो नियतत्वं च नानाव्यक्तिगतमेकरूपं संग्राहकमकोटीकृत्ता
संभवतीति स्मृतित्वे नैव संस्कारजत्वं वक्तव्यं। तथा च संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिव्यवस्थितिः स्मृतित्वव्यवस्थितौ च संस्कारजत्वमित
न्योन्याश्रयः तस्मात्स्मृत्यनुभवसंकरो दुर्वार एव। अपि च। स्मृत्यनुभवयोरर्थकारणसामग्र्योर्नियमसम्भिन्नज्ञायां मतत्वेन वा न वेत्कथमंशतोऽपि
स्मृतित्वमनुभवत्वं च परस्परभिन्नज्ञानस्य एवमेव तथात्वेनेति प्रसंगात्स्मृत्यनुभूत्योः स एव संकरः प्रथमे तु पृथगेव कार्योत्पत्तिप्रसंगः प्रत्येकं स्व
स्वकार्यसमर्थत्वात्। सामग्रीभेदस्य च कार्यभेदहेतुत्वेनावधारितत्वात्। अथ यद्येते पृथग्जायेते तत्र पृथगेव कार्यं परस्परभिन्नज्ञायां तु तयोर्युगपज्ज्ञा
तत्वेन संभूय जननात्संकरवित् कार्योत्पत्तिः। यद्यपि घटपटादिसामग्र्योर्निर्विवदत्वं तेतथापि तद्विलक्षणस्वभावत्वात् तयोरीदृशत्वमुपपद्यते॥
न हि एकस्य याहृक्पदार्थस्वभावस्तादृगन्यस्यापि सर्वस्य भवति जगद्वैचित्र्यभंगप्रसंगात्। ननु तदस्ति यत्र हि लिमितत्वं तयोस्तत्र किं परस्परसहकारि राम:
त्वमनयोरेकत्वं न वा। न चेत् परस्परमेलकलक्षणविशेषोऽनुपयोगी कार्यजननं प्रति मिथः सहकारिभावविरहेण अप्रयोजकत्वात्। तत आविशे १७
षात् पृथगेव कार्यं प्रसज्यते। अथ परस्परसहकारित्वं तयोरिष्यते तदा अनुभवांशेऽपि संस्कारस्य व्यापारः स्मरणांशेऽप्यनुभवस्येति निया

मकत्वाभिमतयोरुभयांशेसाधारणात्तस्मृत्यंशेप्यनुभूतिरनुभूत्यंशेस्मरणमितिवक्तव्यतयापितंप्रत्यभिज्ञायामनुभूतिस्मृतिसं
करणेति।नाप्यनुभवएवेतिपक्षः।तथासतितत्तावच्छिन्नस्याभेदाश्रयतांयानसंस्कारोनेंद्रियसंनिकर्षश्चेतितदविषयत्वापातः।नचसं
स्कारद्वासंप्रत्यासत्त्यासंबद्धविशेषणतयातद्ग्रहः।नहिक्वचित्सोयंनचेतिसंशयोनस्यात्।दोषवशात्तत्तत्प्रकाशोनसंबद्धविशेषणत्वादिति
चेत्।न।विनापिसंस्कारंदोषवशात्तदापत्तेः।वस्तुप्रकाशिनिर्दोषवाबाधुत्वनिरुक्तेः।क्वापितस्यावस्तुप्रकाशित्वाद्दोषदैक्यमत्त्वादेरपित
न्नस्यात्।विशिष्टत्वेनतथात्वस्यपक्षेतेप्यपरिहारात्।नहिविनैवकुतोपिविशेषाद्दस्यावस्तुप्रकाशिता।सत्यप्यर्थेदोषाद्वस्तुनएवप्रकाशे
संशयात्तित्त्वावत्महत्त्वादेरसंभवापत्तेः।वस्तुविषयत्वेपिदोषादनिश्चयतेतिचेत्।न।वस्तुनस्तस्यासंकीर्णत्वात्तस्यप्रकाशेतदेवसंशयेक
कोटौप्रकाशितमितिकुतस्तदनिश्चयपातः।।निश्चयार्थस्यसंशयकोटावखंडनेसंशयसत्तदभावाधिकाहित्वेपिनिश्चयवस्याप्रत्यूहत्वाद
व।अभावनिश्चयःकोट्यंतरेकेवलमधिकस्यात्।जातिसंशयत्वंततत्रयोजकश्चदोषइतिचेत्।नाइदंतद्दानेवेतिसंशयकोट्यर्थानिर्देशसम
त्वयेनवाशप्तपृतीतिव्यवहारयोरभावापत्तेः।प्रतीतौसहताकारार्थसंबंधेप्रसोमितत्वेवितितदापत्तेः।वाकारार्थस्यप्रतीतिगतत्वेपिनिश्चयव
तस्थाणुमानयपुरुषंवेतिस्थाणुपुरुषगतपात्रिकव्यवहारानापत्तेः।तस्माद्वाकारार्थस्सत्तानधर्मत्वमात्ताकारित्वाद्विविषयानवेया
पत्तिरेवेति।नचप्रत्यासमन्नोसत्तामपिप्रत्यासत्त्यपुरस्कारात्मनसानग्रहणंतत्रदोषवशादित्यस्तु।दोषेसत्यपिवस्तुनःसंस्कारेणासंस्का
रस्यात्मनात्तस्यमनसातस्यचबाह्येंद्रियेणप्रत्यासत्त्यपेक्षणएवतदर्थप्रकाशादिनियमोपपत्तेः।कःप्रत्यासत्त्युरस्कारस्तत्त्वन्मतेस्यात्।
यदितुसंस्कारप्रत्यासत्तिमनपेक्ष्यतदासंदिह्यते तदाऽननुभूयप्रस्मृत्यत्वातथासदित्येनावस्तुतस्तुमनसासंस्काराग्राहिणाच
क्षुरादिनाचात्माग्राहिणातादृशप्रत्यासत्त्याग्रहणानुपपत्तेः।नियमेनतदिंद्रियाग्राह्याश्रयप्रतियोगिकेतरस्यग्रहणेस्वग्राह्यसंब द्व

ख॰मू॰ द्रव्यविशेषणतायाः प्रत्यासत्तित्वनियमात्। अन्यथा आप्यपरमाण्वादौ पृथिवीत्वादेरन्यत्र याहृतयानिरस्तस्वरूपायोग्यत्वस्याभा
१८ वोद्भूतरूपादिभिर्गृह्येत नहीन्द्रियविहारे देशे तु निष्परमाणुकत्वनियमो युक्ताभ्युपगमः शब्दाभावप्रत्यक्षत्ववादिनये श्रोत्रेन्द्रियविशेषणता
सम्बन्धः सन्निकर्षो नित्यत्र संबद्धविशेषणतेत्यतो पि न व्यभिचारः नु चात्मसंयुक्तमनः प्रति स्वीकृतानुभूतार्थस्मृत्यत्वप्रसंगात्सति संस्कारे इति तद्देशीन्द्रियत्वं
न दोषाय प्रत्यासत्तेरतीन्द्रियायाश्चेन्द्रियार्थसन्निकर्षस्योपगमादिति स्वीकृते तु निरासो न तथा सति सद्गुलेश चक्षुरादेः पृथुलत्वसमावात्प्रत्यभिज्ञाया
श्चाक्षुषादितायाता। अयमित्यंशे घटगादिज्ञानं तदंशस्तु मनसा गृह्यते तदेतद्भेदस्तु केनेत्युक्तमप्यावर्तते इति। एतेन संस्कारः सहका
रिमात्रमिन्द्रियस्यातिप्रसंगनिवारकं प्रत्यभिज्ञायां तदर्थीन्द्रियेण सन्निकृष्ट एवोल्लिख्यते। विभ्रमार्थवत्। सन्निकृष्टयाहिता चेन्द्रियस्य सन्निक
र्षसहकारित्वं स्वभावमात्रं। तच्चेदंश संनिकर्षादेव स्यात्। ननु अनवयात्वात् सन्निकर्षसहकारितमपि निरस्तो सोयं न चेति संशयाभावा
पातेनैवेति। तद्दृष्टान्तमित्यादि स्मृतिरपि चैवमनुभव एव स्यात्। मनस आत्मसंयोगसहकृतादात्मार्थसन्निकर्षात्संस्कारोद्भायमानायास्त
स्या इन्द्रियार्थसन्निकर्षजत्वादेवा मनसा आत्मसंयोगात्समवायेन प्रत्यक्षीक्रियमाणे ज्ञानादिभिः स्मर्यमाणस्यार्थस्याविशेषादिति।।
एतेन तत्तावच्छिन्नप्रतियोगिकान्योन्याभावविरहः स्वरूपाभेदो वा अयमिति तत्पिनिरस्तं। अभेदोन्याभावव्यतिरेको अन्योन्यमवतत्त्वेदन्तोपाध्यव
छिन्नयोः स्यात्। न चैतन्मिलितमेकेन स्युयहमेव स्वरूपाभेदपि। तयोर्द्धर्मिकं प्रत्युत्तरनवगाहिना तु स्वगम्यमेवास्संस्कारोपनीतविषये यदि ज्ञानम
नुभवस्यात् स्मृतेरपि कुतो नानुभूतिः अथ न संस्कारधीनत्वमात्रेण स्मृतित्वं किं त्वनुभवकारणासंपृक्तसंस्कारजत्वेन तत्रत्याधिकार्थात्तसन्निक
र्षायत्तं प्रत्यभिज्ञानमनुभव एव भवति न तु स्मृतिरिति चेत्। ना संस्कारासंपृक्तानुभवकारणजत्वेनानुभवत्वं भवति प्रत्यभिज्ञानं तु संस्कारसहितानु तम॰
भवकारणजं स्मृतिरेवेति विपरीतं किं न स्यात् अन्यत्र न स्मृतिरनुभवकारणासंपृक्तसंस्कारजन्येति तुल्यात्रानुभवो पि संस्कारसपृक्तार्थेन्द्रियसंप्र १८
योगजन्येति साम्यादेवाबाधकं। तदेवं विनिगमनायां प्रमाणाभावात्स्वयं कल्पितव्यवस्था न वैपरीत्ये नापि कस्य नासंभवात् प्रत्यभिज्ञानमनुभ

स्व·प्र हेतुसामग्री नानुभवसामग्रीत्यवधारितं। पंचप्रमाणीकरणसामग्र्यसंभवादिति चेत्। चतुःप्रमाणीजनकसामग्र्यसंभवा
त्पंचमीप्रमा किं न पारिशेष्यात् स्मरणं व्यवस्थापि कुत्र वा प्रतिपत्रं पंचप्रमाणी। कारणसामग्र्यभावे जायमानं ज्ञानं स्मृतिर्भव
१९ तीति। घटस्तत्रासीदित्यादिज्ञाननामननुभवत्वोपपन्नासंस्कृतत्वात्। अथ मतं मे प्रत्यक्षादिकारणसामग्र्यनुपपन्ना रजतमात्रस्य च
पूर्वमनुभूतत्वेन तद्विषयसंस्कारसंभवात् संस्कारस्यैव हेतुतांगीक्रियते तत्र ममत्कारणत्वेन कल्प्यते। इंद्रियार्थसन्निकर्षाद्यसंभवे जा
यमानस्य त्वनुमानादेरननुभूतविषयत्वेन तस्मान्नोत्पत्तिसंभव इति तत्कारणलिंगादिकमेवमंगीक्रियते अतः प्रमाणान्तरा
सहकृतसंस्काररजत्वं तद्व्याप्या वा जातिविशेष एव स्मृतित्वमिति मैवं। तत्र कारणत्वं किमिति नान्नस्यैव येन संस्कारजत्वव्यवस्थापि तत्
तिनार्थेन सह तदाहृस्य संनिकर्षादसविकृष्टस्य च नस्य ज्ञानजनकत्वेति प्रसंगान्नेंद्रियजन्यत्वं तस्येति चेत्। नासंस्कारस्यापि केव
लस्य तज्जनकेऽतिप्रसंगतादवस्थ्यात्। सहचरितदर्शनादिना सहकारिणा युक्तस्य संस्कारस्य तज्जनकत्वेनातिप्रसंग इति चेत्। न।
त्तिनैव सहकारिणा सहितस्येंद्रियस्यापि तज्जनकत्वेनातिप्रसंगाभावात्। अननुभूतेपि तर्हि प्रसंग इति चेत्। नातत्वापि तद्दृष्टानामनधिगततद्
र्मवत्त्वधिगतेतस्य संस्कारवतः स्मृत्यापत्त्यासमाधिसाम्यात्। तुन्न तत्साहचर्यदर्शनसंस्कारस्यापि तया सति सहचरितरजताद्य
नुप्रतीतिप्रसंग इति चेत्। न। न चापि मते तादृशस्य रजतादिसंस्कारवतो रजतादिस्मृतिप्रसंगसाम्यात्। तस्माद्युक्तस्ते कालव्यवस्था न
दितः संस्कारलोपन्न तदनुपनिपातस्यापि हेतुत्वोपगमे। नातिप्रसंगात्। तदेवं तत्सदृक्प्रत्यभिज्ञानं यत्र संस्कारबोधकं। सहकारितदंशता रामः
मन्नस्यातिप्रसंगत्वात्। तत्सदृशप्रत्यभिज्ञानं हेतुस्मर्तव्यस्मरणपूर्वकमित्येतदपि समं भवेत्। तथाप्यत्र चार्थसन्निकर्षमन्तरेणेंद्रियस्य ज्ञान १९
करणत्वेनोपलब्धमिति चेत्। न। विशिष्टरूपेप्रमविषयमयातदुपगमात्। सहकारिभूतदोषशक्तेर्वाप्रत्यासत्तित्वेनेष्टत्वात्। किंचासंस्का

रस्यापि प्रमाणान्तरासहकृतस्य नाप्यनुज्ञानजनकत्वं दृष्टमिति तदपि कथं कल्प्यते। तथा कालादिव्यवधानाभावसदृशदर्शनस
हकृतस्य च कुत्रापि युक्तं। प्रत्यभिज्ञाने एवं संस्कारस्य सदृशदर्शनादिसहकारित्वं कल्प्यतां न त्विंद्रियस्येति चेत् प्रत्यभिज्ञाने संस्कारेंद्रि
ययोरपि कारणत्वात् सदृशदर्शनादिसहकृतत्वे दर्शनेऽविशेषात्। अत्र सदृशदर्शनसहकारित्वे संस्कारसहकारित्वस्यापि प्रसंगः
प्रत्यभिज्ञानवदिति चेत्। न। तथा सति तद्वदेव तत्तोल्लेखापत्तेः सदृशदर्शनादिसहकृतत्वे न च तन्नापसंजने संस्कारजन्यत्वस्योपाधित्वं। न च
सदृशदर्शनसहकारित्ववत्तत्प्रयोजिका सत्यजन्यतां न संस्कार इति युक्तं। सदृशदर्शनं परित्यज्य संस्कारे सत्यप्यतथाबोधात्। तथापि
सदृर्थे प्राप्यकारित्वमिंद्रियस्य दृष्टं तद्धी तु शक्यमिति चेत्। न। उक्तमनुर्थेर्थेंद्रियसंप्राप्तिसहकृतस्य ज्ञापकत्वं दृष्टं तथैव संस्कारस्यापि
प्रमाणान्तरसहकृतस्य ज्ञापकत्वमुपलब्धमिति तदपि हातुं न युक्तमिति संस्कारस्यापींद्रियप्रत्यासत्तित्वस्वीकारेण तद्विरहा
सिद्धेः। तत्रांशमोषकल्पनं च स्वतंत्रसंस्कारजत्वपक्ष एव यावदधिकं कृतमध्यायं तन्नांशमोष इति विचारमधिकरोति पूर्ववर्त्तमा
नादिकालविशेषाविशिष्टस्य रजतादेरेकस्मिन्ननुभवे प्रकाशितत्वात् तत्र क्रमेण संस्कारेणापि तथैवोपनेतुमुचितत्वात् प्रत्य
भिज्ञायां तथैव फलदर्शनात् तद्दोषवशात् तन्नांशमोष इति चेत्। न। विपर्यासवंधस्य स्वभावत्वेन संस्कारे तदलोपात्। दोषात्स्मृ
तौ तथेति चेत्। कः पुनरसौ दोषः। यस्मादुद्भूतस्मृतिः परेषामिति चेत्। तर्हि रजतविशिष्टमिदं रजतमित्यत्रापि सैव रजतव्यक्ति
रियमित्यत्र वा पुनस्तदेव रजतमुपस्थितमितीह वा सामान्यत एव रजतस्य तदापि परामृष्टस्यत्रान्नो तत्रांशमोषस्यात्। दोषस्यवि
द्यमानत्वात्। अन्यथा इदं रजतमित्यंशेपि तस्मिन् ज्ञाने तत्रांशमोषेण स्यादिति तत्ताभिधेयप्रसक्तानुपसक्तिः। न च प्रत्यभिज्ञानं स्मरणानुभ

खं०म० वाप्यामन्य एव प्रकार इति वाच्यं अननुभवत्वेनाप्रमात्वापातात्। न चैवमस्तित्सपि वाच्यं। अक्षणिकत्वादिना स्थिरसिद्धो प्रमाणत्वे
नोपन्यस्तत्वात्। ईदृशप्रसिद्धलक्षणयोगेन च लक्षणोपपादने अनियमः। प्रसज्येत तस्माज्जातिवाचिनोऽनुभवपदस्य स्मृतित्वावच्छे
२० दार्थमुपादानमिति। सर्वथानुपपन्नमिति। नापि स्मृत्यन्यत्वमनुभवार्थो नापि स्मृतिलक्षणरहितत्वं उक्तक्रमेण स्मृत्यनुभूति संक
र स्पदर्शितत्वेन व्यवच्छेदकत्वानुपपत्तेः। इति तापि न स्मृत्यन्यत्वमनुभवार्थः। तथाहि। स्मृत्यत्वं यत्किंचित्स्मरणान्यता वा सर्वस्मृतिव्यक्त्य
न्यता वा स्मृतित्वजरहितत्वं वाभिप्रेतं। प्रथमे स्मृत्सत्तरव्यतिरेकात्स्मृत्युत्तरमप्यनुभूतिः स्यात् न हि यतो व्यतिरिक्ता स्मरणाव्यक्तेरा
द्दिका स्मृतिव्यक्तिस्तत्स्मरणमेव न भवति। यन्न तदन्यत्वं न स्मृत्यन्यत्वं स्यात्। नापि द्वितीयः। मदीयादि स्मृतिव्यक्तिभ्यो हि भवता
कथंकारं व्यतिरिक्तत्वमवधारणीयं प्रमायाः। तासां सर्वासां भवताप्रत्येतुमशक्यत्वात्। तथाहि न तावत्सरकीयज्ञानेपर
स्या स्यास्माद्दृशोऽध्यक्षसंभवः। नाप्यनुमानार्थापत्त्योर्लिंगाद्युपपद्यमानयोः सर्वत्रावगृहीतुमशक्यत्वात्। नापि शब्दः सर्वेषां तस्या सं
भवात्। उपमानाद्यसंभवोऽपि स्फुट एव। ततः कथं सर्वाभ्यः स्मृतिव्यक्तिभ्यो व्यतिरेको निरूप्यः प्रमायाः इत्यनेन वादी वादसिद्धिलक्षणं स्यान्न
च वाच्यं स्मृतित्वेन सर्वाः स्मृतिव्यक्तयः सर्वकालसर्वपुरुषसंबंधिनः स्वाश्रीयां स्मृतिव्यक्तिप्रत्यक्षयत्नात् प्रत्यक्षादेवावगम्यते। सामा
दा न्यलक्षणयोग्याप्रत्यासत्त्यापि अग्रहणकाल इव सर्वव्याप्यव्यापकस्य ग्रहणे दृष्टान्तस्वीकृतिं कियाद्दोषयुक्तत्वात्। तथा सति ह्युक्तमप्रमेयं
प्रत्यक्षत्वं च प्रमेयत्वसामान्यलक्षणप्रत्यासत्त्या सर्वाविशेषमेव प्रत्यक्षं स्यात्। एवमभ्युपगच्छतः श्रद्दधीमहि सार्वज्ञमिदं यदि जानासि सिद्धिमखा
वेति सिविषयरिवर्तत इति। नापि तृतीयः। स्मृतित्वरहितत्वं हि स्मृतित्वाभाववत्त्वं वा स्यात् स्मृतित्वप्रतियोगिकभावाश्रयस्य स्वरूपं वा तद्वा २०
न्वानन्तवद्दाद्यः। तथाहि स्मृतित्वाभावे अन्याभावेऽपि स्मृतित्वाभावोऽभवत्येव तद्वत्त्वं च स्मृतित्वप्यास्ति न हि स्मृतित्वमेव स्मृतेः ततश्च स्मृते

यकारणासन्नवान्स्मृतिश्चानुभवश्चेति मन्तव्यं। तथा च स्मृतित्वावृत्तमनुभवत्वं जातिरस्तीति दुष्प्रत्याशा। निरवकाशा। नच विषयीशे स्मृतित्वानुभू
तित्वयोर्व्यवस्थाकर्तुं शक्यते तन्निरासस्य निवेदितत्वात्। ततश्च तद्वैचित्र्यानंतस्मिन्नेवांशे स्मृतिश्चानुभूतिश्चेत्यापतितं। यदि न विरोधबुद्धिर्भवतस्त
दा तदधीनतत्त्वैवार्थप्रमात्वापातमातृस्तु। एतेन विरोधापत्त्या अनुभवत्वस्वीकारे बाधके न स्मृतित्वावृत्त्यतिरिक्तमनुभवत्वे नामानुगतं सामान्यास्त्वकारिज्ञाना
नुमित्यादिसाधारणमनुभवत्वबलादेव व्यवस्थापनीयमिति प्रतीतिकलहोऽपि निरस्तः। ननु चानुभव एव शरणमिह प्रत्यभिज्ञाने ह्यनुभ
वत्वमेवानुभूयते न तु स्मृतित्वं। तेन संस्कारजत्वेऽपीन्द्रियार्थसन्निकर्षापेक्षयानुभवत्वमेवेति विनिगमनापाभमपीदमेव प्रमाणं।
अन्यथा प्रत्यभिज्ञानेऽनुभवप्रत्ययो न स्यादिति प्रतीतिकलहे न प्रत्यवस्थेयमेवेति। न। इदन्तानन्तावभासयोरनुभवस्मरणभाग
योः सत्वेनानुभवस्यैकपक्षे साधारणीकृतस्य प्रमाणयितुमिहाशक्यत्वात्। एतेन स्मृत्यनुभवसंकरप्रसंगे नानुभूतिव्यवच्छेद्यपरि
प्लुतं मन्तव्यं। नच वाच्यं प्रत्यभिज्ञानं व्यवच्छेद्यं माभूत्स्मरणं त्वनुभविष्यतीति। तस्याप्यनुभूतित्वेन भवता अवश्यं स्वीकर्त्तव्यत्वात्। तथा हि घ
टस्तत्रासीदित्यादिस्मृतौ पूर्वकालविशिष्टो घटः स्फुरति। न चासौ पूर्वमनुभूतो भूततया संस्कारेणोपनीयते। प्रत्युत पूर्वं वर्त्तमानतया
याएवानुभूतस्य ग्रहणात्। तस्मादिदानीं पूर्वताधीसामग्रीभेदात् सोऽयमिति प्रत्यभिज्ञानवत् द्विशिष्टावगमोऽप्यसौ स्मृत्यनुभवात्मक एवाभ्यु
पगंतव्यः। एतेनानुभवसामग्रीसहितः संस्कारोऽनुभवकारणमिति पक्षेऽप्यपूर्वशंकितेऽद्भवमपि दूषणं द्रष्टव्यं। तथा सति स्मृत्युच्छेदापत्तेः।
नच तद्वृत्तिस्मरणं यत्र सा न प्रकाशते। ततश्च व्यवच्छेद्यानुपपत्तिः। यदपि केश्चिदुच्यते दोषवशात् प्रमुष्टतत्ताकं स्मरणं भवतीति तदपि
नैं। नोपपन्नं तदीयस्मरणत्वे प्रमाणाभावात्। न चानुभवसामग्र्यभावात् परिशेष्यात् स्मृतित्वं इंद्रियार्थसन्निकर्षव्यावृत्त्या अनुभव
सामग्र्यभावात् परिशेष्यानुमित्यादेरपि स्मृतित्वापत्तेः सर्वानुभवसामग्र्यभावादिति चेत्। कथं पुनस्तत्तांशप्रमोषजतादिज्ञान

खं॰म॰ र्थायायदिसत्त्वमभ्युपेयेपितदाऽनुभूतौस्मृतित्वप्रसंगः। अथवाभ्युपेयेपिकिंप्रतितस्याजनकत्वाभावोनिरूप्यः। अथासत्तासतीमेवता
२१ दृशबुद्धिंप्रतिजनकत्वाभावावधारणमभ्युपेयेपितदास्मृतावपिप्रसंगः। यावत्सत्त्वेतद्बुद्धयस्तत्रजायंतेतदपेक्षितदृशबुद्धिमसंतास
तीप्रसजनकत्वस्यस्मृतावपिसंभवात्। सर्वामेवताहृशबुद्धिंप्रसजनकत्वमनुभूतेतत्त्वेवंस्मृतेरितिचेत्। तासर्वतद्व्यक्तिप्रतित्वसं
भवात्। किंच। सर्वामितिकोर्थः किमसतीसर्वांततसतीउतसतीमसतीचेत्युभयामपिप्रसजनकत्वं। आद्येद्वितीचस्मृतावपितद
जनकत्वमस्त्येता नहिस्मृतित्वसंसर्गस्मृतीसंवद्वेइतियावत्सः स्मृतिव्यक्तिषुबुद्धयोभवंतिताःप्रत्येकंस्मृतिव्यक्तिषुजनकत्वमिति
कांचित्संतीप्रतिवतदजनकत्वंप्रागेवहृषितंतृतीयेनानुभूतावपितद्जनकत्वं। सत्तासत्त्वताहृशबुद्धेर्भावेनाभावेनचसतीमसतीं
प्रसजनकत्वस्यासंभवादिति। साप्येतत्। स्मृतित्वस्यान्योन्याभावमादायया तिप्रसक्तिर्दर्शिता सानोपपद्यते। भेदाभेदवादि
मतेस्मृतित्वाभेदस्यस्मृत्यासहाभ्युपगमात्। ययोर्भेदाभेदस्तयोस्तत्रान्योन्याभावानभ्युपगमात्। मोवंकथंह्यवधार्यस्मृतित्वसभे
दःस्मृत्याज्ञानुभूत्येतिअनुभूत्यासहतद्विशिष्टप्रमायाअभावादितिचेत्। न। किंसत्ताकिमसत्ताइत्याद्युक्तदोषाविकल्पेत। न। प्रा
गभावप्रतियोगिन्यइतिचेत्। अनुभूतौताहृश्यः स्वीकारेणानुभूतेस्तथात्वापातात्। स्मृतिस्मृतित्वयोरन्योन्याभावाभाव
श्चान्योन्याभावात्माअनुभूतावपितुल्यः। नहिस्मृतित्वान्योन्याभावोनुभूतिमतिक्रमावर्त्तते। अथमाभूद्भेदाभेदमादायप
रिहारः तथापीदंतत्रभवतिइहतत्त्रास्तीतिप्रतीतिसाक्षिकएवान्योन्यसंसर्गाभावयोर्भेदइतिचेत्। न। प्रतियोगिरूपोपाध्यवे
चित्र्यादभावेजात्यादिभेदानभ्युपगमाच्चतयोर्भेदबुद्धिरेतप्रामाण्यमनस्त्रवानाकूटसाक्षिणीतितदनादरणात्। नचस्वप्रति
योगसमानाधिकरणोऽभावोन्योन्याभावः तदन्योन्याभाववांश्चतदभावःसंसर्गाभावः। यथासंभवमात्माश्रयाद्यनन्तु रामः २१

मवस्थभेदाननुगमत्तदवगमानभ्युपगमानामनुत्तरणीयत्वप्रसंगात्। ननु संसर्गप्रतियोगिको निषेधः संसर्गाभावः तादात्म्य
प्रतियोगिकश्च तादात्म्याभाव इत्युक्त एव न मिश्रत्वात्तयोः यो हि संसर्गतादात्म्यनिषेधः संसर्गनिषेध एव न भवति। तादात्म्यप्र
तियोगिकत्वादिति मैवं द्रव्यगुणकर्मणां समवायिकारणेषु हि तेषां प्रध्वंसा। न चैवं संसर्गाभावास्तु संसर्गप्रतियोगित्वेन तु संस
र्गस्य समवायरूपतया समवायानित्यत्वप्रसंगात्। किं च तर्हि संसर्गाभावान्योन्याभावौ द्वावपि तद्घटादिप्रतियोगिकाविति
घटादेः कालादिवन्निरवधित्वापातः। संसर्गतादात्म्ययोश्चाविशेषितयोर्निषेधे सामान्यत एव तयोनुच्छेदः स्यात्। एवं यद्भेद
वप्रतियोगिवाच्यतत्त्वरूपत एव न स्यात्। तस्यापि संसर्गप्रतिषावनेव तदन्नतं। संसर्गानवस्थावाशेषोच्छेदात्पूर्वपूर्वैच्छेदो
वा स्यात्। न प्रतियोगानुयोगिनोस्तथात्वे विरोधः किं तु सहभावाभावोऽन्तस्तन्मात्रं स्यात्। ननु तन्मात्रमेव न स्यादिति चेत्। नात्र
नुयोगिनि प्रतियोग्यापत्तेः। तथा प्रमाभावकथं तथात्त्वमिति चेत्। न। तथा प्रमाभावमूलस्य विरोधस्य सहानवस्थानस्यानि
यमनभ्रंगप्रसंगात् प्रतियोग्यनुयोगिवादन्यः कस्तद्योर्विरोधः स्यात्। तथा न प्रमीयमाणत्वमेव स्यादिति चेत्। अतिप्रसंगात्।
नियमेनैनिश्चेतव्यक्तो रविरोधापत्तेः। तथा नप्रमानुमनौपाधिकीयोग्यतेति चेत्। सैवमेयगतानुयोगिप्रतियोगित्वान्याका
शमार्थितास्यात्। स्वरूपमेवेति चेत्। न। मिथः संभेदाभ्युपगमेत्रापि तयोः स्वरूपोपगमात्। तथाभूतस्वरूपमिति चेत्। न।
तस्यैवानिर्वाच्यत्वापत्तेः। कस्वगोत्वाश्वत्वाभ्यां भावाभावयोरेव विरोधे विशेषः स्यात्। सत्तां च तयोः साहित्यप्रमायां प्रकारभेदे
नव्यवस्थापनात् किमितिकार्यो। प्रमेयैवाप्रमानुपगमादिति। अथ घटादिविशेषितयोस्तयोर्निषेधौ तौ सविशेषणौ च निषे
धौ न कथंचिद्विशेषणमनुपसंक्रम्य स्यादिति ब्रूषे। तदपि न। तर्हि विशिष्टस्य निषेधो विशेषणस्यापि भवतीति संसर्गान्योन्य

ख॰ मू॰ २२ निषेधोपि संसर्गनिषेधः स्यादेवेति पुनः स प्रसंगो वज्रलेपायते। अन्योप्रतियोगिकः संसर्गप्रतिषेधस्तथा विवक्षितः। एवमन्यो
न्यनिषेधोपि संसर्गप्रतियोगित्वेनाभिमतिश्चेत्। न। एवं ह्यन्योन्यसंसर्गाभावः संसर्गान्योन्याभावश्चापराकोटिः स्यात्। किंचैवं
सति संसर्गाभावेन्योन्याभावो यो न भवति संसर्गाभावतया विवक्षित इत्युक्तं स्यात्। तथा च संसर्गविशेषणं व्यर्थमिति संसर्गाभा
वमर्थमधिकमाकांक्षतान्वयात्त्वर्थः संसर्गाभावशब्दोपि हारितः स्यात्। किंच नयापि वाचात्रान्योन्याभावनिषेधोभिधीयमानो
न्योन्याभावेपि प्रसज्जेत। न ह्यन्योन्याभावे सोन्याभावो भवतीति शक्यं प्रमातुं। सामानाधिकरण्यं हि प्रकारभेदे सति भवति। य
थानीलमुत्पलमित्यादि। ततस्तदभावादेव न तत्र तस्य तिप्रसंगः। अन्यथान्योन्याभावेऽवतिष्ठत्येवैकः प्रमेयो यद्वतिलथाके। कारो ६
ल्प्यत् अभावमात्रे त्वतिप्रसंगात्। व्यक्तिविशेषे च शेषेष्वन्योन्याभावेषु संसर्गाभावत्वापत्तेः। एतच्च सर्वत्रैदन्त्वेन व्यवच्छिद्यमाने
द्रष्टव्यं। तथा हि। नात्र च त्वन्मन्ये सतावत्रैतत्तदपि मन्यसे। सामानाधिकरण्यं हि रूपभेदमपेक्षते। रूपान्तरेणानिर्दिश्यते च तदभिधीय
ते। तादृप्येण तथापि स्यात्सैव सव्यभिचारता। अपि च। अन्योन्याभावस्य संसर्गाभावोप्येवं व्यवच्छिन्नः स्यात्। तस्याप्यन्योन्यप्र
तियोगिकत्वात्। अथात्रान्योन्याभावस्य संसर्गाभावो नाम अधिको नोपेयत एव यमादाय तथा स्यादिति चेत्। न। एवं तर्ह्यन्यो
न्याभावस्याभावो नाधिकोऽभ्युपगन्तव्यः स्यादित्यन्योन्याप्रतियोगित्वेन व्यवच्छेदोपि संसर्गाभावस्य त्वदभिमतस्य कथं स्या
त्। व्यवच्छेद्यस्य निषेध्यार्थत्वात्। अथ माभूदधिको सौ स्वरूपमेव तथेष्यत इति तदादायैव व्यवहार एष निर्दोष इति चेत्। तर्ह्यन्यो
न्याभावस्य संसर्गव्यतिरेकेपि तुल्यमेतत्। अपि चान्योन्यप्रतियोगिको न भवत्यभावो यः स संसर्गाभाव इति वदतावयात्रान्योन्य राम॰
प्रतियोगिके अभावे निषिध्यमाने अन्योन्यात्मकोसाव भावोभ्युपगतः स्यात्। द्वयोर्निषेधयोः सुंदोपसुंदतयान्योन्यसे २२

रपिप्रमात्वापातः। तदनवच्छेदाद्विशेषणवैयर्थ्यं च विना। विशेष्यमिच्छादावपि प्रसंगात्। स्मृतित्वस्य संसर्गाभावस्तत्र विवक्षि
त इति चेत्। तथा हि। स्मृतित्वस्य संसर्गाभाव इति किमुच्यते। किं स्मृतित्वविशिष्टसंसर्गाभावः तत्संसर्गविशिष्टस्य स्मृतित्वस्य
अन्यदेव वा किंचिदन्यद्वा। नाद्यः। स्मृत्यादिव्यक्तिष्वाद्यस्मृतित्वसंसर्गस्यान्योन्याभावस्य तावत्त्वेति स एव प्रसंगः। नहि स्मृतित्वसंस
र्गः स्मृतिः। अत एव न द्वितीयोऽपि। नहि संसर्गविशिष्टं स्मृतित्वं तदेव स्मृतिव्यक्तिः। तत्रश्च संसर्गविशिष्टस्मृतित्वेन सह स्मृतिव्यक्तेरन्यो
न्याभावमादायोक्तदोषानिवृत्तिः। एवं तत्रापि संसर्गविशेषणप्रक्षेपेण दोषानिवृत्तिरेवात्रानवस्थायां पर्यवसानं विशेषणप्रक्षेप
परंपरायाः। न च वाच्यं स्मृतित्वसंसर्गस्य न संसर्गान्तरेण संबंधित्वं। किंतु स्वभावत एव तत्कुतः परंपरागवेषणं कार्यमिति। स्मृति
त्वसंसर्गान्योन्याभावमादाय कृतस्य प्रसंगस्य परिहर्तुं तदानीमुत्तरामशक्यत्वात्। संसर्गान्तरविशेषणत्वेन च नस्याधिकाव्यपर्यवसायि
त्वात्। किंच तदुभयस्वरूपातिरिक्ते तत्संसर्गस्याभ्युपगमाने नस्मृतित्वसंसर्गो धर्मिस्वरूपं चेत्तयोः संसर्गात्मकत्वव्यवस्थाप्यमाने अ
नुभूतौ कथं तादृशस्य संसर्गस्य निषेधः किमनुभूतेः स्वरूपं नास्ति उत स्मृतित्वसंसर्गस्य। ततः कस्य निषेधः। अर्थान्तरभूतस्य च सं
सर्गस्य निषेधे स्मृतावपि प्रसंगस्तदवस्थः। स्मृतौ तस्यार्थान्तरभूतस्य भवतानभ्युपगमात्। स्वरूपमेव तयोः संबंध इति तत्र भेदेनाभ्यु
पगमः। अथोच्यते अनुभूतिस्मृतित्वसंसर्गयोः स्वरूपसंभवेऽपि न परस्परसंबंधबुद्धिजनकत्वं तयोः। तादृक्त्वं च मत्र तयोस्तत्र संबंधात्म
कत्वं स्वरूपयोरुच्यत इति नामैवं। विशेषोऽयं संग्राहकाभिद्धो तस्याप्यनुपपत्तेः। उपसंग्राहकान्तरानौ तत्संबद्धोऽपि प्रसंगे नापरापरोपसंग्रा
हकगवेषणायामनवस्थापातात्। तावतापि चानुभूतिस्वरूपेकस्य निषेधोऽस्ति रीतिः स्यात्। स्मृतित्वसंसर्गानुभूतिसंबद्ध इत्येवं रूपबु
द्धिजनकत्वस्येति चेत्। आत्मिकाया इदृशबुद्धेर्जनकत्वस्यावारयितुमशक्यत्वात्। शक्यत्वे यथार्थाया इति चेत्। इदृशबुद्धेर्यथा

ख॰ म॰ ऽभिधीयते। भावो निषिध्यत इति चेत्। न। तस्याभावपदेनैव लक्षितत्वात्। भावनिषेधो भाव इत्यनर्थान्तरमिदं भावसामानाधिकरण्यनिषेध
एवकारार्थ इति चेत्। न। उक्तेनैव गतार्थत्वात्। अन्योन्याभावस्य च तत्संसृष्टतावपि भावात्। नहि भावसामानाधिकरण्यं संसृष्टतिः स्मृतौ
२३ च भावमभावं चैकत्रमन्यमानेन तस्यापेक्षत्वात्। तयोः परस्परप्रतिक्षेपरूपत्वात्। नहि रूपरसयोरेकत्राभावेन तत्सामानाधिकर
ण्यभावः स्यात्। समविषयोर्भावाभावयोः परस्परप्रतिक्षेपात्मकत्वेन न सिद्धमिति चेत्। नहि यो विषयो भावे तदभावपदसंकेते न रूपर
सयोरिति रूपि स्त्तेप्रमाणं रूपरसयोः परस्परप्रतिक्षेपानात्मकत्वान्तर भावे तयोः सामानाधिकरण्याभाव आस्तां अत्र तु नैवमिति चेत्।
न। तथात्वस्यासामानाधिकरण्यप्रयोजकत्वे तद्व्यतिरेकः सामानाधिकरण्यप्रयोजकः स्यादिति रूपरसादीनामसामानाधिकर
ण्यापत्तिः भावाभावयोरसामानाधिकरण्यानुपपत्तिश्च। असामानाधिकरण्यमेव यत्रेति विवक्षितमिति चेत्। न। एवकारार्थ
दोषस्य तादवस्थ्यात्। एतेन विलक्षण एवायमभावो भावसहासनानुपवेशी एवकारसमभिव्याहारेणोच्यत इति निरस्तं तस्या
पि वैलक्षण्यप्रतियोग्याश्रयनिषेधतासाम्येपि सामानाधिकरण्यविरहादुन्नेयं जन्वत्वल्यमभावान्तरेण। सामानाधिकरण्याभा
वप्रत्ययेनेति चेत्। न। प्रत्ययविशेषकस्याथि संसृष्टतावपि भावात्। अन्योन्याभावव्यतिरिक्तः स्मृतित्वाभाव इत्युक्तो च स्मृति
व्यतिरिक्तपक्षोक्त एव दोषः। तदास्तां विस्तरः। नापि स्मृतित्वप्रतियोगिकमाश्रयस्य स्वरूपं तद्धि वैतियक्षः अन्योन्याभावेपि भवतामभावे
भावेच्चवस्थायास्ताद्दशत्वेनोक्तप्रसंगस्य समानत्वात्। अथान्यदेव किंचित्संसर्गाभावनिर्वचनं क्रियतां तथाहि। स्मृ
तित्वस्य यत्र संसर्गितया निषेधः तत्र तदभावस्य संसर्गाभावत्वं यत्र तु तादात्म्यत्वेन तत्र तदभावस्य न संसर्गाभावता किंत्व २३
न्योन्याभावत्वमेव। सद्धह न विवक्षितः। पूर्वकल्प एव तु संसर्गाभावो ऽभिप्रेतित इति नैतद्विचारसहं। संसार्गितया निषेध इति यदि

तीयासालक्षणेवासहयोगेवाकारणभेदेवाकरणादेः। नाद्यः संसर्गितयाभिन्नितस्यैवान्योन्याभावमादाय प्रसंगात्। नापिद्वितीयः तत्स
हितस्यैवान्योन्यनिषेधस्यप्रत्याख्यातुमशक्यत्वात्। तृतीयस्तु न संभवति। अत्रैतन्निषेधस्याप्युभयनिधर्मकत्वात्। तस्यचप्रकृतोदाहरणात्त
त्प्रकाराच्चिनीयत्तृतीयेतिचेत्। प्रकारशब्दार्थस्यनिर्वक्तव्यत्वात्। प्रकारः प्रकारएवेतिचेत्। न। अविदितलक्षणस्यलक्षणान्तरमनभिधायत
व्यवच्छेदेनतत्सदृशयितुमशक्यत्वात्। अन्यथा सर्वत्र प्रष्टारंप्रतिलक्षणानभिधानापातात्। कोघटइत्यादिप्रश्नेघटइत्याद्येवोत्तरंसं
गच्छेत। प्रकारइतिपक्षोनोपपन्नः सदोषत्वादितितत्र के कोदोषइत्यत्रयुक्तोदोषएवदोषइत्यभिधायैवनिर्वृत्तौ भवेदिति। स्मृतित्वलक्षणेतल्ल
क्षणान्तरेणरहितत्वमनुभूतित्वमितिप्रस्तुतंकेवेदितव्यं। गृहीतस्यज्ञानंस्मृतिरितिचस्मृतिलक्षणेधारावाहिकज्ञानेऽतिप्रसक्तं। सापेक्षंज्ञा
नंस्मृतिः सापेक्षताचस्वविषयनियमेसमानविषयकज्ञानापेक्षतेतिचेत्। न। प्रत्यभिज्ञायांभागस्यस्मृतित्वापत्तेः। एवमस्त्वितिचे
त्। न। तर्हिप्रत्यभिज्ञायांस्मृत्यनुभवभागयोभिन्नविषयत्वव्यवस्थितौ तद्भेदः केनगृह्येतेति। संस्कारमात्रजंज्ञानंस्मृति
रितिपिनसामग्रीतः सर्वसंभवेनलक्षणस्यासंभवात्। असाधारणतद्धेतुकधीत्वमितिचेत्। न। आत्मप्रत्यभिज्ञानेप्यापत्तेः
आत्ममनोयोगस्यसाधारणत्वात्। कार्यैक्यानवधारणेचकारणत्वानवधारणात्। तदेकत्वेवतदेवलक्षणंस्यात्। येनज्ञा
नेनार्थोज्ञाततामक्रियतेतदनुभवः येनतुज्ञाततातथातत्स्मरणमितिचेत्। न। ज्ञातोज्ञास्यतेचेत्यनुमानादावप्यापत्तेः।
तत्तत्स्वविषयतः स्मृतिविवेचनमन्ततोवाक्यनाप्यनुभाव्यत्वात्कार्यकारणभावं चानुगतरूपस्यप्रागसिद्धेर्जातितितत्सु संकर
प्रसंगादृशक्यमिति। नापिचतुर्थः। यतः कार्यगतवैलक्षण्यानवगमेकारणताकासाधारण्यंवाज्ञेयमिति। नकेवलप्रत्य

ख॰मू॰ कंपदार्थस्य तदवच्छेदकत्वस्य चानुपपत्तिर्मिलितेष्वास्मिल्लक्षणे दूषणमुच्यते। तथाहि। तत्वानुभूतिः प्रमेत्यनेन काकतालीयमपि यथार्थ
२४ ज्ञानं व्याप्यते। तद्यथा पाणौ पंचवराटकान् पिधाय कश्चित्कंचित्पृच्छति कति वराटकाः करतिष्ठंतीति स्वाज्ञा कृपाणीय मायेन त्रवीतीय चेति तत्तत्सं
चेति ज्ञानमस्ति वक्तुः श्रोतुश्च दृश्यते तावदेवंविधोदाहरणानि। तच्च ज्ञानं न तत्वपदेनावच्छेत्तुं शक्यं वस्तुतस्तस्य पंचसंख्यावच्छि
न्नत्वेनातथाभूतत्वाभावात्। नाप्यनुभूपदेनावच्छेद्यमननुभूतचरत्वेन स्मरणलक्षणापेक्षणात्। न चैवं वक्तुः संशय एव नि
श्चायकाभावादेकतरकोटिव्यवहारस्तु कृष्यादिप्रवृत्तिवदिति युक्तं। तत्राप्याहार्यरूपैककोटिनिश्चयावस्थानादन्यथा संशय
स्य कोटिद्वयनिश्चयसमुच्चयतापत्तेः। न च प्रमैवतदित्यस्वीकरणीयं मध्येध्यत्वादिदूरत्वभावत्वात्। अव्यभिचारिकारणजत्वे सतीति वि
शेषणीयमिति चेत्। न। तत्वपदवैयर्थ्यापातात्। काकतालीयसंवादरूपमपि ज्ञानं न व्यभिचारिसाधारणकारणसामग्रीजन्यमा
स्थानुमीशिष्वव्यभिचारिणोपि कारणा विशेषतयथार्थत्वप्रसंगात्। न ह्यहेतुकमेवास्य यथार्थत्वं नियामकाभावेनातिप्रसंगापा
तात्। अवश्यमस्याव्यभिचारित्वेऽव्यभिचारिनियतमेव कारणं वाच्यं किं तदिति चेत्। स्वात्मनैवात्र प्रश्न्वदीयता मुत्तरं भवतापि
नयतेष्वप्रमाराशिष्वेवेदं ज्ञानमतत्भीमं। प्रमा सामान्यलक्षणेन वाव्यवच्छेत्तव्यं। एवं लिंगाभासादिष्वपि ज्ञातलिंगेज्ञानं दैव २५
त्तास्थितलिंगलिंगिनि लिंगीमत्येवं वा यत्सात्तत्र यद्यपि लिंगाभासांशे सेन प्रमानवा तद्वति लिंगिरूपे तथापि विशिष्टं तथावि
धं गोचरयंतास्तस्मात् बुद्धेर्लिंगांतरवति केवले वा लिंगिनि जिवद्या दावप्यंशे विषये प्रामाण्यस्वीकारेणोक्तदोषापरिहारादि
ति। आभासकरणजत्वात् बुद्धिविषयस्य वस्तुभूतात् लिंगादेरन्यत्वमेवेति चेत्। न। विशेषस्याप्रत्वपितत्रानीयतीमात्रवत्तावगा

वस्थोर्यापत्तेः। तथा सत्यन्योन्यस्मिन्निर्विशेषणो जगदेव प्रविष्टमिति संसर्गाभावत्वेन विवक्षितत्वस्य जगदात्मतायां सिध्यंत्या
मन्योन्याभावात्मता भूमिस्यादिति व्यर्थो विशेषणप्रयासो हा स्या येति सविशेषणो घ्यविशेषणावत्वसंसर्ग इति महत्कौतुकं। ननु घटा
भावो न भवतीत्यत्र भङ्ग इत्युक्ते किं सत्त्वो घटात्माविहितो भवति। तत्कस्य हेतोः। तदा हि तथा स्यात्। यदि घट स्तदभावश्चेत्येवं जगत्स्यात्। यस्तु
स्तंभादिरप्यपराकोटिरस्ति तदा कथं स्यादित्युक्तप्रसंगानवकाश इति चेन्न। यथा घटतदभावाभ्यासन्मात्रवस्त्वादिकं मध्यस्थिकोटिस्तथा मो
न्यान्योन्याभावाभावानान्याकोटिः सं भवति निर्विशेषणोऽन्योन्यमध्ये जगत एव प्रवेशात्। तदात्मनोपि निषिध्यमानत्वे तन्निषेधात्मकेत्तदात्मनि ज
गत्प्रवेशात्। नहि घटः पटात्मेत्युक्ते न घटः स्वरूपादन्यत्तं तदात्माविहितः स्यात्। यदि तु तादात्म्येनाभेदाख्यो धर्मः कश्चिदिष्यते स घटपटाद्य
धिकरणतया निषिध्यते तदानीं संसर्गाभाव एव स्यात्। तस्मान्निर्विशेषणात्तदात्मात्मभूतं जगदिति कोयं तराभाव इति। अपि च एवं तर्हि घटेनि
षिध्यमाने घटाभावो विधीयते घटाभावे च निषिध्यमाने घट इति सप्तिन स्यात्। तृतीयस्याविद्यमानत्वात्। भवतु वा घटाभावस्तंभो न भवतीत्यत्रा
पि घटाभावत्वाविशेषाद्विशेषान्तरानिर्वचनाद्घटस्तंभात्मेत्येवोक्तं स्यादिति तदवस्थं संसर्गस्त्वयि निपतेत्। संसर्गान्योन्याभावत्वे चित्त्यम
न्यायस परिहाये सह वचनाद्यापि व्यवतिष्ठते अत एव प्रतीतिबलादन्यदेव वैधर्म्यमनयो रूपेयमित्यपि निरस्तं। प्रतियोगिप्रतियोग्यविरोधप्र
कारविशिष्टव्यवस्थानिरुक्त्यशक्तेः। रतिशेषेणैकनिषेधेऽन्यविधिप्रौव्यभवदन्योन्याभावनिषेधोप्यन्योन्यविधेयः स्यात्। समवा विर्वच्चनीयत्वेव
प्रतीतिव्यवहारव्यवस्थापर्यनुयोगवारणावारणाय वज्रवारणं वारणायमानाविजयेते। ममत्वेवं दर्शनं प्रतीतिसिद्धत्वादसत्त्वासद्वि
लक्षणं भवदपि जगत्तथासत्त्वोपगमे वाध्यमानत्वादनिर्वचनीयमिति। अत एव प्रतीयमानत्वाद्वैचित्र्यमनयोर्दुष्यमाणम
तिदूरे निरस्तमुक्तं प्रतियोग्यादिवैचित्र्यानुपपत्तिः प्रतीयमानस्यैव बाध्यता या एवकथनात्। तस्मादन्योन्याभावसंसर्गाभाव
भेदव्यवस्थितौ। सत्तांसात्तद्व्यवस्थितिस्वाश्रयकश्चिकित्सता। अभाव एवयत्नेति सावधारणं वक्तव्यमिति चेत्। न एवकारेणाधिकम

ख-म्रू
२५

मवायाद्रूपं विशेषणी भवति तथा विषयभावात्तज्ज्ञानस्यापि तद्विशेषणं भवत्येवेति चेत्तन्न । एवं हि पुरोवर्त्तित्वादिना रूपेण
तथाभावसंभवात्तपुरोवर्त्तिनी शुक्तिरजततयावगाहमानं ज्ञानं प्रमाणं स्यात् न च वाच्यमिष्यत एव सा प्रमापीति न व्यभिचारनो
दनेय युक्तिमनीति । यथार्थताविशेषणवैयर्थ्यप्रसंगात् अत्रानुभूतिः प्रमेत्युक्त एव हि तावत्रास्त्यतिप्रसंगः सर्वस्य व्यभिचा
र्य्यनुभवस्यापि तत्तोऽन्यथाख्यातिवादिनये धर्म्मिण्यपि प्रमात्वसंभवे तत्प्रमायामेवानुभवत्वस्य स्थैर्यात् यदि वैशतोपि व्य
भिचारिणाप्रमालक्षणंगमदिति चेत्तर्हि निधायथार्थत्वविशेषणं प्रयुक्तं तदा न युक्तमुक्तदोषात् । अथोच्यते प्रकाशमा
नेन रूपेण सर्वेण विशेषणभावाद्यस्यानुभवस्यार्थसादृश्यं सा प्रमाणं च तावता धर्म्मिणो धर्म्मविशेषणतया दोषः तत्त
स्यापि तद्विषयं तर्ह्यव्यवच्छेदकत्वादिति । तर्हि व्यभिचारिज्ञानं धर्म्मिण्यपि प्रमाणं स्यात् सर्वात्मना सादृश्याभावात् अव्य
भिचारिणांवांशमबाध्य तदीयाप्रमितिकोटिनिक्षेपसाहसिक्याद विभ्यता किमव्यभिवार्यंशानुरोधेन व्यभिचार्यंशस्यापि
प्रमाकोटिनिवेशनेम वा नाध्यवसीयते भवता । शक्यते ह्यनुभूतित्वज्ञानत्वादयः तादृशाभिप्रायानुरोधिनो लक्षणीकर्त्तुं यदि च वाध्या
र्थांशाच्छीरवाध्यार्थांशेप्यप्रमैव तदा सौधाग्रकुम्भादि व्यवहरता तु हि न द्युतिविद्युदादिपरभागाग्रहणाद्द्वयविनं च तावत्परिमाणाल्प राम:
परिमाणमुल्लिखत्स्तत्तत्प्रमात्वेन लोकप्रसिद्धमप्रमा स्यात् । किं चलम्भूदेशकालालोकादिव्यक्तिसहितजलादिज्ञानस्यस २५
मस्तावदर्थप्रवृत्तिसामर्थ्योदाहरणाय न तत्प्रमाणं जन्यस्य यस्त्विवाध्यांशे वाधादवाध्येप्यंशे तद्दोषस्य मिथ्यात्वं समर्थयेत् स तद
यदर्थजातीयं वाध्यं तदर्थजातीयमावाध्यमपि मिथ्येति मन्यमानेन किमुत्तरं ते स्यादन्यत्र लोकप्रसिद्धप्रमोदाहरणत्यागात् । अथोच्य

तेप्रकारामानेन रूपेणाविशेषणतया यदर्थसाम्यमनुभवस्य तत्र प्रमात्वमिति विषयविशेषनियमेनैव प्रमात्वं लक्षणीयमि
त्यतदर्थमेव यथार्थविशेषणोपादानमिति ॥ मैवं ॥ विशेष्याशेष्यनुभूतिरेवं प्रमाणस्यादिति व्यवच्छेदकं विशेषणमभिम
तं धर्म्यपितस्य संबद्धाद्धर्म्मा विशिनष्टीति नोक्तदोषः इत्युक्तमेवेति चेत् न विशिष्टप्रमात्वाभावापत्तेः अपि चैवं तर्हि रजतत्वा
दिकमपि व्यवच्छिनत्त्येव शुक्तिकाया रजततया प्रकाशितायाः शुक्तिःस्यमिति न तु साक्षाद्विशेषणावि वक्तितं रजतत्वं तु ज्ञा
नद्वारा शुक्तिविशेषणमिति नातिप्रसंगः ॥ मैवं तर्हि दीर्घदंडः पुरुष इत्यादौ स्वदंडादिभ्यो वेलक्षण्येन विशेष्यस्यानुभूयमानेऽनु
भूते न प्रमा न स्यात् दीर्घत्वादेर्दंडद्वारा विशेषणत्वादिति ज्ञानं तु रूपद्वारा न पक्षतया विशेषणत्वमिति चेत् न साक्षात्वेतरलाघव
गमानामप्रमात्वापातात् एवं विशेषणत्वमिष्टमिति तद्रूपं तु छन्द रूपादेः समवायेन ज्ञानाविशेषकत्वात् तेऽर्थविशेषणात्व अथानि
यमो यत्तज्ज्ञानप्रकाशितं रूपेणेति न तु तज्ज्ञानेपीति चेत् नानात्र ज्ञानव्यक्तेरन्यत्रासंभवेन असाधारणापादव्यापकत्वादिसलास
म्यक्परिछेदः प्रमेत्यपि न युक्तं न खलु सम्यक्त्वं तत्त्वविषयतायाथार्थ्यं विश्वासं भवतु उक्तदोषात् ननु सामस्त्यं सम्यक्त्वमिष्टं अभि
धीयते च लोकेन मया सम्यग्दृष्टं सामान्याकारेण रूपलब्धमिति तदिह समीचोर्थस्य परिछेदः सम्यक्परिछेदः सम्यगर्थविष
यत्वाद्वा सम्यक् छब्दः परिछेदं समानाधिकरण एवायमिति ॥ मैवं ॥ सामस्त्यमर्थस्य किं सर्वावयवसहितत्वं अथवा सर्वधर्मसहित
त्वेनाद्यः अनवयवपदार्थपरिछेदस्य सावयवपदार्थपरिछेदस्यापि मध्यभागाद्यविषयस्याप्रमात्वापातात् नापि द्वितीया
असर्वविचित्परिछित्तीनां सर्वासामप्रमात्वापत्तेः अथ मन्यसे सम्यक् शब्दः सविशेषार्थः यदपि लोकेऽभिधीयते तेन मया

ख·मू: सम्यक्दृष्टं तस्यापि न मया विशेषतोऽदृष्टमित्यर्थः। तस्माद्विशेषसहितधर्म्मिपरिच्छिन्निः प्रमेत्युक्तं भवति विभ्र
२६ मादयो हि विशेषमनुपश्यतो जायन्त इति तद्या वृत्त्यर्थं विशेषणमिदं विशेषाणाश्च सर्व्वेषां विशेषाणान्तरानभ्युगमे पि स्वरूपमे
वकेषांचिद्विशेष इति नेत्युक्तं। विशेषपदेन विशेषमात्राभिधाने रजतत्वादिना विशेषेण सहैव युक्तिव्यक्त्या देशभ्रमेणावगाहना
त्तस्यापि प्रमात्वं स्यात् प्रत्यर्थं वा तत्तत्कारणां च विशेषाणामनुपादानेननुगमप्रसंगात् सामान्यतश्चातिप्रसंगात् उभयथाप्यसं
गततापत्तेः। विशेषस्य च भवतु स्वरूपमेव विशेषः तथाप्यभेदादेव विशेषसहितत्वेनास्तीत्यव्याप्तेरपरिहारात्तावत्तु काश्चिद
वोचत् विशेषशब्देन ते भिधीयन्ते यद्दर्शने भ्रमसंशयावकाशो यद्दर्शने च तौ न संभवस्यतः तदनभ्युपगमे तत्त्वातत्त्वव्यवस्थानस्या
त्राभवितव्यमस्तीति नेत्यन्यथा व्याघातादिति तदयुक्तं न तावदेवंविधो विशेषोभिधातुं शक्यो यदवगमस्य न भ्रमवादि संभवः। स्वप्न
दृशः सर्व्वविशेषोपलम्भसंभवात् न च व्याघातदंडभयमात्राद्सावुपपादयितुमशक्यो भ्युपगन्तव्य इत्युक्तं तदुपदर्शनाश
क्यत्वे न व्याघातपरिहार एवं कश्चिदन्यो निर्व्वक्तुमशक्यः। स्तीत्येवं किन्न तदाव्यवस्थाप्यते न हि परिदृश्यमानपदार्थगोचरं तद
स्ति किञ्चिदनुभूयमानं यत्स्वप्ने वा क्वाभासे वा प्रतिपत्तुमशक्यमिति प्रतिपन्ना तृट तया येयमप्रतीयमानकल्पना ततो वरमनु
लभ्यमानस्य व्याघातपरिहारस्यैव कल्पनायुक्ता भद्दीवृहशश्च व्याघातान्नावन विशेषिकामुन्मूलयिष्यामः। ननु न स्मो विशे
षणा सहोपलम्भो विशेषसहितोपलम्भः किन्नाम विशेषसहितस्य पदार्थस्योपलम्भो विशेषोपलम्भ इति तथा च नष्टुक्तो रजतत्व राम:
विशेषोस्ति तत्कथं रजतभ्रमेपि तत्त्वप्रसंग इति। मैवं उक्तदोषेणैव निरस्तत्वात् यदि हि विशेषस्य सामान्यतोभिधानं तदापुरो २६

सादोषापरिहारात्। सामान्यसंबंधकोटिनिविष्टत्वाद्विशेषस्य तस्य च तत्रानवस्थितस्यैव स्फुरणात्तत्र प्रदोषइतिचेत्। न
विशेषप्रतिभासे सामान्यतरतन्मात्रकत्वाप्रतिभासस्याप्यपेयत्वात्। देवदत्तजडदत्तसंबंधितासंशयेपि पुरुषसंबंधिता निश्च
यवत्तसंबंधिविशेषस्यानिर्लुठितविशेषरूपतया चप्रवेशोव्याघ्रादेरननुगमप्रसंगात्। सामान्यमानुमानाभासे च संवादिनिवि
शेषाभ्यवत्ताकल्पनानवकाशात् सामान्यसमवाययोरप्यस्यभेरेवप्रतिभासेन्यथाख्यातिविहायात्मख्यातिप्रवेशापातात्
तत्र सधर्म्मान्तरस्य ज्ञातात्तादात्म्यारोपस्तत्रेति चेत्। न। तथा धर्म्मिणि ज्ञाते च प्रमाचेतातद्वस्थ्यात्। संसर्गारोपनिमित्ताच्च
तादात्म्यारोपानुपपत्तेः। परार्थानुमानाभासे हि प्रतिपादितपदार्थसंसर्गारोपकारणसंभवात्। तथापि तत्रतादात्म्यारोपक
ल्पनेतथा भ्रमनियमस्य निःप्रमाणकत्वात्। केषांचित्तज्जातसंवादजातिसंसर्गभ्रमस्यामितौ का गतिः। कोवा गतिः सिद्धसा
धने। तत्राप्यव्यवच्छेदकनायां सिद्धत्वव्याघातात्। तथाचेवहेत्वाभासस्यापि यथार्थग्राहितयोक्तनिमित्तस्य व्यभिचारेणान्यत्रा
प्यभासेन्यप्रतिभासकल्पनायानिमित्तत्वात्। सिद्धसाधनमितरेवान्यव्यवच्छेदात्। यथार्थानुभवः प्रमेतस्य लक्षणं यथार्थ
त्वं हि तत्त्वविषयत्वं अर्थसदृशत्वं वा स्यात्। नाद्यः। पूर्वनिरस्तत्वात्। नापि द्वितीयः। व्यभिचारिणोपि प्रमेयत्वादिनार्थसादृ
श्येन प्रमात्वापातात्। ननु ज्ञानविषयीकृतेन रूपेण सादृश्यं विवक्षितमिदं न च प्रमेयत्वादि रूपस्य व्यभिचारिणापि
प्रकाशनसंभवेन तथात्वापातिप्रसंग इति वाच्यं प्रमेयत्वाद्यंशे प्रकाशमाने विषयीभूतधर्मान्तरापेक्षया व्यभिचारिणोपि
प्रमात्वाभ्युपगमादितिचेन्न। तद्युक्तौ प्रकाशमानेन रूपादिसमवायित्वेन रूपेण ज्ञानस्यार्थसादृश्याभ्युपगमेपि तत्र त
दीयप्रमात्वाङ्गीकारादिति। प्रकाशमानेन रूपेण विशेषणाभावादर्थसादृश्यमनुभवस्य विवक्षितं। मर्थस्य यथास

ख॰म॰ प्रमात्वापत्तेः। नापि तृतीयः। ज्ञानार्थभेदवादे सर्वप्रकारेण तत्साम्यानुपपत्तेः। अभेदवादे तु चैतन्यमपि तथाभ्युपगंतव्य
त्वप्रसंगेन विशेषणवैयर्थ्यप्रसंगात्। तैस्तैश्चविशेषैः सादृश्यस्याविवक्षितत्वे यथार्थत्वप्रसक्तावोक्तान्येव दूषणानि भाव
२१ त्वेतत इति। अविसंवाद्यनुभवः प्रमेत्यपि न। अविसंवादित्वं हि ज्ञानान्तरेण तथोल्लिख्यमानत्वं ज्ञानान्तरेण विपरीततया
ऽप्रतीयमानत्वं च ऽप्रतीयमानत्वं व्याप्यविषयत्वं वा अन्यदेव वा किंचित्। नाद्यः। धारावाहिकभ्रमप्रमात्वापातात्। न
च प्रमाभूतं ज्ञानान्तरमिति वाच्यं प्रमाया एव लक्ष्यमाणत्वात्। नापि द्वितीयः। अज्ञातबाधभ्रमव्यापनात् सुस्थदृशो
त्पन्नशुक्लःशंखज्ञानादेः। दुष्टेंद्रियदशोत्पन्नतत्पीतिमज्ञानाद्युल्लिखितविषयवैपरीत्यस्याप्रमात्वप्रसंगाच्च प्रतीत्यानुल्लि
ख्यमानार्थवैपरीत्याभावविवक्षायां तु प्रमाया एव लक्ष्यमाणत्वादित्युक्तमनुषज्जति। अदुष्टकरणकज्ञानेन बाधितत्वं
विवक्षितमिति चेत्। न। तदेव ज्ञानं हि प्रमालक्षणमस्तु। किंच दुष्टत्वनिरूपणमन्तरेणादुष्टत्वस्य दुर्निरूपत्वात्। ननु किमि
तावता दुष्टत्वं विपरीतज्ञानप्रयोजकत्वं तद्गतो विशेष इति स्ववचनमेवेति विपरीतपदव्यवच्छेद्याप्रतीतेः तदुपादान रामः
व्यर्थताप्रसंगात्। तदनुपादाने च ज्ञानजनकत्वमात्रं दुष्टत्वमिति दुष्टकारणजं ज्ञानं नास्त्येवेति स्यात्। विपरीतपद २१
व्यवच्छेद्याप्रमैवेति चेत्। न। तस्या एव लक्ष्यमाणत्वात्। तदीयस्वरूपस्येतरस्मादव्यावृत्तस्याद्याप्यप्रतीतेः कुतो व्यवच्छेदः
प्रत्येन व्यवहृत्तौ व्यवच्छिन्नतज्ज्ञानमंतरेण व्यवच्छिन्नमतत्तज्ज्ञानमशक्यमिति तस्मात्साश्रयान्योन्याश्रयोऽनवस्था
वा। एकोऽनेकविशेषेऽर्थे विशेषायत्तलक्षणे तत्तद्विशेषान्तरानज्ञाद्दोषस्तत्रैव धावति। नापि तृतीयः। व्याप्यशब्देन व्या

प्यमात्रं तद्विशेषो वा कपिदभिप्रेतः स्यात् आद्ये सद्धूमाग्निविषयस्य स्वप्नज्ञानस्यानाप्तवाक्यजबोधस्य
वा नाप्रमात्वं स्यात् नापि द्वितीयः सत्यर्थक्रियावा सामग्रीवा उभयथापि सर्वदोषानिवृत्तेः। एकदा च सर्वत्र प्रामाण्य
संभवेन क्रमाश्रयणे तत्तदर्थक्रियातत्तत्सामग्रीपरंपरपरावगमनियमाभ्युपगमे एकस्मिन्नेव विषये पुरुषायुषपर्य
वसानप्रसंगात्। विच्छेदाभ्युपगमे त्वंतिमावगमस्याप्रामाण्यापादात् प्रथमस्याप्रमात्वापत्तेर्न वास्तवतदर्थक्रियार्थनिरूपत्वे
न व्यवहारानर्हत्वात् तथाप्रतीतिमात्रस्य प्रमासाधारण्यात् न चैवं चतुर्थः पक्षोऽस्तु। यथाहि। अर्थक्रियाकारिविषयत्वमवि
संवादित्वमिति तथाहि प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिश्चाविसंवाद इति। सामान्यतो विवक्षायां ज्ञातावपि प्रसं
गात् अज्ञायमानरूपेणार्थक्रियाकारित्वमर्थस्य विवक्षितमिति चेत्। न। दुरवधारणत्वात्। तदर्थक्रियादर्शनात्तदवधार
णमिति चेत्। न। विनाप्यर्थक्रियां तद्दर्शनसंभवात् अर्थक्रियाप्रमितिरभिधित्सितेति तु दूषितमेव। प्रमायाएवं निरूप्यमाण(
त्वात्। अभिप्रायाविसंवादात्प्रमाणं सर्वमुच्यते इति चेत्। न। तदभिप्रायाविसंवादस्य स्वप्नादिभ्रमस्थलेपि संभवात् कालांतराऽवि
संवादस्य च दुरवधारणत्वात्। एतेन प्राप्त्यादियोग्यताविसंवादार्थ इत्यपि निरस्तं दुर्बोधत्वं च। अयं धर्मकीर्त्तेः पंथाः स्ववहितेन
भाव्यतीति। अबाधितानुभूतिः प्रमेत्यपि निरस्तं। तदानीं बाधविरहस्यातिप्रसंजकत्वात्। कालांतरेपि च बाधविरहस्य दुर्नि
रूपत्वात् स्वतो बाधादिविरहस्यातिप्रसंजकत्वात् सर्वजनबाधविरहस्य च दुरवधारणत्वादिति तर्कसंशयविपर्ययस्मृतिव्यतिरि
क्तानुभूतिः प्रमेत्यपि नास्मृतित्वे सति व्यतिरिक्तत्वखंडनन्यायेन निरस्तत्वादिति। जातिसंकरमिच्छतस्तु प्रमात्वलक्षणजात्यभिसंधाना

ख॰मू॰ त्वप्रमेत्यपि दुर्लक्षणं प्रसाज्ज्ञातसत्तद्व्यवहारजनकत्वेऽप्रमायामप्रमात्वभ्रमसंशययोर्न स्यातां दोषाभावसहकृतस्य तथा
२८ त्वेवाजायमानभ्रमसंशयप्रमादिव्यवहारे ज्ञानमात्रावगमोदाहरणेऽपि तद्व्यपत्तेः। ज्ञातेनानेन लक्षणेन व्यवहारेऽच कथ
मिव ज्ञातव्यमिति वक्तव्यं। न तावत्प्रत्यक्षेण मानसेन तथा सति किंचिज्ज्ञानायां प्रमायामप्रमात्वविपर्ययसंशयानवकाशा
त्। धर्मिवत् मनसैव निर्णीतत्वात्। चिज्ज्ञानस्य सापेक्षेण च मनसा संवेदनं चिन्हेन्नैवातनेनलक्षणेनाऽवश्यज्ञापनमित्यपि
प्याशामात्रं। तच्चिन्हेनैव प्रमात्वजातिकल्पनाप्रतिपक्षेपापत्तेः। तेषां च नानात्वे चक्कानितानीति वक्तव्यं स्यात् तद्विज्ञानां यथा
पुन्यासंसर्वेषामिव स्वपितत्वात्। प्रामाण्यपरतस्त्ववाद्यस्ति प्रस्तावे च विस्तरेणादूषयिष्यामः। एतेन शक्तिविशेषः प्रमात्वं त
द्योगः प्रमालक्षणमित्यपास्तं। दुरवधारणत्वात्। यच्चोक्तं किंचित्प्रमायालक्षणमुच्यते तद्ज्ञाने ज्ञानमात्रेण वा यदि तत्त्वव्यवहा
रकतद्दोषापत्तिः। प्रमितं चेत्प्रमानवधारणेन दुःखधारणतामावधारिवस्तुतस्त्वथेतिचेत्। न्नावस्तुतो न तथैव किं नेतिवादिन
नुत्तरापत्तेः प्रमात्वनिरूपणवैयर्थ्यापाताच्च वस्तुतः प्रमयैव घटाद्यव्यवहारोपपत्तेर्द्यास्त्विलास्तां विस्तरप्रसंगः। एवं प्रमितेरनि
रुक्तया प्रमाकरणं प्रमाणमित्ययुक्तं करणार्थानिरुक्तेश्च। ननु कारकांतरे चरितार्थस्य हेतुत्वं करणत्वं कर्हि हि किं करणं निष्पा
द्यतः कारकांतरे चरितार्थत्वं स्वरूपतो निष्पादनेऽपि व्यापारवत्तया निष्पादनात्। तादृशस्य चैतस्य करणत्वात्। एवं कर्मा राम
पि करणनिष्पादने चरितार्थकरणव्यापारो हि कर्मविषयो भवति। कर्माभावाद्विषयाभावात् करणव्यापार एव न निष्पद्यते इ २८

वर्त्तित्वादेः सत्वात्प्रसंगवारणाद्विशेषेणातदभिधानेत्वननुगम इति बाधा बाधव्यवस्थाहेतुरस्ति विशेष इति पक्षं यस्तु जडते
रान जहाति स आज्ञानाप्तवाक्याभ्यां नदीतीरे पञ्च फलानि संति तेिवं रूपाभ्यां प्रतिपाद्यमानेर्थे स्थितं किं विशेषमेकत्र पश्य
सियमपरत्र न पश्यसीति एव प्रतिबोधनीयः। तथाप्यनुपजातप्रबोधस्तु जडतमः कश्चिद्यदि स्यात् स एवं बोध्यः। येतेवि
शेषात्तस्य वाहस्वीकारेऽनंतविशेषापत्तिभयात्त्वयास्वतएव विशेषरूपा इति स्वीकृताः ते स्वरूपं तावत्परस्परव्यावृत्तमतो
ननुगतैकरूपाभावादव्यापकत्वं स्यादिति बाधव्यवस्थाहेतुत्वादेवानुगतिरिति चेत्। न। काचित्कबाधव्यवस्थाहेतो भेऽपि प्रका
शात् तत्रत्र तस्येति चेत्। न। व्यावृत्तेर्बाधस्य च तद्विपरीतार्थ क्रमात्वेन तदर्थानुगमात्। प्रमायाश्चाद्यप्यव्यवस्थायनादिति। श
ङ्कान्तराणि वा तत्तत्प्रमाणीयथार्थविशेषणदूषितदूषितान्येवोपनिपतन्तीति द्विरभिधानं भयान्नोक्तानीति। किंचित् कज्ञानमा
हार्यसंशयविपर्ययोपरिहस्यमानेऽप्येवं विशेषसंभवतीतरेतरतिप्रसंगः स्यात्। न चाहार्यैतेनाभ्युपगन्तव्या इति युक्तं विप्रलंभक
स्य वाक्यप्रयोगमूलनतया हार्यभ्रमस्य ज्ञातत्वस्य च गुरोः शिष्यस्य प्रबोधनार्थविचारं प्रवर्त्तयतः आहार्यसंशयानां भवत्त एव
त्वा शास्त्रेऽनुमतत्वात् परिच्छेद शब्दस्यानुभूतिपर्यायोऽनुभूतिदूषणानातिक्रामतीत्यलं। नाप्यव्यभिचार्यनुभवः प्रमेति युक्तं अव्य
भिचारिपदस्य यदि तत्त्वविषयायथार्थत्वं तदा दूषणान्युक्तान्यनुवर्त्तन्ते। अथैवमुच्यते अव्यभिचारित्वमर्थाविनाभूतत्वं तदा प्रष्टव्यं को
स्यार्थः। किं यद्यर्थस्तदैव ज्ञानं उत यत्रार्थस्तत्रैव देशे ज्ञानं अथ यादृगर्थस्तादृगेव ज्ञानं यत्तत्समिति रिति नाद्योऽतीतानागतार्थ
नुमितस्याप्रमापनात्। न द्वितीयः ज्ञानासमानदेशार्थप्रनीति नामव्यापनात्। ज्ञानसमानदेशमर्थमनारोपयतोऽप्यनुभवस

ख·म· हारम्भात्तत्त्वापार्यमनःप्रभृतिक्रियायांप्रसंगतादवस्थ्यात्‌अव्यापकत्वाच्च।अथतत्तत्क्रियाहेतुः तत्क्रियाकर्त्तृव्यापारस्यविषयस्तत्त
२९ क्रियाकरणमितिमन्यसे।मैवं।अनीश्वरवादेंऽकुरादीनामकरणकत्वप्रसंगात्।सुषुप्त्यनंतरभाविन्यान्प्रमायाःपरिगणितोपाधिभे
दपरिसंख्यातेषुप्रमाराशिषुवहिर्भावप्रसंगात्।अचेतनस्यापिकर्तृत्वेचातिप्रसंगात्।सेश्वरवादेत्वीश्वरव्यापारविषयःसर्वंकरणमि
तिनाऽकरणंकारणंस्यात्।तुमित्यभिधानेचाकारणमात्रव्यवच्छेद्यामितिकारणाकरणमित्येवोच्यतां।वृथाविशेषणापूरणप्रयासः।अ
थमन्यसेनधर्म्म्यंतरव्यवच्छेदायविशेषणानि।किंत्वेकस्यापिधर्म्मिणोरूपभेदेनकरणपदाभिधेयतायदर्शनायेति।एवंतर्ह्युतरूपालिं
गितस्यकरणत्वात्तल्लक्षणोक्तिप्रवृत्तेनदपालक्ष्यमात्रमुक्तंभवेत्।नचलक्ष्यपदप्रवृत्तिनिमित्तमेवलक्षणार्थः।गंधवत्त्वादेःपृथिव्या
द्यलक्षणापत्तेः।अपिचैवंवस्तुमात्रंकरणमित्यभिप्रायेवाकिंनकरणपदप्रवृत्तिनिमित्तमुपादर्शितं।स्यादेवंयदिसर्वत्रवस्तुनिकर
णव्यवहारःस्यादितिचेत्।तर्हितल्लक्षणमपिभवेत्यदिसर्वत्रकारणेकरणव्यवहारःस्यादित्यपिपश्य।नहिकर्त्तरिकर्म्मणिवा
कस्यचित्करणव्यवहारःकर्त्तरित्यवदास्तिलोकेप्रमाणमिहदेवदत्तइतिशास्त्रेपिमन्त्रायुर्वेदप्रमाणवत्तत्प्रमाणमप्रमाणमापादित्य
स्तीतिचेत्।नकिमयंमानवकेऽग्निव्यवहारइवगौणोमुख्यएवेतिसंशयेयदितत्परिकल्पितान्निमित्तात्मुख्यःस्यात्ततःकर्म्मण्यपिस्या
त्ततएवनिमित्तादितिबाधकदर्शनेनपारिशेष्यात्गौणत्वमेवतद्व्यवस्थापनायायुक्तत्वात्।अस्त्येवकर्म्मण्यपिनरूपेणेतिचेत्।नतावद्
दयेशकोपरस्पर्शनोदाहरणं।शास्त्रलोकयोः।चक्षुरेवपश्यतेघटंपश्यतीत्सर्थेघटेनपश्यतीति।यदित्तुत्क्वेचितमित्येवलंस्यात्।तत्रवचनोरदवि राम:
धानुमुत्सहामहेप्रमेयमात्रेकरणमितिवदतोवामुखुद्धिमनसिविपरिवर्त्तमानंप्रमेयमात्रएवकरणव्यवहारास्तित्वमेवमनुरोद्धुमस्या २९
दिति।वटेनघश्यतीत्यनभिधानवशात्प्रयोगनहिसर्वत्रलाक्षणिकंप्रयुज्यतइतिचेत्।मास्तुतदभावेकोन्योस्तितेषुकरणव्यवहारइतिव

त्तव्यं स्यात्। न चासौ शक्योपदर्शन इति। किं यया अयोगव्यवच्छेदेन संबंधिकरणमित्यपि न। तथा हि। अयोगव्यवच्छेदो योग एव पर्यवस्ये
दिति संबंधेन संबंधी तु कृतः स्यादिति पौनरुक्त्यापत्तेः संबंधी संबंधोत्तेनेन संबंधवत्तयाऽभिधीयते। ततो न संबंधिनोऽपि काले संबंधिताऽयोगव्यवच्छे
दपदेन विवक्षितेति चेत्। मैवं संबंधीत्यनेन कालविशेषनियतासंबंधिताभिहिता येन कालांतरेऽलब्धसंबंधिताभिधानाय पदांतरमुपादीयेत।
अथोच्यते संबंधीत्यस्य सामान्यतोऽभिधायिनः कालविशेषनियतसंबंधमादायापि पर्यवसानेन सार्थकत्वं भवत्येवेति कालांतरेऽसंबंधितया व्य
तिष्ठमानं कर्त्रपि करणं प्रसज्येत तद्व्यवच्छेदाय कालांतरे संबाधितापदांतरेणाभिधीयत इति। मैवं तर्हि तेनापि कश्चिदेव कालांतरे यदि
संबंधिताऽभिधीयते तदापि तस्य सार्थकता संबंधिपदस्यायेन सामान्याभिधायिनो भवेदिति तेनापि कालांतरेऽसंबंधव्यवच्छेदाय विशेषणां
तरमपि निवेशनीयं स्यात्। अथ पदाकाङ्क्षाविरहेऽपि योऽयोगस्तस्य सर्वस्य व्यवच्छेदो विवक्षित इति। तर्हि संबंधिपद एवैषा विवक्षास्तु कृत
मधिकमुपादायेत द्विवक्षया निषेधव्यवच्छेदेन सार्थकत्वलाभ इति चेत्। न। निषेधव्यवच्छेदस्याविधेयानतिरेकार्थत्वेनाविशेषात् तद्धर्मि
कं संबंधस्यासंबंधासामानाधिकरण्यमयोगव्यवच्छेदेनोच्यत इति चेत्। न तस्यापि सत्त्वकालेऽन्यत्रासत्त्वोपगमात्। सर्वदेति चेत्। न यद्येवं तत्
त्किं करणसत्त्वकालेऽपि योग एवं करणं न क्रियायाः। यावत्सत्त्वमिति चेत्। तर्हि संबंधीत्यर्थ यावत्सत्त्वमयोगव्यवच्छेदेन यद्विवक्षितं तदुप
लक्षितं वा तत्करणमित्येवास्तु संबंधीत्येव वा तथा विवक्षितमित्युक्तमेव। अयमेवार्थः कयापि कुस[illegible]प्युसंबंधिपदसार्थकत्वायो
पपाद्य यदि विवक्षितस्तदाप्युच्यते। कर्तृकोदयक्रियायां रोहिण्यासत्तिरप्येवं करणं स्यात्। अनंतरभावि नक्षत्रदर्शनेन तस्यो
दयप्रतिपूर्वभावि चिह्नं दृशः संख्यानप्रत्यासत्तिमत्त्वस्य च करणत्वं स्यात्। न चैवमेव युक्तं यौगपद्येन करणत्वानुपपत्त्या कारकत्वसहर
निरस्तत्वेन करणत्वस्य संभावनानारोहात्। न च तत्र संबंध एव नास्ति। व्याप्तेः स्वभावसंबंधात्मिकाया दुरपह्नवत्वात्। अथ कार्यकार
णभावः संबंधो विवक्षितः। न। सामग्र्याः करणत्वापत्तेरिति चेत्। तत्किमेतमित्यभिधाय्येव निर्वृतो भवान्। आकलितं किलास्माभिः सामग्र्य

ख·मू· पिकरणमित्यत्राश्रद्दधतः पुणवर्द्धकिकांश्रुतिमेवकांचित्पठित्वाश्रद्धापयिष्यति भवानस्मानिति। नसामग्रीकरणं किंतुतदेकदेशोनानाभूतः प्र
३० त्येकंतथासामग्रीतुयदनंतरंकार्यंभवत्येवेसेतावन्मात्ररूपेतिचेत्। नाएतादृशस्यसामग्रीलक्षणस्यकरणेपिसत्वात्। करणस्यापिसामग्रीत्वाप
त्तात्। क्रियायाविभागादेश्चविभागस्यसंयोगनाशादिप्रतितथात्वापत्तेः। यच्चप्रतिसामग्र्येकदेशंनियतप्राग्भावादिकारणलक्षणमिष्यतेतत्सा
मग्र्यामपीतिकथंतदकारणता। प्राक्कालमनंतर्भाव्यसामग्रीतादृश्याश्चतस्याः प्राक्सत्वमेवनास्तीतिचेत्। ततएवप्राक्कालसाकारणत्वा
कारणसामग्र्यांतरनिवेशात्। अपिचैवंविवक्षितमपिकरणंनस्यात्। नहियावत्सत्वंव्यापारवत्तापितस्यक्रियाजनकत्वं। क्रियाऽकालेक्षणम
पितत्तुवृत्तिनिषेधेप्रमाणस्यदुरुपन्यासत्वात्संशयेनापिलक्षणासिद्धेः प्रकृतचिरस्थिरकरसंयोगस्यक्षेपस्यस्पर्शप्रमाकरणस्यस्पर्शनेंद्रियसं
गस्थैर्यस्यमंतुमुचितत्वात्। यावत्सत्वंचकरणत्वमितिभाषायांसर्वस्मिन्नतत्सकालेकारणत्वमित्यर्थः। नचकारणत्वस्यनियतपूर्वकालसत्वं
धात्मकस्यकश्चित्कालेसत्वं। कालेप्रतिकालोतत्संभवादिति। अथक्रिययाअयोगव्यवच्छेदेनसंबंधीत्यस्यायमर्थोयस्मिन्सतिभवत्ये
वक्रियेति। कोऽस्यार्थः। किंयस्मादनंतरंक्रियोत्पद्यतएव। उभयस्मिन्वर्तमानेक्रियोत्पद्यतएव। उतयस्मादनंतरंक्रियातिष्ठत्येव। उभ
यस्मिन्वर्तमानेक्रियातिष्ठत्येव। नाद्यः सामग्र्याः करणत्वप्रसंगात्। हस्तादीनामकरणत्वप्रसंगाच्चसुखदुःखादेःप्रमेयस्यापिप्रमा
करणत्वप्रसंगाच्च। नचप्रमेयमपिप्रमायाःकरणंस्यादेवेतिवाच्यं। तत्रतथाव्यवहारस्यकस्यचिदप्यसिद्धेः। नापिद्वितीयस्तृतीयेनसह
स्थिरसंयोगस्पर्शनेंद्रियस्याव्यापनात्। तत्सत्वेपिव्यासक्तेनप्रमानुत्पादनात्। नापितृतीयः सामग्र्यादेःकरणत्वप्रसंगात्। उ ३०
त्तेजः स्थिरेकरणत्वप्रसंगाच्च। नापिचतुर्थः सहस्थानांकरणत्वप्रसंगात्। अथक्रिययाऽयोगव्यवच्छेदेनसंबंधित्वंकरणत्वमित्यस्या
यमर्थः व्यापारवतःफलाव्यभिचारित्वमितिचेन्न। हस्ताद्यव्यापनात्। कश्चायंतद्व्यापारोनामकिंतत्कृन्येकारणंउततदाश्रयःकार
ह

तितन्निर्वाहेतस्यापिचरितार्थत्वमिति एवमधिकरणस्यापिकरणव्यापारनिर्वाहकत्वसंप्रदानायादानयोश्चासार्वत्रिकत्वकार
णं सार्वत्रिकमेवेति कारकांतरेऽचरितार्थः सार्वत्रिको हेतुः करणमिति मेवं । अस्तु तावदविचारितरमणीयमिदं व्याख्यानं । अं
तरशब्दो यदि विशेषमात्रवचनस्तदानन्यवच्छेदकः । नहि विशेषमपास्य कारकमात्रेकेन क्विचिज्जन्यते यद्व्यवच्छिद्येत । नापि चांतरश
ब्दोऽन्यवचनः तथासति कस्मादन्यदिति विशेषानिर्देशे करणादिति समभिव्याहाराल्लभ्यते यथान्य आत्मा शरीरमन्यदित्यादौ तथासति
करणव्यतिरिक्तकारकाभिप्रायेण प्रयुक्तः स्यात्तन्नु नकरणस्यैवाद्यापि निरूप्यमाणत्वादतिव्याप्तेश्चानापि कर्तृकर्मणोः स्वरू
पोपादानपरोयमंतरशब्दः ताभ्यामेवातिव्याप्त्यापत्तेः । नापि कर्तृकर्मणी अपेक्षान्यदंतरशब्दार्थः वैयर्थ्यापातात् । कारकेऽचरि
तार्थत्वं हलेवोच्यते । नाप्यनधिकार्थ एवायमिति नुप्रयोक्तव्योऽन्तरशब्दः तथासति कारकजनकं हस्तादिनकरणं स्यात् । व्या
पारवद्धि कारणं कारकमुच्यते । अस्ति च स्थालीसंयोगादिव्यापारवतोऽस्मादेस्तथात्वं अस्ति च हस्तादेस्तज्जनकत्वं । नच हस्ताद्य
करणमेवाभ्युपेयं व्यापारवतः करणत्वेन तत्कारकत्वस्यावश्याभ्युपेयत्वात् कर्त्रादिष्वंतर्भावत्वात् सप्तमकारकस्वीकारापत्तेः ।
नचेयमवधानान्नवा हेतुत्वमेव तेषां किं त्वात्महेतुत्वमिति । कर्तुरप्येवं प्रसंगात् । पुव्यापारादेहस्पंदादितः कुठारक्रियादिस्ततो भिदे दि ४
तिपरंपराव्यवधानात् । ततश्चेयं कर्तृव्यापारपरंपरा तत्र स्वहेतुता हंतीति चेत् । तुल्यं तत्स्मात्करणत्वेनावश्याभ्युपगंतव्यं हस्ताद्यव्याप
कत्वादलक्षणमिदं । एतेनापि कारकांतरशब्दः कर्तृकर्मव्यतिरिक्तवचनं इति पक्षोऽप्यपास्तः । कर्तृव्यापारविषयः करणमित्यपि न ।
शरीरस्य ज्ञानाय प्रयतमानस्य निष्पाद्या शरीराक्रियाविशिष्टं वा शरीरं प्रयत्नलक्षणा कर्तृव्यापारविषयी भवतीति तस्यां क्रियायां करणं
स्यात् । नचैतत्शक्यांगीकारं भविष्यतः स्वं प्रतिचकारकत्वानुपपत्तेः नच साक्षात्कर्तृव्यापारविषय इति विशेषणोपादानेप्यस्य परि

ख॰ मु॰ ता। तथा च बाधो द्वैतस्य साम्या किं द्वैतस्य दपि बाध्यतां। एकमद्वैतमुमुक्षूणामनिर्वचनवादिनां। तथा हि मिथिलानाथो मुमु
क्षुर्निर्ममः पुरा। आह हि दे मिथिला दाहे न मे किंचन दह्यते इति। नापि द्वितीयः। लिंगपरामर्शस्यानुमितिं प्रति करणत्वप्रसंगा
३१ त्। निर्विकल्पकस्यापि तत्सोपगमे सविकल्पकानाश्रयत्वात्। अतद्द्वित्वाश्रयस्य तद्द्वित्वव्यापारत्वे चातिप्रसक्तेः। किंच फलाव्य
भिचारित्वं किं तस्मिन्नेव काले फलसत्त्वनियमः। उत तदनंतरं फलसत्त्वनियमः। नाद्यः। कारणस्य पूर्वभाविताया अवश्यवक्त
व्यत्वात्। न द्वितीयः। आनंतर्यपदस्याव्यवहितानंतर्यविवक्षितेत्तदा यत्किंचिद्व्यापारवतः करणत्वप्रसंगे हस्तादेरकरणत्वापत्तेः।
अफलव्यापारवत्त्वात्तथात्वे कर्त्रा(दि)व्याप्तिः। अथाव्यवहितस्याप्यानंतर्यं विवक्षितं तथापि यत्किंचिद्व्यापाराभिप्रायेण तत्प्रसं
भवाद्व्यक्ता ह्यत्र फलव्यापाराभिप्रायेणाव्यवधानासंभवात्कारकमात्रेकरणमितिप्रसक्तेः स्यात्। व्यापारवतश्च फलाव्यभिचार इ
ति किं। तद्व्यापारस्य फलाव्यभिचारित्वं। व्यापारविशिष्टस्य वा नाद्यः। हस्तादेरकरणत्वापातात्। अत एव न द्वितीयः। यागादेः स्वर्गा
द्यकरणत्वापाताच्च। अपूर्वद्वारकत्वात् अथवादिना पि चरमयागस्य फलकरणत्वाभ्युपगमादिति। अथोच्यते यद्वाने च करोतीति तत्कर
णं यद्वा नेव प्रमिमीते तत्प्रमाणमेवं। आत्मधर्मप्रध्वंसादीनामकरणानामपि प्रमाणत्वप्रसंगात्। येन क्रियाकारणेन यु रामः
क्त एव प्रमिमीते चिंतितेत्। सुखादिप्रसृतौ करणव्यापारस्यापि करणत्वप्रसंगात्। उं मितिं चितं। अव्यापारतया कारकत्वेन तत्
द्विशेषकरणभावानुपपत्तेः। व्यापारवत्त्वा पीति चेत्। न। एवं हि व्यापारवत एव करणत्वं न स्यात्। न हि व्यापारवतस्तस्य व्यापारा ३१
न्तरवत्त्वमस्ति। अथ व्यापारवतो व्यापारांशमपहाय कारकत्वं तच्चास्त्येवेदं लक्षणीयस्य करणत्वमस्तीति स व्यापारवत्त्वमप्यस्ती
ति व्यापारवत्कारणं करणमुच्यत इति। न। पदस्य सुघम्यनिपातस्य चप्रज्ञात्वे यतः सकर्मविहिकरणं स्यात्। किंच किं तस्य करणत्वमिति

लक्षीभूतस्यावश्यंवक्तव्यत्वात्। पृथक्लक्षणवत्वमेवतत्स्यात्तदा आत्माश्रयापातः स्यात्स्वरूपमेवेति चेत्। न। स्वरूप
स्यप्रतिकरणंभिन्नतयाएकपरित्यागेनापरत्रलक्षणंगतमितिअतिव्यापकंस्यात् नहिचक्षुःस्वरूपंश्रोत्रस्येति। किंचैवमि
न्द्रियादेःप्रमाणत्वं न स्यात्। अतद्धेतोऽप्यनुमात्रादेःप्रमातृत्वात्। नासौप्रत्यक्षप्रमेतिचेत्। नेदमपिहिप्रत्यक्षमात्रलक्षणंभव
ता क्रियते। ननु यद्यपीन्द्रियादेर्विशेषतोऽव्याप्तिस्तथापितज्जातीयमात्रस्याव्याप्तिरेव। नेन्द्रियत्वमित्यादावण्यकरणजातीयवान्
प्रमिमीतइति। न। करणतयासाधारणभावस्याद्यापिनिर्वक्तुमशक्यत्वात्। अथयांप्रमांयद्वानेवजनयतितत्सातत्कारणं।
मेवं। कोपीनाच्छादनादेरपिकरणत्वप्रसंगात् यज्जातिकामितिचेत्। मेवापरोक्षत्वजातीयांप्रमांलिंगवानेवशब्दवानेवजनु
यतीतिनियमाभावात्तस्याकरणत्वप्रसंगात्। साक्षात्कारित्वानुमितित्वादयोजातिभेदाविवक्षिता इतिचेत्। न। प्रत्येकमुपादाने
भागाव्याप्तेःसंभूयोपादानेसर्वाव्याप्तेः अनियमेनोपादानेचलक्षणाननुगमापत्तादिति। यद्भावोकर्तृकेमणीक्रियांनजन
यतस्तत्करणंतेनयद्भावात्प्रमातृप्रमेयंनप्रमांनजनयतस्तत्प्रमाणमित्यपिलक्षणंनयुक्तं। किंप्रमातृप्रमेयेप्रसतीय
ज्जनयतःउतासतीअपि। आद्ये। अतीतानागतानुमानादिकरणाव्याप्तिः। नापिद्वितीयः। प्रमातृप्रमेययोरपिप्रसंगात्।
यथाहितत्रचक्षुराद्यभावात्प्रमानजायतेतथाप्रमातृप्रमेययोरप्यभावात्। अन्यथातयोःकारणत्वमेवनस्यात्। एतेन
सामान्यतोऽभिधानेप्रत्यक्षं। अस्मदादिकर्तृसापेक्षईश्वरकर्तृकेचास्मदादिज्ञानेस्मदादिकर्तृकरणतापत्तेः। एवंचसति
प्रकारभेदेनापिप्रमाणप्रमात्रादिष्ववस्थासमर्थनाहृतानस्यात्। येनैवरूपेणकर्तृत्वादिनीतसप्रमायामन्वयःतेनैवतद्व्य
तिरिकस्यप्रमाबलत्तेःप्रयोजकत्वादिति। चरमव्यापारवत्वंकरणत्वमित्यपितन्न। व्यापाराभावात्लिंगपरामर्शस्याकरणत्वा

नु

ख·म्र पात्। न च सविकल्पकव्यापारवतो निर्विकल्पस्य तत्र प्रामाण्यं केवलविकल्पनीयलिंगविषये तदनुपपत्तेः। संस्कारादिपर्युता
नुसरणे चानुमितेस्तज्ञमतिप्रमाणाभावात् कार्याहेतोर्मेश्वकारकोव्यापारत्वात्। अपि चान्तुतकरणत्वापातात्। न च लिंगमे
३२ वपरामर्शव्यापारवत्तयाकरणमितियुक्तं। अनुमितानुमानादौ परामर्शस्यालिंगजन्यत्वेन तद्व्यापारत्वानुपपत्तेः। आप्तो
क्त्यादिभिस्तत्रासीद्धूम इति प्रतीतस्तदा तत्र वह्निरप्यासीदिति यदनुमानं तत्रासत्वाद्धूमस्य परामर्शानूपव्यापारवत्तयाक
रणतायाहूरतिरस्तत्वाच्चा। किंच यत्किंचिदपेक्षयाचरमव्यापारवत्वस्य सर्वकारकसाधारणात् सर्वकारकापेक्षयाचरमव्या
पारवत्वस्य स्वापेक्षया चरमत्वानुपपन्नासर्वत्रासिद्धेः। कर्त्रपेक्षयेतिचेत्। न कर्तृधर्मिमात्रापेक्षया विवक्षितत्वे कर्तरि
संगतादवस्थात्। व्यापारवकर्त्रपेक्षाभिप्रायेवकर्तरि स एव प्रसंगः। एकव्यापारवत्कर्त्रपेक्षयापरकर्तृव्यापारस्य चर
मभावित्वात्। यावद्व्यापारवकर्त्रपेक्षापक्षेतु विवक्षितमपि करणं न स्यात्। आफलसिद्धेः कर्तृव्यापाराविरामात्। व्यापार
स्यविच्छेदे तद्धुत्वलक्षणाद्वीणातापत्तेः। यद्व्यापारानन्तरं कारकान्तरं न व्याप्रियते तच्चरमव्यापारत्वमिष्टमितिचेत्। न से
श्वरपक्षे कर्तृव्यापाराविरामात्। तदानंतर्यासिद्धेः स्तकरणत्वापातात्। अनीश्वरपक्षे चान्तयोगादिभिरेव सव्यापारेक
र्मण्यपिप्रसंगात्। छेद्यादेर्हि किरेशसंयोगादिव्यापारश्चरम एवेति कुतस्तद्यवच्छेदः हस्ताद्यव्याप्रियेश्चेति। अनंतरफलं
करणमित्यपि न। अविशेषितानन्तर्यस्य सर्वकारकसाधारणात्। अव्यवहितानन्तर्यस्य च व्यापायपेक्षस्य यागाद्यव्याप राम॰
नात्। व्यापारापेक्षस्य हस्ताद्यव्यापनात्। व्यापारपरंपरापेक्षस्य सर्वकारकव्यापनाच्च। किंच। तत्कार्यो यदि क्रियाहेतु ३२
स्तद्व्यापार इष्यते तदेंद्रिय कार्यलिंगपरामर्शोऽनुमितिक्रियाहेतुरितींद्रियकरणिकानुमितिः प्राप्ता। अथ हेतोः सतः का

णां नाद्यः। लिंगपरामर्शे तदसंभवात्। पक्षे प्रथमधूमादिदर्शनस्य व्याप्तिस्मृतिद्वारा द्वितीयलिंगपरामर्शव्यापारं जनयतः कर
णत्वमिष्टमेव। एवं च परमार्थतो व्याप्यस्य स्वरूपेण प्रमितिर्द्वितीयमाद्यं तत्परामर्शव्यापारिकानुमानमिष्यत इति चेत्। अमतो
ज्ञानाग्निधूमादिव्याप्तिस्मृतौ सत्यां पक्षगतप्रथमधूमादिदर्शनस्य तद्व्यापारकत्वासिद्धेः। तत्राप्यन्वयकर्मसंयोगवत्तत्तद
पि कारणमिति चेत्। न। अभावादिसापेक्षत्वविशिष्टप्रतिपत्तिवत्प्रागुत्पन्नज्ञातवह्निव्याप्तधूमस्य ततः प्रथममपि योऽसौ वह्निव्याप्तः सोऽयं
धूम इति परामर्शोपपत्तेः। निरपेक्षेऽर्थस्य तथा नान्यत्र प्रथमं तथेति चेत्। न। प्राक्कारणोपपत्तेः। नान्यत्रैव मितिनियमेन प्र
माणस्याभावात्। तस्य व्यापाराभावान्नानुमित्युत्पादकत्वमेवेति चेत्। स्यादप्येवं यदि व्यापारवतः करणत्वमिति वसिद्धं स्यात्।
तत्र धूमादिनिर्विकल्पकस्य तद्व्यापारस्य करणत्वमिति चेत्। न। नित्यसंघटितार्थबुद्धिनापि निर्विकल्पकं सविकल्पकौ
त्पत्तेरविरोधेन तद्वदुक्तप्रक्रियानियमे प्रमाणाभावात्। नित्यसंघटितेऽपि निर्विकल्पकमपि मस्येत इति चेत्। नाकारणता तदा
वतदुपपत्तौ तत्र निर्विकल्पककल्पनायां प्रमाणाभावात्। प्रकृततत्संघटनस्य स्वभावानतिरेकोपगमात्। तथापि यत्किंचित्तज्जनक
त्वेवत्तत्रानुमितिकरणमास्तामिति चेत्। नान्तर्थेंद्रियादेरनुमितिकरणत्वापत्तेरित्यलमतिप्रसंगेनेति। शब्दश्रोत्रसंनिकर्षस्य
च श्रोत्रव्यापारत्वप्रसंगात्। अन्यथा श्रोत्रस्य शब्दप्रतिपत्त्यावकरणत्वप्रसंगात्। संनिकर्षादीन्द्रियव्यापार उच्यत इति। व्यापारांत
रं च तस्य क्षणिकमसिद्धं स्थिरे चोक्त एव दोषः। शब्द एव तद्व्यापारः किं न स्यादिति चेत्। न। तस्य कर्मत्वेन करणकोटिबहिर्भावात्।
कश्चित्तु योरेकत्वेपिकारत्वेति रितिचेत्। नाशाब्दबुद्धौ कार्योपायमुपधायकत्वेन प्रविष्टस्य करणव्यापारतया करणकोटावपि प्र न
वेशनेशतो नियम्यनियामकत्वविरोधापत्तेः। घटादिबुद्धौ चक्षुर्घटादिसंसर्गव्यापारकत्वेपि सममिदमिति चेत्। किं न स्या

र्यः क्रियाहेतुस्तद्व्यापारस्तथासति चानुमित्यहेतोरिंद्रियस्य कुतः करणत्वं स्यादिति मैवं। किंहेतुत्वं यन्नास्त्यनुमिता
विंद्रियस्य नियतपूर्वभावित्वमिति चेत्। अस्ति तावत्स्वभावित्वं नियतत्वमपि यदि कारणतायां प्रयोजकमिच्छसि तदा भव
तेव्यतितस्यं केनचिद्रूपेणेंद्रियादेर्नियतत्वप्रतीति। अन्यथा लिंगेंद्रियादेः परस्परव्यभिचारादकरणिकेव प्रमा स्यात्। मनः
संयोगादेरेव तथात्वे चाप्रमासाधारण्यं। अपि चाज्ञादेरकरणत्वापातः। यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषस्यैव तत्
द्विशेषप्रयोजकत्वनियमदर्शनात्। ततो येन केनापि रूपेणेंद्रियस्य प्रमायां नियतत्वमुपपाद्यते नैव रूपेण प्रसंगापपत्तिः। अ
थप्रमात्वे तत्प्रयोजकं न त्वनुमितित्वादाविति चेन्न। निरुपाधित्वाविशेषे उक्तार्थानाधिक्यात् सामान्यप्रयोजकत्वे न विशेष
सागानवकाशादिति। अन्यथा व्यक्तेरकारणत्वापत्तेः। अस्मन्मते तु यद्वा तद्वा करणं प्रमाविवक्षितजातिविशेषव्यवस्थापकं प्रमा
णं च तथाः खल्विमाः प्रमत्वादिप्रमितयो भिन्नबुद्धिव्यपदेशभाजः। न च प्रमाताप्रमेयं वा तद्भेदव्यपदेशहेतुः प्रमाणं निश्चय
था यथ च तस्य साधारणानीति भिन्नबुद्धिव्यपदेशनिबंधनानीति। मैवं। विवक्षिते पदे तावल्लक्षणे भांडालेख्यास्विव पुरुष
ज्ञानामनियतत्वात्। अर्थजत्वस्य साक्षात्कारित्वप्रतीन्द्रियजत्वाविशिष्टतयार्थस्यापि करणत्वप्रसंगात्। आप्तोक्तौ कर्तुर
पि शाब्दप्रमाजातिविशेषकत्वेनातिप्रसंगात्। उपमितस्त्वेवं पूर्वमेवोक्तमिति विवक्षितजातिभेदोपधायकत्वेन प्रमितसमवायिकारणविशे
षकं प्रमाणमित्यप्यत एव प्रत्युक्तमिति प्रमाकरणं निरुक्तरूपेण निरएवं विशेषतोपि प्रमाणलक्षणानि प्रतिक्षिप्तानि। तथाहि।
प्रत्यक्षमिंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीत्याहुः। किमर्थमिदमुच्यते। किं सजातीयविजातीयव्यवच्छिन्नतत्प्रतीत्यर्थं उत
साक्षात्कारत्वप्रतीतये तच्चिह्नोपदर्शनमिदं। उत व्यवहारार्थं। उत प्रमत्वादिशब्दप्रवृत्तिनिमित्तावधारणार्थं। उतान्यत्किंचिदर्थं वा। तत्र ना

ख·मू घः तथाहि। किं सजातीयेति प्रत्यक्षत्वेन साजात्यमपेक्षितं तदुपात्तेरेण वा नाद्यः। तस्याप्यवच्छेदकत्वे सजातीयाद्व्यावृत्तत्वेऽप्यव
३३ च्छेदकत्वानुपपत्त्याव्यावृत्तत्वस्वीकारेणाव्यापकत्वात्। नापि द्वितीयः। विजातीयपदोपादानवैयर्थ्यात् स्वाश्रयविहितप्रमेयत्वादिना
सर्वसाजात्यात्। अथ प्रमाणत्वादिना विशेषेण साजात्यं विवक्षितमिदमुच्यते। तर्हि लक्ष्यस्यापि प्रमाणत्वेन साजात्याद्व्यवच्छेद्य
कोटिप्रविष्टतया संग्राह्याभावप्रसंगः। लक्ष्यस्य यत्प्रमाणत्वादिभिः सजातीये तद्व्यवच्छेद्यं न च लक्ष्यस्यापि लक्ष्यं सजातीयं
पक्षस्पर्शस्य भेदस्य व्यवस्थितत्वादिति चेत्। एवं तर्हि लक्ष्यापेक्षया भिन्नोऽप्यवच्छेद्य इत्येवोच्यतां कृतं प्रमाणत्वादिना साजात्येन प्र
कृतानुपयोगिना वनितेना। यदा च लक्ष्यादन्यत्वं परेषामवगतं तदा परस्मादन्यत्वमपि लक्ष्यस्यार्थादवगम्यत इति सिद्ध
मग्रत एव लक्षणप्रयोजनमिति विषयथ्यमेवस्याल्लक्षणाख्यानस्येति। अस्तु वा विवक्षावैचित्रीवशात्कथमपीदृशमभिधा
नं तथापि न तावद्वेदनेन लक्षणे नानवगते न व्यवच्छिन्नप्रतीतिप्रसंगात्। नापि ज्ञातेन दुरवधारणत्वात्। तथाहि न तावदि
न्द्रियार्थसन्निकर्षोत्पत्तिः प्रत्यक्षाप्रत्यक्षविशेषणत्वात्। नापि कार्येण लिंगेन तत्तदनुपपत्त्या वा तदवगमः। ताभ्यां सामान्यतः
कारणमात्रात्मरूपेण कारणगतानुगततद्रूपासिद्धावेकरूपलक्षणासिद्धेः कार्यस्यैकजात्यादेकजातीयकारणसिद्धिरि
ति चेत्। न हि कार्यगतैकजात्यस्य पूर्वमवश्यप्रत्येतव्याङ्गीकारे तत एव सजातीयविजातीयव्यवच्छेदप्रतिपत्तिरस्तु कृत
मतया पारंपर्येण कुदृष्ट्या। न चैतावतापि न प्रकृतलक्षणखण्डनं भवत्यतिव्याप्तेरव्याप्तेर्वोऽनुद्भावनात्। मैवं। प्रथमभावित रामः
यावश्यानुष्ठेयतया चलघोऽनुपायात्तत्साध्यसिद्धेर्भवत्येव च रमभावितयावश्यानुष्ठेयत्वाभावे न च गुरावुपायेप्र ३३
वर्त्तमानस्य न वेदनेऽदोषो ह्यावन्ने प्रदीपप्रदीपप्रज्वाल्यतमोनिरासाय यतमानस्येव पुंसः। न हि तत्र प्रदीपान्तरस्यक

स्व·म· प्रत्यक्षत्वेन प्रमाणता प्रसज्येत। अथार्थव्यतिरिक्त इति विशेषणं प्रक्षिपसि आत्मविषयस्य तदान्यविषयस्य प्रत्यक्षता
३५ न स्यात्। तद्व्यवच्छेदेनानुगतार्थाभिधाने व्यवच्छेदकत्वाभावात् घटज्ञानस्य च परे प्रत्यक्षतया प्रामाण्यं प्रसज्येत। एतेनेन्द्रिया
र्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि प्रत्यक्षमित्यत्रापि दोषो यस्तूक्तो द्रष्टव्यः। तादृशस्यापि ज्ञानस्य विषयान्तरे प्रत्यक्षत्वेन प्रमा
णप्रसंगात्। यस्यार्थस्य सन्निकर्षादुत्पद्यते तत्तत्र प्रत्यक्षतया प्रमाणमित्यभिधाने तु पक्षवृक्षसाक्षरणासाधारणार्थातिप्र
न विकल्पोक्तदोषप्रसंगः। अव्यभिचारिपदं च व्यर्थं। नहि शुक्तौ रजतज्ञानं रजतत्वेन्द्रियसन्निकर्षादुत्पन्नं। संस्कारलक्षणप्रत्यास
त्ती रजतत्वेऽप्यस्तीति चेत्। न। रजतत्ववैशिष्ट्यपुरोवर्त्तिनस्तदभावात्। तस्मिन्नेवांशे प्रामाण्ये न तु रजतत्वमात्रे तस्यान्यत्र सत्त्वात्।
अथ साक्षात्कारित्वं प्रत्यक्षलक्षणमुच्यते। तदा साक्षात्कारिविभ्रमेऽपि प्रसंगः। अव्यभिचारित्वेन विशेषितं तल्लक्षणमिति चेदिदाय
द्व्यतिरिक्तविभ्रमाभावो वेत्ति चेत्। न। विकल्पासहत्वात्। किमवगतमिदं लक्षणं फले हेतुः। अनवगतं वा। न तावच्चरमः। तदभिधा
नवैयर्थ्यप्रसंगात्। अभिधानस्य ज्ञानोत्पादोपयोगित्वात् तत्तस्यानवगतस्यैव फलसाधकत्वाभ्युपगमात्। आद्ये किमन्यस्मा
त्स्वगमः। उत त्वदीयाल्लक्षणवाक्यात्। यद्यन्यस्मात् तदा तमनुना लक्षणाभिधानप्रयासेन अभिधानस्य ज्ञानोत्पादातिरिक्तप्रयो
जनाभावात् तस्य चान्यत एव सिद्धेः। अथ किमपि दं त्वदभिधानमाप्तोपदेशतया साक्षात्कारित्वं बोधयति। उत लिंगादिभावेन।
न तावच्चरमः। त्वद्वचनस्य साक्षात्कारित्वाविनाभाव्यमदर्शयितुमशक्यत्वात्। नापि प्रथमः। वादिनं प्रति भवत आप्तत्वासिद्धेः। सि रामः
द्धौ हि प्रतिज्ञामात्रादेव साध्यसिद्धेर्हेत्वाद्यभिधानमनर्थकं सर्वत्र स्यात्। अथ मन्यसे यः साक्षात्कारित्वमन्यतो जानाति विशेषतो न जा ३५
नाति तं प्रति प्रत्यक्षव्यवहारनिदानतया च न जानाति तं प्रति प्रत्यक्षव्यवहारमिदानीं च मया ज्ञाप्यते लक्षणवादिना तच्चानुमानभावेनै

श्चिद्धीपदोषः किंतु तथाकारी पुरुष एव पर्यनुयोज्यः। सर्वसाधनसाधारणो वायं दोषो। यत्तं भवदेवं विधलघूपायत्वं
नाम स्वरूपासिद्धिरिव सर्वप्रमाणानां। तस्मान्मा भूदतिव्याप्त्यादिदोषैः सामान्यदोषादेवेदं दुष्टं लक्षणमिति। एतेन द्विती
योपि निरस्तः। साक्षात्कारित्वावगममन्तरेण तदवगमानुपपत्तेः। तदवगमाच्च स्वप्रतीतावन्योन्याश्रयत्वप्रसंगः। अस्तु वानु
दपि किंचिदिन्द्रियजत्वे लिंगं तथापि तद्व साक्षात्कारित्वाविनाभूततया प्रसक्तमनुपन्यस्तं सन्निहितप्रतिपत्तिकत्वात्। न तदव्य
व्यापके वक्तव्यं लिंगत्वस्य तद्व्याप्यत्वेनैवोपपत्तेरिति चेत्। न यत्र लिंगमव्यापकत्वान्नास्ति तत्रेन्द्रियजन्यत्वस्य प्रमाणाभावात्तस्य
तितुमशक्यत्वेन कथं ततः साक्षात्कारित्वावगमः। यदा चक्षुश्चित्रसदृजातीयस्य प्रमाणाभावादिन्द्रियजत्वमनवधारणीयं
तथा साक्षात्कारित्वव्यापकतानवगतमपि लक्षणं तदा किमपराद्धं लिंगान्तरेणाव्यापकेन। अथ यत्र तदिन्द्रियजत्वे लिंगं ना
स्ति तत्र लिंगान्तरान्तरप्रसेतव्यं तथापि तावद्वा साक्षात्कारित्वे लिंगकृतमिन्द्रियजत्वानुमानपूर्वकं तदनुमानकल्पनया।
अथ तथा लिंगद्वयप्रसेकमव्यापकत्तया न लक्षणमिन्द्रियजत्वं तथात्वाल्लक्षणमिति चेत्। न साक्षात्कारित्वानुमानस्य
लक्षणप्रयोजनस्योभाभ्यामेव सिद्धेः कृतमव्यापकेनेतेन। नापि तृतीयः। स ह्येवं रूपो यदिन्द्रियार्थसन्निकर्षजनितं तत्प्रत्यक्ष
मिति व्यवहर्तव्यमिति। अयमप्यनुपपन्नो लक्षणस्य ज्ञातुमशक्यत्वात्। साक्षात्कारित्वात्तदवगमे साक्षात्कारित्वमेवास्तु व्य
वहारनियमनिदानमव्यवहितप्रतिपत्तिकत्वादित्यवेदित। अत एव न चतुर्थः। कल्पनागौरवदोषस्याधिकाः। नापि पंचमः।
तादृशस्य दर्शयितुमशक्यत्वात्। एतेन भासमानाकारेन्द्रियसंप्रयोगजं प्रत्यक्षमित्यपि निरस्तं। किंचा प्रमाणविशेष
लक्षणमिदं प्रमाणलक्षणोपसंगृहीतस्य क्रियतः संग्राहकं क्रियतश्च प्रतिक्षेपकं वक्तव्यं प्रमाणलक्षणे व्यभिचारिणो

ख०मू० पिनिरवृत्तिः प्रदर्शयितुं तथा च सतितिं यथाश्रुतमिदं लक्षणं व्यभिचार्यपि हि भासमानत्ससतादेशाकारस्येन्द्रियसंप्रयोगादुत्पद्य
ते। अथ विशेषाभिप्रायेणेदं लक्षणं वाच्यं तथाप्यसंगतिः। तथा हि। किं यन्मात्रं भासमानेन्द्रिययोगजत्वं विवक्षितं। अथ यावद्भास
३४ मानेन्द्रिययोगजत्वं आद्ये व्यभिचारस्य व्यवच्छेदः। निर्विकल्पकासंग्रहश्च। नापि द्वितीयः। क्लिष्टत्वात्। तथा हि किं भासमानता विशि
ष्टस्येन्द्रियसंप्रयोगः। उत भासमानतालक्षितस्य। नाद्यः पूर्वं भासमानत्वाभावात्कारणस्य च पूर्वभावित्वात्। द्वितीये च लक्षितो
विवक्षितार्थत्वविवक्षितार्थत्वमेव वाऽ। नाद्यः तथा हि। यावद्भासमानाकारेन्द्रियसंयोगजं न हि भवति घटोयमिति विज्ञानं न चात्म
निष्ठत्वं। आत्मनस्तदीयाविषयत्वात्। प्रामाण्यस्य च विषयनियतत्वात्। एतत्प्रामाण्यं तत्रैव विषये तद्विशेषस्य प्रत्यक्षत्वस्य व
क्तव्यत्वात्। अन्यथा पठास्तिघटोयमिति प्रत्यक्षप्रमाणं यतः किमुत्तरं। न विदमुत्तरं घटविज्ञानं न पदेन प्रसक्तं। न हि त्वत्त
द्विन्द्रियसन्निकर्षात्मकत्वमिति। तत्किमात्मेन्द्रियसन्निकर्षजं घटज्ञानं नात्मनिष्ठत्वमेव कथमेवं स्यादात्मेन्द्रियसन्निकर्षात्
घटज्ञानस्योत्पादेप्यात्मनो न च भासमानत्वादिति चेत्। न। भासमानत्वलक्षणोऽविवक्षितार्थत्वपक्षमाश्रित्येदं भवतोच्यत इ
ति सम्यक्त्वं। आत्मनो भासमानत्वं कदाचित्के न चिदन्यथाऽप्रमेयत्वप्रसंगात्। उक्तलक्षणं कं स्वविषयप्रत्यक्षं न त्व
न्यत्रापीति चेत्। न। स्वशब्देन यद्विज्ञानमात्रं विवक्षितं तदा सदोषत्वस्यावस्थः। अथ ज्ञानव्यक्तिरपेक्षिता। तदा लक्षणस्य सा
धारणतया तत्परित्यागेन लक्षणस्यागतत्वादतिव्याप्तिः। व्यक्त्यन्तरस्य लक्षणाश्रयएकव्यक्त्यभिहितलक्षीभूता साधारणरूपत्वा ३४
भावात्। व्यक्त्यन्तरमपि लक्ष्यमेवाऽलक्ष्ये लक्षणस्यागमनादतिव्याप्तिरिति चेत्। नायदेकत्रासाधारणस्वरूपं लक्ष्यत्वेन निरू
प्यते भवेतानतदन्यस्य स्वरूपमतः कथं तदपि लक्ष्यमित्यपि शब्देनावकं साधारणीकृत्य समुद्धर्तुं शक्यं। यदपि साधारणरूप

तद्व्यक्त्यंतरव्यवच्छेदकं स्वविषयपदं विशेषणं प्रतिपत्ता भवतैवासाधारणीकृता स्वशब्दस्य ज्ञानमात्रार्थत्वे दोषस्योक्तत्वा
त्। स्वत्वस्य चानुगतरूपस्य निर्वक्तुमशक्यत्वात्। अन्यव्यक्तिविषयस्यान्यत्र तथात्वापत्तेः। नापि द्वितीयः पक्षः। विकल्पासहत्वा
त्। किं संप्रयोगापेक्षया वर्तमानत्वमथ यत्किंचिदपेक्षया प्रथमे विशेषणपक्षात्त विशेषणपक्षात्त विशेषु इत्युक्तदोषाप
त्तेः द्वितीयेपि लटोऽविवक्षितार्थमेव स्यात्। व्यवच्छेद्यपोभी धितभासिष्यमाणयोरपि तदाभासमानत्वस्वीकारात्। इंद्रियसं
योगानंतरं भासमानत्वमपेक्षितमतो विवक्षितार्थत्वमिति चेत्। न। आत्मनोपीद्रियसंयोगानंतरभासमानत्वमस्ति न हि स
यदा मनसा गृह्यते तदा नेंद्रियसंयोगानंतरं। नेंद्रियसंयोगमात्रं विवक्षितं किंत्वात्मयदनंतरभासनोत्पत्तिरिति चेत्। न। तदनं
तरमपि भासमानोत्पत्तेः। भासनानंतरं तत्र विदं भासनमिति चेत्। अव्याप्तिप्रसंगात्। एकभासनमात्रमवस्थितत्वाल्लक्षण
स्य। अथ मन्यसे यद्भासनयस्य विषयस्येंद्रियसंयोगादुत्पन्नं तत्र तत्प्रत्यक्षप्रमाणमिति निरुक्तो न दोष इति मैवं। यज्ञा
सनपरोक्षमिति यस्य विषयस्य आत्मन इंद्रियेण सह सन्निकर्षो दुत्पन्नं तद्भासनं तस्मिन्नात्मनि प्रमाणं स्यात्। नात्मा त
स्य विषयस्तु कथमेवं स्यादिति चेत्। न। न हि भवता तदीयविषयस्य त्वकं किंतु सामान्यतो विषयस्येति तेनेदमभिहितं य
दि तु तदीयता विशेषणमुपादत्ते भवान् तदा तच्छब्देन ज्ञानमात्रं परामृष्टं तदा स दोषस्तदवस्थः। यदि तु ज्ञानव्यक्तिवि
शेषपरामर्शस्तदाऽव्यापकं। प्रतिज्ञानं तच्छब्दार्थस्य भेदात्। न हि यत्त्वं वा किंचिदनुगतं स्वरूपमस्ति। अत एवात्मविषय
त्वानुयोगत्रिपुटीप्रत्यक्षत्ववादिनि घटज्ञानस्य पटादौ प्रत्यक्षतया प्रामाण्यानुयोगादि दुष्टत्वमः। यदिंद्रियसन्निकर्षोत्पन्नमिति
विशेषणप्रक्षेपे यच्छब्दार्थस्यासाधारणपादव्याप्त्यापत्तेः यदि तु यच्छब्दार्थोनुगतः स्यात् पुनरन्यत्रपटोयमिति ज्ञानस्य

वनाद्योपदेशात्तथा। अत एव लक्षणं केवलव्यतिरेक्यनुमानमाचक्ष्महे। तद्यथा। श्रावणादिप्रतीतयः साक्षात्कारिप्रमित्तयो वा।
प्रत्यक्षत्वेन व्यवहर्तव्याः। साक्षात्कारिप्रमितित्वात्। न यत्प्रत्यक्षत्वेन व्यवह्रियते न तत्साक्षात्कारि यथानुमितिर्न च न तथा चैतत्तस्मात्त
था। एतदनुमानप्रतिपादकं च वाक्यं न शाब्दवाक्यत्वेन प्रयुज्यते किंतु व्याप्त्याहेः प्रतिपन्नस्यैव स्मारकं। पूर्वं प्रतिपन्नस्य वा जिज्ञासोत्साद
नद्वारेणेदानीमेव वादिनिग्रमाणोत्पादकमित्युक्तदोषानवकाश इति। न। प्रत्यक्षतया व्यवहर्तव्या इति व्यवहारस्य किं विषयभेदो वि
शेषः उत शब्दभेदः। आद्ये यत्रसौ विषयविशिष्टं व्यवहारं नाज्ञासीत्। कथं साक्षात्कारिणि तस्य रचकर्तव्यता लक्षणवाक्यादप्यवगच्छेत्।
न ह्यविदिताग्निरनुमानादप्यग्निसंबंधं बोधयितुं शक्यः। अथाज्ञासीत्तदा ज्ञातज्ञापनवैयर्थ्याल्लक्षणरूपमनुमानं निष्प्रयोजनं।
अथ सामान्यतो जानाति अस्ति कश्चिद्विषयः प्रत्यक्षव्यवहारस्येति। विशेषतस्तु न जानाति तं प्रतीदमुच्यते। न। किं सामान्यतोऽनि
मितवंतं। व्यवहारमात्रस्य जानाति। उत व्यवहारविशेषस्य। आद्ये प्रकृतानुपयोगः व्यवहारविशेषस्याचिंत्यमानत्वात्। द्वितीये किं क
तो सौ व्यवहारविशेष इति विकल्पितपक्षानुप्रवेशमंतरेण न निस्तारः। एतेन सर्वस्यैव लक्षणस्य स्वीकारः परास्तनीयः। तथा हि ना
पत्त्याप्रमामात्रानेतेर्थाः स्वीक्रियोचिताः। तद्विषयस्तद्दूरीकारे स्वाश्रयं कश्चित्किल स्यात्। अथ यत्नः सविशेषणश्चेत्स ह्यलंकश्चिदिष्यते द
त्तः साकारवादाय विष्टरः स्पष्टमेव तु। अर्थाद्दुष्टाश्रयो धर्म्मो नानुमात्वादपायथा। तद्धीत्वमपि तद्वत्स्यादि समर्थानर्थमाविशेत्।
सोपि वाधो विशेषः किं स्वीकार्यस्तद्विरं विना। एवं च सोपि सोपीति नानंतः सोपानधावने समस्तलोकशास्त्रैकमतसमाश्रितत्वनूत्नतोः।
कानंदस्तु गतिस्तत्र हृत्स्थधी। व्यवहारयोः उपपादयितुं तिस्तेष्मितेरशंकनीययोः। अनिर्वचनीयतावादयादसेवागतिस्तयोः। नापि द्वि
तीयः। तथा ह्ययमनुमानार्थः स्यात्। श्रावणादिप्रतिपत्तयः प्रत्यक्षशब्दाभिधेयः। साक्षात्कारित्वादि सोपि न। यद्यसाक्षात्कारिणि

ख॰ म॰ नुमानादेतच्छब्दप्रयोगमाचात्साक्षात्कारितितच्छब्दप्रयोगः क्रियते। तर्हि शशविषाणजवगडदशादिशब्दप्रयोगोपि सा
३६ क्षात्कारित्वाकर्तव्यमेवाविशेषात्। अथ जवगडदशादिशब्दाः सामान्यतोर्थवत्तया न प्रसिद्धाः कचिदप्यप्रयोगात्। शशविषाणा
दिशब्दास्त्वसद्विषयाएवेतिप्रसिद्धाः न प्रमत्तादिशब्दास्तु सद्विषयवत्तया सामान्यतः सिद्धाः अतस्तेमस्तीता दिशब्दप्रयोगद
र्शनादिस्त्यास्ति विशेष इति चेत्। मैवं। एतेनापि विशेषेणाचाक्षुषादिशब्दानामप्यवच्छेदात्तेषामपि साक्षात्कारित्वप्रयो
गप्रसंगः। साक्षात्कारित्वे सुखपिशाचणादौ चाक्षुषादिशब्दानामप्रयोगो न चैवं प्रमत्तादिशब्दानामिति विशेषः इति चेत्।
एवं तर्हि साक्षात्कारित्वं यत्र नास्ति तत्र प्रमत्तादिशब्दप्रयोगो नास्ति। यत्र साक्षात्कारित्वमस्ति तत्र सर्वत्रास्तीति योज्जानीतं तं प्रति लक्षणा
भिधानमिति स्यात्। स च व्यवहारान्तरवदन्वयव्यतिरेकाभ्यामेव वाच्यवाचकभावमवधारितवानिति व्यर्थं लक्षणं। एतेनानुमित्यादि
व्यवच्छिन्नतयाव्यवहर्तव्यमित्युक्तानुमानसाध्यतया मधीयमानमपास्तं वेदितव्यं। पूर्वप्रतिपन्नमेव वाच्यवाचकभावं लक्ष
णाभिधानेन स्मार्यत इति चेत्। न। अवगतसमयस्य प्रमत्तादिशब्दादेव तत्स्मरणसंभवाद्व्यर्थता लक्षणाभिधानस्य स्यात्। अ
वगतशब्दार्थसंबंधः शब्दादेव स्मरन्न पदिलक्षणेन स्मार्यते। तदा लक्षणवाक्यगतपदेभ्य एवार्थस्मरणार्थमपि तल्लक्षण
मभिधानीयमविशेषादेव तल्लक्षणवाक्येयीत्वपर्यवसानस्यात्। ननु प्रतिवादिनं प्रति लक्षणाभिधानं नार्थवत्। तेन वा
ग्याग्रभावनेनांगीकारात्। किंतु शिष्यार्थं लक्षणमुच्यते शास्त्रे सहि शास्त्रस्य कर्तारमाप्तमेवमन्यते। तस्मात् शिष्यं प्रत्याप्तवचन
तयैव लक्षणवाक्यमर्थं प्रतिपादयिष्यति गुरुरागीयमानयस्त्वया साक्षात्कारिशब्दार्थः प्रतीतः स एव प्रत्यक्षशब्दार्थ इ ३६
ति। मैवं। यदि वादिनं प्रति न शास्त्रं किंतु शिष्यं प्रति तदा प्रतिज्ञामात्रादेवाप्तवचनात् शिष्यस्यार्थनिश्चयो तत्तेर्हेत्वाभिधान

मनर्थकमापन्नं शास्त्रं। अथ प्रवक्तुस्तत्प्रतिवादिनमपि प्रतिशास्त्रं वाक्यं यत्र हेत्वाद्युपात्तं। लक्षणवाक्यं तु शिष्यमेव प्रति प्रयोज
कं प्रतिपन्नशास्त्रकारासंभावमिति मन्मस्ये। तदप्यनुपपन्नं। शास्त्रांतरसाध्यत्वादस्यार्थस्याप्तिसमयया हकैश्शास्त्रं मुनिभिः
प्रणीतं नामलिंगानुशासनं व्याकरणादि। यदि च शास्त्रांतरसाध्योप्यर्थो भवतित्वदीयशास्त्रस्य विषयस्तर्हि प्रकृतिप्रत्ययविभा
गेन साधनमपि शब्दानां कुतो न व्युत्पाद्यते लिंगं वा शब्दानां कुतो नाविधीयते अनुशासनं व्याकरणादि यदि तु शास्त्रांतरसा
ध्योप्यर्थो भवदीयशास्त्रस्य विषयस्तदज्ञानेपि राजयोजायतत एव। अथ वास्तु व्याकरणादिविषयं विहाय नामसु सादनं कथ
मपि भवच्छास्त्रस्य विषयः तथापि न्यूनतरत्वमस्मिन्विषये भवदीयशास्त्रस्य तद्ध हि नामानि विद्यते कोशांतरवर्तीनि कु
तो न त्वनुसादितानि। अथास्मिन्शास्त्रे येषां शब्दानामुपयोगस्तेषामनेनैव सादनं न सर्वेषामित्युच्यते। तथापि पृथै
कवाक्यगतस्य पदस्य लक्षणाच्चैव सादनमेवं तल्लक्षणवाक्यगतपदस्यापीत्यर्थपर्यवसानमापन्नं शास्त्रस्य। तत्तल्लक्षण
वाक्यप्रयोग एव तेषां पदानां शास्त्रज्ञातोपयोगित्वात्। अथ नानालक्षणप्रणेतृणां वादिनां विप्रतिपत्तेः प्रत्यक्षादिशब्दा
र्थ एव व्युत्पाद्यते संशयनिरासाय नान्योऽनुशायित्वादिति मन्मस्ये तथाप्यनुपपत्तिः अस्ति हि वादिनामर्थवाच्यत्वद्योत
ताविवादः। अस्ति च च्छिद्रादिपदानामर्थे कर्मिकर्तृत्वकर्तृत्वे विवादः। अस्ति च भावशब्दस्य स्वरूपसत्त्वसत्तासामान्या
द्यर्थत्वे। अस्ति वाधिकरणशब्दार्थस्य पतनप्रतिबंधकत्वसमवायित्वादौ। एवमन्यस्मिन्नपि च हि पदार्थे जायते विप्रति
पत्तयस्तल्लक्षणानि कस्मान्नोक्तानि तदास्तामेकत्र विस्ताराभिनिवेशः। किंच तत्साक्षात्कारित्वा सविशेषार्थप्रकाशत्वमिति च
तानाम् सविशेषत्वस्योपलक्षणत्वेऽनुमानादिमात्रैः। विशेषणत्वे पदविशेषस्थं स्खलाया विश्रांतिस्तदा शेषविशेषस्यैवो

ख·म· षेप्रत्यलक्षणात्क्षीणत्वेनामूलमप्रतत्त्वापातः। यद्यविश्रांतिस्तदा दृश्यस्यैव व्याप्तिग्रहादनुमापामपि तादृशसिद्धिरिति साक्षात्कारि
३१ त्वापत्तिः। अथानुगमात्तत्र न तदनुमा तर्हि तदनुगतप्रतीत्याद्यनुपपत्तिः व्यक्तेरनुमानादसिद्ध्यापत्तेश्च। यथा हि मम किं विना सामा
न्यस्य तथावांतरं न विशेषं विनाप्यकारण्यनुपपन्नाविशेषात्। यदि च प्रतीत्यपर्यवसानाभावात्तद्धर्मतया नानुगतविशेषसि
द्धिरिति मन्येत तदा प्रतीतापर्यवसानात्तद्बुद्धिः साक्षात्प्रकाशः स्यात्। अप्रतिपद्यमानानंतविशेषप्रकाशकल्पनाद्धि का क्रिसाक्षा
त्वनामक विशेषकल्प्यनैवाल्पत्वात्श्रेयसितरा। साक्षात्त्वम् वहाराद्यथानुपपत्तेः कल्पनाबीजस्य तावतापि चरितार्थत्वादिति
चेत्तत्कल्पनापि न। तत एव विस्तरस्यात्र वक्ष्यते विशेषष्वयदिमवच्छेदस्तदा निर्विकल्पकव्याप्तिः। यदि च विश्वव्याप्तं तत्स्वरूपप्रका
शात्सोपितथा। तदाह रे सामान्यप्रसक्तस्याप्रसक्तत्वापातः। तत्र जगद्विलक्षणप्रकाशे संशयाद्यनुपपत्तिः। यदि तत्रापि प्रतियत्रा
दिम्नवच्छेदमात्रप्रकाशाद्विशेषप्रकाशत्वमेव तदानुमित्यादिव्याप्तिः अथेंद्रियकरणकानुभवत्वं। तन्न। साक्षात्कारीकरणस्यैवें
द्रियत्वेनात्मान्याश्रयत्वापत्तेरिति केचित्। तन्न। अज्ञानप्रमाकरणत्वस्य भावत्वविशिष्टेंद्रियत्वनिरुक्तेः संभवात्। विनाकार्यगत
विशेषसिद्धिं किं प्रतिकरणत्वं ज्ञेयमिति तु बाधः साधीयाः। एतेन ज्ञाततातिरिक्तविलक्षणातज्जनकत्वं ज्ञानस्य साक्षात्त्वमिति निरस्तं।
एकरूपाव्यवस्थितेः कारणत्वानवधारणात्तच ज्ञाततावैलक्षण्यस्यान्यथानुपपत्तेरेव तत्सिद्धिः कारणांतरवैलक्षण्यादेवतदु रामः
पपत्तेः। नापि मेयजनितत्वमतिप्रसंगात्। स्वमेयजत्वे स्वार्थव्याप्तस्यानुगमात्। सर्वदोषानिष्टत्वेश्च। अथ येन प्रमितेस ३१
तिन प्रमित्साप्युनर्भवति तत्ज्ञानं साक्षात्कारीति। तन्न। प्रमसत्वादवगतेऽपि इच्छितनयादौ प्रमितिसादर्शनात्। अथ यदनंतरं

ख॰म॰ तिवाच्यं। इंद्रियमपेक्ष्य तत्र सन्निकर्षश्चेत् इति चेत्। तर्हीन्द्रियसंनिकृष्टप्रकाशत्वमिति कुटिलितार्थः। स चानुपपन्नः स्वविलोचनगोलका
३७ नुमानव्याप्तेः ज्ञानाजन्यज्ञानत्वं तत इति चेत्। न। सविकल्पकविशेषणव्यावर्तनात्। एतेन विषयांतरज्ञानाजन्यत्वं तत इति प्रत्युक्तं। सविकल्पकस्याधिकव्य
वच्छेदरूपविषयत्वात् तद्विषयिकज्ञानजन्यत्वात्। स्वविषयानंतर्गतार्थज्ञानाजन्यधीत्वं तत्। न च सप्रतियोगिकार्थप्रत्यक्षत्वाव्याप्तिः। प्रतियोगिनोऽपि वि
शिष्टार्थप्रविष्टस्य तत्तायाश्च स्वप्रमाभिन्नायां प्रत्यक्षविषयत्वोपगमात्। अप्रतियोगित्वेन तु विशेषणाद् इति चेत्। तत्र। स्वपदेनैव व्यक्तीकृतत्वात्। कार्य
व्यक्तावजन्यताया दुरवधारणत्वाच्च। तज्जातीयतज्जातीयव्यभिचारशङ्कया हेतुकापेक्षजातिस्वरूपविवेचनमिति। स्वकालावच्छिन्नार्थबोधत्वं
साक्षात्त्वमित्यपि न। स्वाध्याविविचनात्। कथं चानुमादिव्यवच्छेदः। तत्र व्याप्त्यादिप्रविष्टकालनियतार्थत्वं। यत्रापि चेंद्रोदयसमुद्रवृद्ध्यादौ स्व
कालार्थत्वं तत्र व्याप्तिप्रविष्टतयैव तादृशत्वस्य प्रयोजकत्वेनेति चेत्। न। कथमप्यस्तु तथापि स्वकालावच्छिन्नार्थत्वस्य संभवात्। न च यज्जाती
यमेवमेवेति विशेषणः सजातस्यैव लक्षणस्याग्रतः सिद्धौ किमनेन। न चैतदपीति वक्ष्यते। व्याप्त्यादिकं नेतरेणेति चेत्। नातस्यैव लक्ष
णासमर्थत्वेन स्वकालकथाविपर्ययात्। यथा च न तदपि तथा वक्ष्यते। यत्तु कश्चिदाह। स्वप्रकाशानिषेधात् स्वकालावच्छिन्नार्थप्रकाश
कत्वासंभव इति। तदयुक्तं। वस्तुतो यत्स्वकालस्यैव विवक्षिततत्वात्। वर्तमानप्रकाशकत्वेत्थेति निरुक्तिपर्यवसानात्। वर्तमानार्थस्य च
सर्वानिर्वचनीयत्वात्। तथा चोक्तं संबद्धं वर्तमानं च गृह्यते चक्षुरादिनेति तस्मादुक्तमेव युक्तं। बाह्येंद्रियसन्निकर्षेतराप्रयुक्तविषय राम॰
नियमं ज्ञानं तथेति चेत्। न। दोषवशात्तस्याक्षाद्दोषेतदसंभवात्। प्रमासाक्षात्कारत्वं तथेति चेत्। न। साक्षात्त्वेन प्रमेतरयोरविशिष्ट ३८
तया साक्षात्त्वस्य साधारणस्यैव निर्वक्तव्यत्वात्। अनिष्टप्रमबुद्धिमतेऽपि षोडसंनि। कर्षस्य प्रत्येकामिलितविकल्पानुपपत्तेः। साक्षा
द्धीः स्वरूपधीः स्वेन रूपेण वस्तुनो भानमिति चेत्। अनुमानादिव्यापनात्। अनुमानादौ लिंगाद्यपेक्षत्वात् तदवच्छिन्नकालसंबद्धबो

प्रकत्वं नत्वध्यन्नइतिचेत्। नाव्यभिचारात्। यत्रलिंगादिभाव्यादिवोधकंतत्रतत्कालसत्वौव्यभिचारात्। एतेनयुदिनलिंगकाला
वछिन्नव्यापकप्रतिभासोऽनुमातेतदाकूटव्याप्यानुमितस्यव्यापकस्युदेवनवशात् ससव्याप्यव्यक्तयंतरखनः प्राप्तौव्याप्तिकालावछि
न्नव्यापकव्याप्यातावसेशप्रमात्वंप्रमाविशिष्टोतर्भावानिर्वाच्यमापद्येततिनिरस्तं। भूतादिव्यापकानुमानेव्याप्यकालसंभ
वात्। तथापिचाग्न्यादिमदेशमात्रेप्रमात्वापातदुःपरिहरतस्योक्तत्वात्। अनुपहितप्रतीतिः साक्षाच्चीदितिचेन्न। न। विशिष्ट
प्रविष्टविशिष्यप्रसक्त्याव्यानिक्षिपनात्। काण्यनुपहितत्वविवक्षितमितिचेत्। नापरकरणोपहिताव्यापनात्। स्वकरणोपहितस्य
चस्वपदकुक्षिनिक्षिप्तत्वात्। याप्यनुपहितत्वादीनांव्यतिरेकस्ययत्रसमुच्चयः साधीः साक्षाद्दीरितिचेत्। न। नव्याप्त्यादिप्रसक्तव्या
पनात्। असिद्धत्वाद्यपर्वतोग्निमानितिवप्रतिज्ञानात्। शब्देनचस्वाप्रतिपादनात्शाब्द्यादिमितेश्चप्रसक्तत्वायातत्। अव्यवहित
धीत्वंसाक्षाद्धीत्वमितिचेत्। न। अव्यक्षानदिकल्पानुपपत्तेः। यदिन्द्र्यविशेषोतरावस्थितिर्व्यवधितस्तदानीमप्रसक्तविभुधियांसा
क्षात्वापत्तिः। अथज्ञायकज्ञानपूर्वसत्ताव्यवधानंतदापरत्वाद्यप्रसक्तत्वापत्तिः। रितिविशिष्टेवशिष्टस्यव्यवधानमितिचेत्। न। न
भ्रमविशिष्टेवह्निवेशिष्ट्यमितिस्वरूपस्थितौतथात्वेकार्यकारणविरोधः। प्रतीतौभ्रमवैशिष्ट्यस्यधर्मिविशेषणत्वेहेतोरं
शतः स्वरूत्तिःसाध्यविशेषणत्वेव्याप्तिग्राहिप्रत्यक्षेप्यव्यवधानाभावात्साक्षात्वंस्यात्। अथज्ञानस्यजातिभेदःक
श्चित्साक्षात्वं। तत्रानुभवत्वेनपरापरभावानुपपत्तिः स्मृतेरपिसाक्षात्कारित्वादितिकेचित्। तन्न। स्मृतेस्तथात्वानभ्युपग
मात्। स्वप्नस्यतावत्स्मृतित्वासिद्धेः। सिद्धौवातत्रसाक्षात्वारोपोपगमात्। भावनाबलतस्यचक्वचिदालोकादिधर्मि
कपिपाद्याध्यधर्मारोपत्वंशुक्तिरजतभ्रमवत्। निमीलितनयनादेश्चस्वप्नवदेवगतिरवगंतव्येजि। इदंतुसतप

यां

रवे·मू· रुमाणावादिवुद्धारप्यनुव्यवसाययमानायांपरमाणुप्रतीतंशेपिसाक्षात्वमनुभूयतेइत्यत्रनःसंप्रतिपत्तिःअन्यथालिंगवु
३९ द्धिलक्षणायाप्रत्यासत्त्याबह्निरपिमानसप्रत्यक्षएवनलैंगिकइतिपरेणास्तवचत्वात् । एवंप्रत्यभिज्ञायांपूर्वदेशकालस्थितिमस्य
पश्यामीतिकस्यानुभवोयद्वलात्तथाभ्युपेया । तस्मात्प्रतीतिकलहोयदिपसाक्षात्वंजातिरध्यक्षमानिकात्तदाप्रतीतोकस्यापि
दध्यक्षत्वानध्यक्षत्वविवादोनस्यात् । नहियदिप्रत्यक्षत्वंकिंचिदन्तोकचिरस्फुटत्वाद्विवादइतिचेत् । मैवं । निरंशवस्तुनिकःस्फुट
वभासःयद्येकार्थसमवायिभिर्भूयोभिःसहोपलंभःसञ्चानत्वादिवत्साक्षात्वेपितहीतिज्ञानादितेनविवादःसाक्षात्वेस्तितिविशे
षोवाच्यः । दर्शनकृतांहिविवादोनेमात्सर्येनवाङ्मात्रा । किंतुतत्वाभिमानादेव । प्रत्यक्षार्थधर्मिकायांचानुमायांसाक्षात्वप
रोक्षत्वसंदेहोदुर्वारः । परोक्षत्वंनजातिःकिंतुसाक्षात्वाभाववत्तथाकेवलंसाक्षात्वाभावःपरोक्षत्वमितिचेत् । नात्रसार्थस्याविनि
गंतव्यत्वापत्तेःसर्वज्ञमनुमन्यमानस्यचमेतद्दृष्टलिंगादेरीश्वरगपादिबुद्धावपरोक्षत्वेनापिविरोधः । लिंगादिधीजन्यत्वमनुमि
त्यादौप्रयोजकमितिचेत् । साक्षात्वेपितर्हीन्द्रियसन्निकर्षादिजन्यत्वमितिसाक्षात्वपिसानस्यात्व्यंजकोपाधिनियताचजा
तिरिष्यते । नचतत्र । उक्तप्रकारवाधात् । नचव्यंजकनियमानभ्युपगमात्ततद्वोयगम्यमितिवाच्यं । किंमयाद्दृष्टंतथाकिं
वाकेनचित्कथितमितिसंशयानुपपत्तेः । प्राभूतायासम्यमाणायांततुद्धौत्वन्मतेमनसाज्ञानतरूपायाप्रत्यासत्त्यापत्यक्षी
क्रियमाणायांसाक्षात्वाग्रहोविनाव्यंजकाभावंकथंस्यात् । अर्थधर्मश्चसाक्षात्वमितिस्वप्राकाशवादेनिरस्यंतथाप्यवाधि रामः
तसाक्षात्वबुद्धिव्यवहारवलादत्ततःपदार्थांतरमपिसाक्षात्वंमनतुमत्सनिस्तारोस्तिअन्तेरप्यत्रातिपूर्वकत्वादितिचेत् । ना ३९

नविजातीयप्रमेच्छातद्भावस्तथात्वंतन्नज्ञातुंतस्याज्ञाताऽनवगतौतु द्विजातीयानवगतेः।अविसंपद्यनुमानविषयायाप्र
सज्जयितुमनिष्टेश्च।प्रसज्जत्ववगतोपिदहनेरश्माशोकस्तवकसंदेहेधूमदर्शनेनवह्निरनुमीयमानत्वादितिकोऽज्ञा
यमानासाधारणकारणकानुभवत्वंकारणविशेषणीकृतभावत्वंवासाक्षात्कारित्वमितिचेत्।नदीघादिषुप्रसज्ञाव्या
पनात्।तत्रावधिप्रभृतेः प्रतीयमानस्यापेक्षणात्।नावधिस्तत्रज्ञायमानस्तथा।अवधेज्ञानेतुप्याशअतीताद्याव
प्यवधौतथाप्रसंगपादितिचेत्।तुल्यंलिंगेधूमादावपि।धूमदर्शनात्तत्राग्निराशीदितिपश्चादप्यनुमानात्।ज्ञानविशेषणतयाज्ञेयहे
तुतातुल्यैवेति।असाधारणकरणनिराकरणमभिमतमितिचेत्।न।अनुमितमाविलिंगप्रनुमितावसतोलिंगस्यकरणत्वासंभवे
नज्ञायमानकरणत्वाभावात्।लिंगज्ञानतावत्करणंतत्स्वप्रकाशवादिनोमतेज्ञायमानमेवतत्रेतिचेत्।न।तस्यापिज्ञायमानतयाकर
णकोटिप्रवेशेप्रमाणाभावात्।उक्तप्रत्ययानांतथात्वेप्रमाणाभावात्अन्यथासिद्धस्यापिज्ञायमानत्वस्यावर्जनेचक्षुराद्यनुमितत्वनंतरं
दिवोपजातघटादिप्रसक्त्याव्यापनात्।नियमेनेतिचेत्।न।नियमेनेतिविधौवैयर्थ्यात्।नियमेनेतिनिषेधस्यविशेषणेदेवागतेंद्रियज्ञा
नानंतरजप्रसंगस्यसंभवादसिद्धेः।विधीकरणत्वप्रविष्टएवायंनियमोनिरुच्यतइतिचेत्।न।तथापिवैयर्थ्यादेव।अन्यथातिप्रसक्तेः
रवैयर्थ्यमितिचेत्।न।तथाप्यतिप्रसक्तेरेव।नहिरसादिसाक्षात्काररूपादिहेतुः।अन्यथासिद्धेरितिचेत्।नतुल्यत्वात्।किंचयत्रनिषे
धःतद्गतमेकरूप्यंमन्यथाकिमादायनियमोनिरूप्यतइतिकार्यगतैकरूप्यमनभिधायननिस्तारः।विनापिचनियमपदप्रवेशंकार्यज
गतैकरूप्यमनिरूप्यननिस्तारएवाज्ञायमाननानाकरणमितियदिकार्यव्यक्तिमभिसंधायतदातत्सर्वंप्रतीतिनानातन्नाकरणत्वंदुरवधारणात्
तःतज्जातीयेतज्जातीयव्यभिचार[illegible]तिसंधानेऽवश्यंयतनीयमिति।अथाव्यवहितार्थप्रमात्वंतथात्वं।तर्हिकिमपेक्षाव्यवधानंकिंचतदि

ख॰ म॰ एवं तत्त्वात्मनिवृत्तिविरोधभयेनासमुदायत्वस्यैवत्वेन तादृशि प्रसंगो दुर्वारः। ज्ञानस्यैवं विवक्षितत्वमिति चेत्तन्न।
विशिष्टस्यापि ज्ञानत्वाज्ञानत्वादेव एकेति च किमाश्रयव्यक्त्यभेदो विवक्षितः। उत नाभिन्नजातीयता। उतैकोपाधिकत्व।
४० उतैकसंख्यायोगित्वम्। उत द्वित्वादिसंख्यायोगाभावः। आद्ये तद्विशिष्टस्याव्यापकतादोषः व्यक्त्यात्मनोऽभेदस्याव्या
प्तत्वात्। धर्म्मिणा च लक्षणे विशेषणे अलक्ष्यधर्म्मत्वधर्म्मिस्यस्यात्तस्यैव वस्तुधर्म्मितानुपपत्तेः। आश्रयाभेदोपल
क्षणे त्वेप्रागुक्तदोषः। द्वितीये तद्वाभिन्नजातीयत्वलक्षणस्य अवश्यं तयाऽध्यक्ष्येनुभूयमानत्वात्। तृतीयः पुन
स्तु प्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावात्। न। नापि चतुर्थः वैशेषिकपक्षे गुणत्वात्तद्भावात्। भावे वा
नुमित्यादित्रीणां त्रयाणामप्यभावानामेकत्वसंख्यासामानाधिकरण्यासम्भवात्। मिलितानामप्येकसमुदायापे
क्षया तथात्वात्। नापि पञ्चमः वैशेषिकमतानुसारेणानुमित्यादित्रयेपि तदभावस्य तुल्यत्वात्। अतदनुसारेण प्रत
त्यक्तिषु द्वित्वादिसंख्यायोगात्। तथापि नैकस्यां प्रत्यक्षव्यक्तौ द्वित्वादिसंख्यापरिसमाप्तिः द्वित्वादिसंख्यापरिसमा
प्त्यभावस्तदभावशब्देन विवक्षित इति चेन्न। कापि परिसमाप्तिः एकस्यां व्यक्तौ नास्तीत्युच्यते तत्र वक्तव्यं द्वित्वादेः परिसमा
प्तिरेकस्यां व्यक्तौ नास्तीति चेन्न। एवमेकत्वस्यापि न क्वचित्परिसमाप्तिः स्यात्। न हि तस्यापि तत्रैकवृत्तिः अन्यस्यैकत्वाभा
वप्रसंगात्। अत एवैकत्वसंख्यावत्तामेकव्यक्तौ द्वित्वादिपरिसमाप्तिरित्यविशेष एव। एकव्यक्तिगता एकत्वसंख्याव्यक्तिर्न राम॰
व्यक्तेति चेत्। न सत्ताव्यक्तेरप्येवभावप्रसंगात्। अनन्वनुगतत्वापत्तेश्च। मते कैकजातिरूपा एकत्वं प्रतिव्यक्तिभिन्नं ४०
गुणपदार्थ इति चेत्। न नवैशेषिके विप्रलब्धौ सिकथमनयोः सदेकपत्तयोरनुभक्ष्यव्यवहारविशेषमपश्यन्नपि कानि

त्विकानिचित्संबद्धान्यतराणि पुलयसिसत्रैकत्वयोः परापरत्वानुपपत्तेर्नैवं स्यादिति चेत् । नासाम्यात् । जातिपरापरर्श्चो
व्यमेव चक्षाप्यकनून्न द्वित्वादिप्रमाणीस्यात् । क्वतथेति चेत्तन । शैलेऽवलस्यानुमा याकेह स्तवित्तस्यादौतद्देशाइत्सनि
ष्ठ्यवद्दोषालात् । न च स्कुमावासीदैकत्वमनुगतं किंमनेनात्रानिरूपितनद्वित्वादियत्र न समाप्यतेऽभिहिताभाव
त्रये चास्तितत्सत्सत्त्वमिति । मैवं । अनुमित्यादित्रयेपि न त्रित्वपरिसमाप्तिः एवं सत्सामानित्रीणि नस्युः अन्या सौत्रित्वव्य
क्तियोऽन्यत्रेति चेत् । न । त्रित्वव्यक्तेः कस्याश्चिदनुमित्यादित्रयेपि समाप्त्यभावात् । काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्य
तइति चेत् । न । अव्यापकत्वात् । प्रत्येकत्वस्य च त्रित्वव्यक्तेश्चावश्यं सामानाधिकरण्यस्य वैशेषिकमताद्यकच्छितेन
भवताऽभ्युपगन्तव्यत्वात् । अन्यथा प्रत्येकव्यक्तयस्तिस्रो न स्युः । तद्वन्निरित्यभिधीयते यत्र त्रित्वपरिसमाप्यते किं
चातथापि स एवातिव्यापकतादोषः त्रित्वेनावच्छिन्ना स्वत्वनुमित्यादिव्यक्तित्वदभिमतमभावत्रयमस्तीति तत्र प्रत्य
क्ष । लक्षणागतमित्यतिव्याप्तिरुक्ता तथाहि तेनायं भवताभिधीयते काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यते इति । न च
वमुक्तेऽसातिव्याप्तिर्निवर्त्तते । तत्राप्युक्तविशेषणस्य विद्यमानत्वात् । न हि त्रित्वावच्छिन्ने तस्मिन् त्रित्वव्यक्तिः काचिदपि
समाप्यते त्रित्वलक्षणोक्तोपाध्यवच्छिन्ने तस्मिंस्त्रित्वव्यक्तेरसंबद्धाश्रयात् रमादायवर्त्तिन्नतु तत्रैव परिसमाप्य
ते । यत्र चोक्तमुपाधिभूतं त्रित्वं तेषु यदि त्रित्वसमाप्तिर्धर्मिषु दृश्यते तदा तद्दर्शनेन तत्र धर्मिमात्रे लक्षणाभावोत्तः सि
द्धेत न तु त्रित्वविशिष्टधर्मिणि तस्मादतिव्यापकं तत्तद्व्यस्य मवेऽभावत्रयं च त्रित्वोपाध्यवच्छेदेन समुदितानामुपग
तवति विशिष्टधर्मिणि वर्त्तते । न त्वविशिष्टमात्रे प्रत्येकमभावत्रयावस्थानस्यतेषु वक्तुमशक्यत्वात् । अथ मन्यसे ताद्द

ख॰म॰ रूपस्यविशिष्टस्यप्रमितित्वेनैवव्यवच्छेदः नह्यभाववत्त्वप्रवृत्तिनिमित्तंविशेषणमाश्रयकोटौवृत्तेर्भाव्यतासुधर्मिव्यक्तिषु
४१ प्रमितित्वंवर्त्तते। किंतुतेषांधर्म्मिणांस्वरूपमात्रेणोक्ताभाववत्त्वेप्रमितित्वंचेत्तन्तद्यथाऽस्तितत्प्रसक्तमितिपामद्दत्रिभ
वत्तापिभिन्नभिन्नधर्म्मावच्छिन्नस्यैवधर्म्मिणः प्रमितित्वमभाववत्त्वप्रवृत्तत्वंचावश्यमभ्युपगन्तव्यात् तथाहि यदिप्रमितित्व
स्यक्वाचित्कत्वेनियामकंनोच्यतेतदाप्रमितिःसर्वाःस्यात्। नवाक्वचिदपिसर्वत्रसत्त्वासत्त्वावानियमेमानपेक्षनियाम
कादिभावानांक्वाचित्कस्यसंभवः। तन्नियामकमाश्रयविशेषणीभूतंवावक्तव्यमुपलक्षणीभूतंवायदेवप्रमितित्वसा
श्रयेविशेषणंतदेवयद्यभाववत्त्वस्यापितदातेनतदवच्छिन्नेऽनुमितसाध्याभाववत्त्वस्यदर्शितत्वात्तेनचप्रमितित्वेनापिवि
तावच्छिन्नेभवितव्यमितितत्त्वात्तेनतद्व्यवच्छेदः। अथान्यावच्छिन्नेप्रमितित्वमन्यधर्मावच्छिन्नेचाभाववत्त्वपूसंबंधः तदाना
स्तितत्सत्त्वेपिप्रमितित्वस्यैकधर्मविशिष्टाश्रयत्वलक्षणाम्ब्लाश्रयत्वाद्विशिष्टेपिधर्म्मिणाश्रितोधर्म्याश्रितएवेतिकथाचप्र
मितित्वसाभाववत्त्वसमानाश्रयत्वेऽनुमित्याद्विरूपेपिप्रसंगःस्यादेवस्य। नापिद्वितीयःउपलक्षणीभूतेनकेनचिद्धर्म्मे
णयोसावुपलक्षितोधर्मीसएवखलुनिरवच्छिन्नविशिष्टोपि। विशेषणवत्तोयावद्विशेष्यवस्तुनोविशेष्यवस्त्वात्मकत्वात्।
यथादण्डपिपुरुषःपुरुषएव। एवंसत्युपलक्षितादनमभूतेनिरवच्छिन्नविशिष्टेप्यनुमित्साध्येप्रमितित्वमाश्रितं। नियामकं
नोपलक्षणेनोपलक्ष्याभेदस्वभावस्थितत्वयातस्याप्यवच्छिन्नत्वात्तथाचातिव्याप्तिर्वज्रलेपायित्तातथाप्युपलक्षकेनत्रित
विशिष्टत्वयानोपलक्षितोसोधर्मीकिंतुस्वरूपेणानिवृत्त। नाउक्तमत्र। यदेवतन्नुपलक्षितंतदेवविशिष्टमपितथापिवि ४१
शिष्टेनरूपेणतावन्नोपलक्षितमितिचेत्। नोपलक्षितत्रविशिष्टेनापितन्नोपलक्षितमेव। अन्यथाप्रकृतेपिवैयधिकर

तस्यापि साक्षात्त्वग्रहे कथं चित्तद्विवादो न स्यादित्यादिदोषसाम्यात्। अनुमानादिवेद्यत्वे तल्लिंगाद्यनुपपत्तेः। क्वच
व्याप्त्यादिग्रहस्त्यादिदुरंतपरंपरैव स्यात्। सप्तपदार्थीनियमसाधनान्निश्चयनकथंपरिपंथी निस्फुरिति। लिंगादितत्त्वा
भावसमुदायवती धीः साक्षादिति चेत्। न। परोक्षविषयसंशयादावतिव्याप्तेः। ईदृशीप्रमातथेति चेत्। न। प्रत्यक्षप्रमा
व्याप्तेः। अनुमानादिव्यवच्छेद्यतत्तदसाधारणकारणाजनिता धीः साक्षादिति चेत्। न। एवं तर्हि प्रत्यक्षतत्तदपरव्यतिरिक्ता
धीरनुमानादिरिति विपरीतमेव कुतो न स्यादिति विनिगमकत्वं स्यात्। तदुभयव्यवच्छेद्यं व्यापकत्वादि परिहाय व्यवच्छेद्यहेत्वजनित
त्वेनापि साक्षात्त्ववक्तव्ये तत्राननुगतत्वबुद्ध्याद्यंतरापत्तेः। व्यवहारस्य तु निमित्तानुसरणं न तु निमित्तानुसारेण व्यवहार इति चेत्।
न। निमित्तस्यानन्यानुपपत्तिद्वारस्यैव कल्पत्वात्। तज्जनितभावोहि तेनैवरूपेणानुगतव्यवहारमालम्बयात्। दृष्टान्तत्वेनेना
पितथात्वे या च परिदृष्टव्यक्तिविशेषान्ते नव्यवहारोपपन्नो गोत्वाद्युच्छेदप्रसंगस्तस्मादिप्रविजंगृहत्वेयातोऽयं व्यतिरेका
समर्थनं। नैवं वेदपराद्धते किमन्यायोहवादिनां। शब्दानुमानोपमानव्यप्रमितिव्यतिरिक्तत्वे सति प्रमितित्वं प्रत्यक्षल
क्षणमभिधायय केचिन्न क्षुपते। स प्रष्टव्यः। किं प्रत्येकमिदं लक्षणं तत मिलितं नाद्यः। प्रत्येकं व्यभिचारात्। द्वितीये
किं मिलितानां निषेधः उत निषेधानां मिलितत्वं। नाद्यः प्रत्येकमेव व्यभिचारात्। न हि प्रत्येकमनुमित्यादौ मिलि
ततद्रूपसंभवः। नापि द्वितीयः। मिलितानुमित्यादिषु निषेधमेलकसंभवेपि प्रत्यक्षत्वानभ्युपगमात्। न वद्वाश्र
याणां मुक्तनिषेधसंनालक्षणात्वमुपपत्तिकाश्रयाणामिति चेत्। न। समुदायभेदेपि समुदायस्यानुमित्यादिव
दुपचारवीजाविशेषाभ्युपगमदृति हि वक्तव्ये समुदायत्वे सतीत्यपि विवक्षितमिति चेत्। न। समुदायत्वविशिष्ट

सं॰म॰ तत्तल्लक्षणोपपत्त्या सा ज्ञात्वा साक्षात्त्वविरोधापत्तेः अव्यापकविषयत्वे सतीति तत्। न। व्याप्यविषयत्वाभावप्रसंगात्। व्या
प्यत्वं हि सप्रतियोगिकग्रहणं तथा चेत् सव्याप्यमिदमिति गृह्यते तथा च सति व्यापकस्यापि विशेषणस्य ग्रहणमवश्यंभव
त्वं अन्यथा विशिष्टग्रहणस्यैवाशक्यत्वात् विशेषतो ऽव्यापकविषयत्वे सतीति चेत्। न। अग्निधूमौ व्याप्तावित्याप्तोप
४२ देशाद्वा पूर्वं भूयो गृहीतवह्निधूमसाहचर्यस्य विशेषतो वह्निधूमाग्रहणकाले विप्रदर्शनवशाद्वा जायमानव्याप्तिग्रहण
स्य व्याप्यपरामर्शो ऽनुमाने स्यात्। न परामर्शः प्रत्ययमात्रं येन प्रथमग्रहणोपसंगः स्यात्। किं नाम प्रत्यभिज्ञानमिति च
त्। किं च यदा सोपदेशाद्वा प्रतीमव्याप्तिं पुनराप्तोपदेशाद्वा चाराद्वा तदा येव मया व्याप्तिर्गृहीता स एवायमिति प्रत्यभिज्ञानान
स्य व्याप्तिज्ञानमनुमानं स्यात् विशेषतो ऽव्याप्यविषयत्वे सतीति चेत्। अव्यापकत्वप्रसंगात्। एकव्यक्तिविषयत्वस्य
व्यक्त्यंतरे ऽसंभवात्। सामान्यतो व्यक्तिविषयत्वस्य चातिप्रसंजकत्वात्। किं च धूमत्वादेर्यदा कदाचिदग्निमत्त्वं चाप्र
तीयते। तदानीं वाग्निमत्त्वं पर्वतादेः। नाद्यः। तदानीमिवात्वदीप्यमर्थिप्रवृत्तेः। तत्र प्रसंगात्। न द्वितीयः। तदानीमग्निमत्त्व
स्याप्रतीत्वा नवगमात्। तदेति धूमकालो विवक्षित इति चेत्। क्वचिद्देशे मदपि धूमस्यावस्थानमस्तीति कालांतरस्यापि धू
मकालत्वात्। तद्वत्ते धूमकालो ऽपेक्षित इति चेत्। तच्छब्दस्य व्यक्तिविशेषवचनत्वप्रतीत्या व्याप्तिव्याप्तिकत्वं। यत्किंचिद्व्यक्ति
वचने त्वेचोक्तदोषापत्तिः। हेतोः पक्षधर्मता तया प्यपर्वतादिधर्मः साध्यो मा भून्नत्तत्काललातिरेकिं न स्यात्। तत्काल
मतमीव्यपक्षत्वेकपपक्षान्निःकपप्रवर्त्तेः। धूमकालमंतर्भाव्य चेदुक्तमावर्त्तते। तद्धूमकालं चेद्देशतः स्वष्टानिः। कि
ञ्चायव्याप्तिशब्दार्थ इति वक्तव्यं। अविनाभाव इति चेत्। किमेकस्याव्यतिरेके ऽपरस्याभावो ऽविनानाच यदर्थः उत एक

स्यव्यतिरेके ऽपरस्यव्यतिरेकः। यद्वाद्यः। तदा व्यतिरेको ऽन्वयार्थः इत्येकस्यान्वये ऽपरस्या[redacted]को ऽविनाभावप्रदर्शनात्र
कस्यव्यतिरेके ऽन्वयइति इत्येकः स्यात्। एवं च सति पार्थिवत्वलोहलेख्यत्वयोर्व्याप्तिः स्यात्। तत्काल्पिकः संबंधो व्याप्तिः सा
र्वत्रिकस्य तथात्वेन विवक्षितत्वादिति चेत्। किमिदं सार्वत्रिकत्वं संबंधस्य। सर्वासु तज्जातीयव्यक्तिषु विद्यमानत्वं चेत्। नैयं
सर्वतज्जातीयव्यक्त्यपरिज्ञानेन शक्यावधारणं। न च सर्वा रिक्ता व्यक्तयो विशिष्य तो ज्ञातुं शक्याः। तत्र प्रमितिकरणासंभ
वात्। इंद्रियेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वासां तज्जातीयव्यक्तीनां योगः गृह्यते। तदनभ्युपगमेन
ऽकस्मुद्धात्यमुग्धायाः पुत्रप्रार्थनमिव तिवाच स्यातिरूपा नूनमेवादीदिति चेत्। मैवं। सामान्यलक्षणप्रत्यासत्त्या व्याप्तिग्रह
णकाले सर्वतज्जातीयव्यक्तिग्रहणे प्रमेयत्वादिव्याप्तिग्रहे ततः सर्वज्ञत्वप्रसंगात्। कश्चिदप्यज्ञानं तस्यादिति च सर्वज्ञा
पादनमिति प्रतिकूलापि प्रमेयतया सर्वं तद्वाज्ञायत एवेन तद्रूपांतरेणेति चेति चेत्। न यदि रूपांतरेण तत्प्रमेयं तदा
रूपांतरं चेत् प्रमेयत्वापारतया कथमग्रहणं। अथ न प्रमेयं रूपांतरं नास्त्येव तद्रूपांतरेण। ततश्च येन रूपेणास्ति तेन सर्वेण
प्रमेयमिति यावद्विद्यमानाकारेण ज्ञातत्वप्रसंगः। तद्वाच्यत्वस्वीकारेण च ज्ञायते प्रमेयत्वदर्शिना भवता मामकीचित्तवृत्तिः
ततः श्रद्धास्पदत्वात् यथा भेदो ऽभेदो मा भावकेयमस्मदादिः पृथक् तेष्वेकामपि वस्तुनी। ततः प्रमेयात्वाद्यपि धर्मिणाम
कत्वमेव। अतः प्रमेयत्वेन ज्ञायमानं तत्सर्वमपि तेनैकेन प्रतीयमानेन कथं क्रमात् तत्केमेव ज्ञाने भवतीति कथं तदेकत्ववेदिनः
सार्वज्ञ्यं। न च वाच्यं नानात्वमपि व्यक्तीनां प्रमेयमिति तदपि प्रमितियाथात्म्यमेवेति। यतस्तदपि प्रमेयत्वादिना गृह्यमाण
मेकमेव गृहीतं भवतीति तस्मात्। एको भावस्तत्वतो येन दृष्टः सर्वे भावास्तत्वतस्तेन दृष्टा इति। तत्वतस्ता द्रूष्यणंकी भूता

ईं॰मू॰ इतिभावइति।तदेतदपिनोपपन्नं।भानेकमितिमाहतत्प्रतीत्यापत्तेः।अथस्वरूपान्तरेणनानात्वंप्रमेयत्वादिनाचैकमितियवस्थि
४२ तानव्याघातः।तर्हिप्रमेयताधारस्यव्यक्तिभेदस्यकृत्स्नस्यग्रहणत्साद्धेज्ञाप्तिस्ताहस्थ्येवेति।किंचसामान्यलक्षणयाप्र
त्यासत्त्यातज्जातीयविशेषग्रहणेतासुसर्वासुव्यक्तिषुसंबन्धासिद्धेःकिंप्रमाणं।सर्वव्यक्तिवृत्तित्वंबन्धस्यापिव्याप्तियाहकमिंद्रियमेव
प्रमाणमितिचेत्।तर्हिकश्चिदेवमवधारितस्ययद्व्यभिचारोदृश्यतेतन्नस्यात्।इंद्रियेणसर्वकस्यसंभृतत्वात्।भ्रांतिस्तत्रसंबन्धप्रतीतिः
पश्चाद्वाधासिद्धेतिचेत्।नासामग्रीभेदेकाचिद्भ्रांतिःकाचिदप्रतीतिरितिविभागानुपपत्तेः।सुप्तादौपूर्वंविच्छिन्नकिंचिन्नस्यदुष्करत्वात्।कार्यभेदा
दिवसामग्रीभेदोपयुन्नेयइतिचेत्।उत्तीर्यतांसएवतर्कीदृग्युन्नेयइतिवाच्यं।नतावत्सार्वत्रिकसंबन्धभावावभासकस्तदानीभाविना
संबन्धानामसत्त्वेनाकारणत्वात्तस्यामान्यतश्चतज्जातीययोःसंबन्धस्यप्रतीतेःपूर्वमसत्वेनाल्पप्रातिसाध्यसाधारणं।कश्चिदपिसंबन्धाभा
वेभ्रांतेरनुत्पादात्।किंभ्रान्ताभ्रान्तोभयवर्तिहिंकार्यभेदात्कारणभेदःकल्प्यइतिचेत्।सकिमिंद्रियसहकारिभूतःकरणांतरं
मुखवाकल्पनीयइतिवाच्यं।नाद्यः।इंद्रियस्यभूतभाविसंबन्धांशेप्रमाणत्वकल्पनायांप्रमाणाभावात्।प्रसक्तत्वकपरेरते
द्रियव्यापारस्यापिनिवारयतः।पूर्वप्रतीनसंबन्धधर्म्यिंद्रियव्याप्यवधारणादर्शनात्।तदपिमनोतींद्रियमितिचेत्।असंग
तास्मिन्कार्येमनःसंकरणत्वेनप्रमाणाभावः।अवश्यपरिकल्पनीयेनान्येनैवसद्वेनुपपत्त्यप्रशान्तेःकारणत्वमात्रेतुचक्षु
रादिजज्ञानेवमनसस्तन्त्रस्यात्।चक्षुरादिवत्करणमन्यदेवतत्कल्पनीयमितिसप्तममिंद्रियप्रमाणांतरप्रसक्तेः।अ राम:
न्यथाचाक्षुषादिप्रतीतावपिचक्षुरादेःकरणत्वंनस्यात्।शक्यतेतत्रापिवक्तुंमनएवतत्रसुखादिप्रतीतिवत्करणंचक्षु ४२
रादयस्तुसहकारिमात्रं।नापिद्वितीयःइंद्रियांतरप्रसंगात्।प्रमाणांतरप्रसंगाद्वा।नापिविनाभावएकस्यव्यतिरेकेना

णापत्तेः।तदाम्रामुल्लससल्लवलवनविलसितेतेति।तदेवंलक्षणांतरेपिप्रतिपादितोयंदूषणसमूहःस्वयमूहनीयः।
एतदेवपरामृश्यमहर्षेरिदंसूत्रमुदाहृतं।लक्षणस्याभिक्षनेतुकेनांशेनोपयुज्यते।अस्याभिप्रायोक्तमपिहितत्रसामान्यतोप्येकपप
द्यमानमेवेति।चेत्।अनुमानमपिकिमुच्यते।करणपक्षेलिंगपरामर्शोनुमानमितिचेत्।किंलिंगत्वं।व्याप्तस्यपक्षधर्म्मत्व
मितिचेत्।नासंशयस्योपलक्षणत्वेतत्रदृष्टव्याप्तिव्यापकंतत्परमर्शेतिप्रसंगात्।अतएवनतस्यवर्त्तमानस्यतत्कालेप्युपलक्ष
णात्।विशेषणत्वेचानुमाययव्यापकंधर्मिणासहरदृष्टस्यापत्तेपक्षधर्मद्धेतोःपक्षांशेविशिष्टसाध्यसिद्धिरीदृशंचवैय
धिकरण्यपरिष्टमेवेत्यतोनैवमितिचेत्।नापक्षमोदायवैयधिकरणेपिनियतात्सामानाधिकरण्यलक्षणव्याप्ति
लोपापत्तेः।तथापिविशेष्यमादायसास्त्वितिचेत्।नासाध्यविशेषसिद्धिरपियुक्तव्याप्तिवलायातेसमान्यतत्रसामान्य
प्रतीत्यपर्यवसानवलादेवेतिसामान्यविशेषसिद्ध्योरुपपत्तीनीपक्षधर्मतात्वदृष्टेकेवलंसिद्धसाधनपरिहारायानु
मितिकारणत्वेनेष्टव्यासिद्धसाधनंचनस्वार्थानुमानेदोषःइतिनानुमितिमात्रेहेतुनिवेशनीसामोक्षमाणोहि।आगमे
नानुमानेनध्यानाभ्यासनक्षणेनचनिधात्मनिभमाणानासंलभ्यःस्वार्थमिष्यतइति।एतेनसंशयप्रयोगपतानिरस्तो।व्याप्य
त्वमितिचेत्।किंवस्तुगत्याव्याप्यस्यस्वरूपेणपरामर्शोनुमानंव्याप्यतयावा।नाद्यः।अगृहीतव्याप्तिनापिधूमादिप
रामर्शस्यानुमानत्वप्रसंगात्।नापिद्वितीयः।व्याप्यत्वस्यैवखिनःप्रमाणस्यानुमानत्वप्रसंगात्।तस्यापिव्याप्यग्राहित
याप्यवश्यंवक्तव्यत्वात्।अतएवद्वितीयतृतीयविशेषणेअपिनिरस्तेधारावाहिनितमापत्तेः।गृहीतव्याप्तिनापिचयुगपद्
भयग्रहणाद्भावेतोव्याप्यव्यापकावितिपरामर्शस्यानुमानत्वप्रसंगात्।नचतदर्तत्स्वार्थानुमानेनापदोषइतिचेत्।नाप्र

खं.म. खमत्वयोरप्येवंभूतत्वापत्तप्रसंगः।नापिद्वितीयः।विशेषणवैयर्थ्यात्सार्वत्रिकोन्वयइत्येवोच्यतां।नचसोपिसंगतइत्युक्तौ।
४३ नापितृतीयस्तस्यबाधकस्यसामान्यविशेषविषयत्वविकल्पेनायुक्तत्वेनैवनिरस्तत्वात्।नापिचतुर्थः।तथाहियद्धूमवत्तदग्निमदितिमहितत्वेदस्म
वयस्यसार्वत्रिकत्वंवाच्यंयत्सर्वधूमव्यक्तीनामग्निसंबंधित्वंतद्यदिव्याप्तिग्रहणकालेगृहीतंतदायत्तस्यापिधूमवह्नेरग्निमत्त्व
प्राक्गृहीतंस्यादितएवेतिगतमनुमानेनसामान्यतोऽग्निमत्त्वंतस्यापिगृहीतमेवविशेषतस्त्वनुमीयतइतिचेत्कोविशेषतइति।
किंअग्निमत्त्वस्यविशेषोव्याप्तिरूपाविवक्षितःउतकालदेशादिसंबंधस्तस्यनाद्यःसर्वसंबंधिनाव्याप्तौगृहीतत्वेनभवतेवांगीका
रात्।नापिद्वितीयः।अग्निमद्रूपतयास्मृतस्यपक्षीभूतस्यधूमवद्विशेषस्यचक्षुरादिभिरेवपर्वततदादिदेशकालविशेषादिमत्त्व
मापरिच्छेद्यात्।यथाप्राक्पर्वतयोर्हितसंस्कारसध्रीचीनैश्चक्षुरादिभिःपरिच्छिद्यमानेदानींभावदेशविशेषावस्थानादःस्मृ
वायमितिप्रत्यभिज्ञायमानतांगीक्रियते।तथैवात्राप्यस्फुटकृतमनुमानेननाप्युपमानेनबाधकंपिपक्षेशंकायांवक्तुं।तस्यनिय
तविषयत्वेनैतादृशिविषयेऽनुदयात्।नापिशब्दः।आप्तस्योपदेष्टुरभावेव्याप्त्यनवगमप्रसंगात्।अभावस्तुकदाचित्स्यात्।त
सोपिनिरूप्यमाणोनघटते।एवंहिसवाच्योयदिवह्निव्यतिरेकेणापिधूमःस्यात्तदातथोपलभ्येत।नचोपलभ्यते।अतोऽनुपलंभात्त्रा
सितव्यतिरेकेणोति।तच्चन।तथाहिकचिद्व्यभिचारादर्शनात्वाऽयमभावःप्रवर्त्तते सर्वत्रव्यभिचारदर्शनाद्वा।नाद्यःप्रा
र्थिवत्वलोहलेख्यत्वयोरपिव्याप्तत्वप्रसंगात्।नापिद्वितीयः।सर्वत्रयोग्यानुपलंभोऽनुपलंभमात्रंवा।नाद्यः।सर्वत्रयो
ग्यानुपलंभस्यासंभवात्।नापिद्वितीयः।पार्थिवत्वलोहलेख्यत्वयोरपिसंभवात्।तत्रैवहिव्यभिचारइतिचेत्।न।तदीयादर्शनद राम.
शायांव्यभिचारानवगमात्तद्दर्शनदशायांतावदस्तिव्यभिचारः।यत्रतुनकदाचिदपिव्यभिचारदर्शनंतत्रव्याप्तिरिति ४३

चेत्। न। अत्रापि व्यभिचारो न दृश्यत इत्यत्र नियामकाभावात्। नापि विपक्षे बाधकस्तर्को वाच्यः तर्कस्य व्याप्तिमूलत्वात् अभ्युपगमे
ऽनवस्थाप्रसंगात्। तदनभ्युपगमे मूलशैथिल्येन तर्काभासत्वापातात्। अथ धूमेन शक्यमिदं कर्तुं तथा ह्यग्निधूमव्यभिचारश
ङ्कायां बाधकस्तर्कोयमभिधीयते यदि धूमोऽग्निं व्यभिचरेत्तदाऽकारणकः सन्नित्यः स्यादेव न स्यादेव वा सचायमनुत्तरस्तर्कः त
त्र व्यभिचारशंकायां व्याघातापत्तेः। तदेव ह्याशंक्यते यस्मिन्नाशंक्यमाने स्वक्रियाव्याघातादयो दोषा नावतरंतीति लोकमर्यादा। एवं सर्व
त्रानुत्तरस्तर्को बाधकोऽभिधेय इति मैवं। किमित्येवं शंकितव्यं यद्धेतुफलभाव एव न भविष्यति। एवं तु शंकितव्यं अग्निं विहाय धूमोऽन्यस्मा
दपि हेतोरयमुदेष्यतीति। न च वाच्यं एवं हि सति धूमस्यैकजातीयत्वं न स्यादिति। क्वचिदिन्द्रियजन्यत्वे क्वचिदनुमानादिजन्यत्वेऽपि ज्ञा
नैकजातीयवत्तदुपपत्तेः। तत्रेन्द्रियादीनां अवान्तरसामान्ये साक्षात्कारित्वादेः प्रयोजकत्वं न ज्ञानतायामिति चेत्। न ज्ञानत्व
स्याकस्मिकत्वपरिहारार्थं तत्कारणस्यानुगतस्याभवतावश्यं वक्तव्यत्वात्। धूमेपि वह्नेर्विशेष एव प्रयोजकत्वस्य तद्वद्व
क्तुं शक्यत्वात्। न दृश्यते तावदग्निप्रयोज्यो धूमे विशेष इति च न वाच्यं। तद्दर्शनस्यापातितो हेतुत्वेतरप्रयोज्यावान्तरजातिसदर्श
नेनापि योग्यतया विकल्पत्वादप्युपपत्तेः। यदा तु हेतुत्वेतरप्रयोज्यो धूमस्यापि विशेषो दृश्यते तदा सोऽविकल्पत इति संभावना
याऽदुर्निवारत्वात्। अस्ति आत्ममनोयोगोऽनुगतं कारणं ज्ञानोत्पत्ताविति चेत्। न। यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छा
दयोऽपि ज्ञानं प्रसज्येरन्। यदि तु दृष्टविशेषावाशङ्क्य भेदो वा ज्ञानत्वजातिर्वा ज्ञानप्रागभावो वा तत्रानुगतं ज्ञानकारणमुच्य
ते। तदा तदितरत्रापि वह्निव्यभिचारेऽपि धूमस्यैकजातीयप्रयोजकता शक्यत एव शंकितुं दृष्टव्यभिचारे युक्तमदृष्टादेरैकजात्यप
रिकल्पनमिति चेत्। न। अस्मादृष्टेन निश्चयः। अत्रापि व्यभिचारो न दृश्यत इत्यत्र नियामकाभावात्। शंक्यत एव शंकायामा
नस्याभवतो न क्वचिदनुमानं स्यादिति प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वीकर्तव्यमेष

प्यनुमाने ह्येतादृशशंकानुसरणात्सर्वव्याघात इति चेत् । न । धूमवह्न्योरपि वह्निकारणविशेषानुमानस्यैवं सति सदनुमानत
प्रसंगात् । सामग्रीसाम्येन प्रमाऽप्रमावैचित्र्यस्यानुपपत्तेः । साधारणधर्म्मदर्शने विशेषादर्शनादौ सत्यपि शंकायाश्चानुदयस
मय्यासत्यामपि कार्यानुदयात्तर्कप्रतिपक्षमादाय नार्थविचारनादिरूपाप्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोऽपि वह्नि
या व्याघातफलम्ः व्याघातस्यैव विशेषतानेदृशने संकासामग्र्येव नास्ति मत्सते तत्कुतो व्याघातसाम्यमिति चेत् । न । तद्भिनत
वदाहारादिकारणाज्जायमाने प्रमाकूटविषयस्य तस्यातिप्रसंजकत्वात् । कूटभिन्नः प्रसंजकः प्रमितस्यैव स्यादिति चेत् । न । तस्य
तर्कप्रस्तावे । नीरसनीयात्तस्मादेतद्व्याघातरूपस्य विशेषस्य दर्शने शंकाप्रतिपक्षेभ्येन मुच्यते । तत्किं प्रमाणं कुतश्चिदुपजायमानं च
लोतत्कांक्षा । यदि प्रथमः शंकास्तित्वमपि तेनैव प्रमाणेनोपनेयं । शङ्कायां सत्यां व्याघातात् । यदि तु शंकां विनापि व्याघातस्तद
शंकमानाशंकमानयोर्व्याघातसाम्यं सिद्धमेवा भवतु शंकायामपि तत्प्रमाणं किमेतावता प्रथमोपजातशंकामवलम्ब्य वस्थि
तस्य व्याघातरूपस्य विशेषस्य दर्शनानु शंकान्तरं नोत्पद्यत इति चेत् । न व्याघातसत्त्वकाले तद्बलेन्यथा शंकायैव शंकामानव्यभिचा
रतान्तस्याः शंकायाः व्यापरमेव तदवलेऽपि नो व्याघातरूपस्य विशेषस्याभावात्कः शंकान्तरोत्पत्तेर्वारयितेति निवर्त्तकं । मानामात्म
नेदा व्याघातात्मा विशेषस्तद्वगमस्तदाहितो वा संस्कारस्तावदस्ति विशेषावगमात् तत्संस्कारे वृ शंकाविरोधिनौ न तु स्वरूपेण
कश्चिदपि विशेषस्यावस्थानं तथेति चेत् । न । श्यावदाश्रयभाविनो विशेषस्य पूर्वं स्थितस्य च यद्दर्शनं तदाहितो वा संस्कारस्तस्य
कालान्तरेऽपि तत्प्रतिधर्म्मशंसयविरोधित्वे ऽवयविपाकपक्षे तु कुंभस्य परमाणुपाकपक्षे परंपरया तदारंभकस्य परमाणोः
पूर्वरूपामतया ज्ञातस्य कालान्तरेऽसंभावितपाकस्य पालकज्ञन्यरूपविशेषवत्तायां संशयो न स्यात् । यदि च शंकायां व्याघा
तस्तदा शंकाश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छंकायां शङ्कान्तरं माभूत् । यदि व्यभिचाराश्रयस्तदा व्यभिचारः स्या

परस्याव्यतिरेकः। तन्निषेधे त्वविनाभाव इति द्वितीयः पक्षः। एवं हि लोहलेख्यत्वव्यतिरेकस्य पार्थिवत्वव्यतिरेकस्य क्वचिदस्तीति
पार्थिवत्वलोहलेख्यत्वयोरविनाभावः प्रसज्येत। सार्वत्रिकव्यतिरेकयौगपद्यं विवक्षितं न तु क्वाचित्कम्। अत एव चोच्यते। अ-
विनाभावनियम इति चेत्। सार्वत्रिकान्वयावधारणं निरासन्यायेन सार्वत्रिकव्यतिरेकावधारणं स्यात्। शक्यं त्वेवान्वया-
वधारणमेवास्तु सार्वत्रिकं कृतं व्यतिरेकावधारणकुटिलिकया। यत्र विपक्षे वृत्तौ बाधकमस्ति तयोरन्वयव्याप्तिरिति के-
चित्। न द्विपक्षे वृत्तौ बाधकं तत्प्रमाणं वा तर्को वा स्यात्। आद्ये न तावदिन्द्रियं तदसम्भवात्। अन्यथा व्यभिचाराव्यभिचा-
रसंशयो न स्यात्। नाप्यनुमानं। अनवस्थाप्रसङ्गात्। नार्थापत्तिरनुमानाव्यतिरेकात्। व्यतिरेके वा यदि लिङ्गिव्यतिरे-
केन लिङ्गस्यानुपपत्तिस्तदा तत एव लिङ्गिसिद्धेः कृतमनुमानेन। अनवभावे वा तयोः किमायातं। अस्तु वा कथमपि ता-
वदर्थापत्तिर्बाधकं तथापि कीदृगभ्युपगम इति प्रष्टव्यं। किं विपक्षवृत्तिबाधकसध्रीचीनो यत्र क्वचिदन्वयो व्याप्तिः उत
तत्सहितः सार्वत्रिकोऽन्वयः। उत किं नो विशेषगवेषणेन तत्र तत्सध्रीचीनः सामान्यतोऽन्वयो व्याप्तिः। उत सार्वत्रिकोऽन्व-
यः। स च विपक्षे बाधकादवगम्यत इति नाद्यो विकल्पानुपपत्तेः। तथाहि। किं विपक्षवृत्तौ बाधकं सर्वव्यक्तिविषयं उत सामान्यविषयं।
आद्ये यत्राप्यनुमानं प्रवर्तनीयं तत्राप्यशेषोपस्थापनयान्यथाभावबाधकभूतयार्थापत्तेः स्वसाध्यसिद्धेः शास्त्रमनुमानं व्यस-
नेन द्वितीये क्वचिद्व्यभिचारेऽपि क्वचिद्व्यभिचारमाशङ्क्य बाधकस्य चरितार्थत्वात् धूमवत्तामात्रं वह्निमत्तामात्रव्यतिरेकित्वेन हू-
पो हि सामान्यतो विपक्षः तत्र च बाधकं तयोरविरोधे पर्यवस्यति। अविरोधश्च क्वचित्साहित्यादृष्टेरेवेति पार्थिवत्वलोहले-

43

खं॰ म॰ सर्वसंभवादनंतःकालदेशाद्यवस्थादिभिरपितज्जन्यत्वस्यावच्छेदकत्वात्॥ नापि द्वितीयः तस्य निर्वक्तुमशक्यत्वात्॥ एवमेव
४५ विकल्पासहत्वादितिचेत्॥ भवितव्यमेवेत्यत्र न तु कोपि विकल्पः सर्वत्रोपपन्नस्य हृष्टत्वेऽनुपपन्नत्वशंकाऽभावादिति॥ अनौपाधिकः संबंधो व्याप्तिरित्यपरः॥ स प्रष्टव्यः
कोऽयमुपाधिर्नामयच्छून्यत्वमनौपाधिकत्वं उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकः॥ अयंच॥ एकसाध्या विना
भावेमिथः संबंधशून्ययोः॥ साध्याभावाविनाभावी सतूपाधिर्यदृत्ययः॥ तस्यव्यतिरेकस्तुल्यस्य यद्त्ययः सउपाधि
रित्ययोऽनुमानस्य पर्यवसितोर्थः॥ तद्धर्मभूता हिव्याप्तिर्जवाकुसुमरक्तत्वस्फटिकेसाधनाभिमते चकास्तीत्युपाधि
रसावुच्यते॥ तदिदमाहुः॥ अन्येपरप्रयुक्ताना व्याप्तीनामुपजीवकाः॥ तैर्दृष्टैरपिनैवेष्टाव्यापकांशावधारणा॥ सव्यो
पाधिर्निश्चितइवाशंकितश्चयत्रेदमुच्यते॥ यावच्चाऽव्यातिरेकित्वेशातांशेनापिशंक्यते॥ विपक्षस्यकुतस्तावदेत्यु
तोऽगमनिकाबलमितिचेत्॥ न॥ साध्यव्यापकेसाधनाव्यापकेपक्षेतरत्वेपिप्रसंगात्॥ तद्व्यतिरिक्तइत्यपीतिचेत्॥
न॥ बाधेनोन्नीतस्यास्यापनात् तदन्यथा निरूपाधिसंबंधत्वबाधासिद्धेः॥ यद्वाहबाधेनबोपाधिरुन्नीयतेऽनेनकाचिद्वि
शेषः॥ एतदर्थमपिविशेषणीयमितिचेत्॥ न॥ तथापि साधनाव्यापकत्वेसतीतितद्व्याप्त्यनवधारणेन शक्यावधारणा॥ एवंसाध्य
व्यापकइत्यपि॥ अथमन्यसेऽदृष्टव्यभिचारसाध्यत्वसाध्यव्यापकत्वंतत्रवस्तुगत्याव्यभिचारिसाध्यव्याप्तपाततोऽदृष्टव्यभिचारसा
ध्यत्वेसाध्यव्यापकत्वसंभवात्॥ तस्याप्युपाधित्वापत्तेः॥ नुद्दृश्यत इतिचनिरूपयितुमशक्यत्वात्॥ व्याप्तियहकालेपिसाध्यत्वाभावेन
तदव्यभिचारः कथमवधार्यः॥ साध्यंव्यापकमपेक्षितमितिचेत्॥ न॥ व्याप्त्याऽनवगमेव्यापकार्थानवगमात्॥ संभावितव्यापकतावाव्या

पक्षोऽपि स्यादिति चेत्। न। व्यापकत्वस्यानिरुक्तौ किंरूपतया संभावनापि स्यात्। अथ साध्यव्यापक इत्येव भद्रं तदानीं साध्यत्वाभा
वेऽपि साधयितुमर्हत्वस्य विवक्षितत्वात्। न। कथं ह्यवगन्तव्यमिदमेव साधयितुमर्हमिदं नेति। व्यापकत्वादिति वक्तुमशक्यत्वात्। नच
साधनाव्यापकत्वं सर्वत्र निश्चेतुं शक्यं। स श्यामो मैत्रतनयत्वादित्यत्र शाकाद्याहारपरिणतिपरंपराया मैत्रतनयेऽभावस्य दुरधि
गमत्वात्। यत्रोक्तलक्षणस्य निश्चायकं प्रमाणमस्ति तत्र निश्चितोपाधित्वात्। अन्यत्र तु शंकितोपाधित्वमेवास्तु मैत्रतनयत्वं व्याप्यशाका
द्याहारपरिणतिपरंपरयास्यात्वयमित्यत्र नियामकाभावादिति चेत्। न। मैत्रतनयत्वेनैव हेतुना तस्यापि प्रसाधने तच्छ्याया अपिच्छे
त्तुं शक्यत्वात्। तत्रापि तत्सामग्रीरूपाधिपरंपराभिधाने च तस्यास्तस्या अपि मैत्रतनयत्वेनैव प्रसाधनस्य कर्तुं शक्यत्वात्। अनवस्थे
वस्यादिति चेत्। न। उपाध्युपन्यास एव कुतोऽनवस्थानं स्यात्। साध्यसामग्र्या उपाधित्वे धूमानुमानं साधारणात्। एवं साध्य
सामग्र्युपाधित्वव्यवच्छेदार्थमपि लक्षणं विशेषणीयं। श्यामत्वादौ साध्ये शाकाद्याहारपरिणतिपारंपर्यादेस्तस्मिन् साध्ये श्यामत्वा
दिरूपाधित्वसंभवेन कथमुपाधिरपि साधयितुं शक्यत इति चेत्। मैत्रप्रत्येकं द्वयोरपि मैत्रतनयत्वादिना साधनेन साधनाव्यापकत्वस्य श
क्तुमशक्यत्वात्। अन्यथा सकर्तृकत्वे साध्ये दृष्टजत्वमदृष्टजत्वे च सकर्तृकत्वमुपाधिरित्युभयासिद्धिः स्यात्। एवं बुद्धिमत्सर्वकर्तृकत्वे
प्रयत्नवत्सर्वकर्तृकत्वे प्रयत्नवत्सर्वकर्तृकत्वे बुद्धिमत्सर्वकर्तृकत्वमेवं वह्नित्वजातिसाक्षात्कारवत्त्वे पीतधनजन्यतेजोवत्त्वं तस्मिन् वह्नित्वजातिसाक्षात्कारवत्त्वमुपा
धिः स्यादित्यादि विश्वमनुमानमाकुली स्यात्। अतएव साध्यसाधनसंबंधप्रतिव्यापकत्वं साध्यव्यापकत्वमित्यपि परास्तं। यत्राप्युपाधि
निश्चीयते तत्राप्युत्पत्तिं द्वितीयोपाधिविषये तदभावस्य साधनाव्याप्यत्वार्थमनुमेयतायां सोपाधीक्रियमाणे न साधनेनैव सत्प्रतिपक्षसकर्तुं
शक्यत्वात्। तथा च तत्र शंकितोपाधित्वमेव निर्व्यूढं स्यादिति चेत्। एवं ब्रुवाणो नियतमजो शिपरमंदमदाक्रांतः प्रतिपक्षो

ख॰मू॰ तथा हि। निश्चितोपाधिमात्तवेशंकितोपाधित्वमापन्नं तदनुकूलं मन्यते कोऽन्यो जितलज्जात्। न च क्वचिन्निश्चितोपाध्यनभ्युपगमे तच्छंकाशक्या

४६ यत्र प्रसक्तेनोपाधिनिश्चयस्तदेव तद्दर्शनस्थाने भविष्यतीति चेत्। नाऽऐन्द्रियकबाधे तज्जातीयस्यातीन्द्रियस्याप्रयोजकीक्रियमाणो नेहत्वतो

व साधयितुं शक्यत्वात्। न च परेकत्रैकजातीयमैन्द्रियकं तदन्यत्रैन्द्रियकबाधे हेतुबलादतीन्द्रियं न साध्यते पाकदर्शनाज्जाठरानलादि

सिद्धेः साधनाव्यापकत्वे सति साध्यव्यापक इति चेत् शाकाद्याहारपरिणतिपरंपरासाध्यं न वा प्रीतीत्यव्यापकता दोषः। न हि शाकादित्वे

नाम किंचिदेकमस्ति यत्साध्यं व्याप्नुयात्। अस्तु वा कथमपि तथापि श्यामत्वं न व्याप्नोति इन्द्रनीलशिलादिश्यामत्वस्याहाराजन्य

त्वात्। शरीरस्य श्यामत्वं साध्यं तद्व्याप्नोत्येवेदमिति चेत्। नाव्याप्तावुपाधेरभिधेयत्वात्। न च पुरुषस्य श्यामत्वेन व्याप्तिः हेतुपक्षधर्म्मतये

व हि साध्यं पक्षधर्म्मः सिध्यतीति न व्याप्त्या। अन्यथा पुरुषपदस्याव्यवच्छेदकस्याविशेषणत्वापातात् परंपरासंबंधिकत्वादित्वे

पश्यामत्वव्यवच्छेदकत्वे च संयुक्तश्यामपुरुषसमवेतश्यामत्वस्य परंपरासंबंधिनः कथं व्यवच्छेदः स्यात्। न च साध्यसाधनसं

बंधग्रहव्यभिचारित्वं साध्यव्यापकत्वमात्रं रूपसान्ताल्लौकिकरणादेस्तेजसादित्वे साध्येऽनुद्भूतरूपादित्वे देरूपाधित्वं। साधने

नापि च विशेषणतया निवेशेन यदि केवलसाध्यव्यापकेऽव्यवच्छेद्यं तदा तस्य व्यभिचारशंकाद्यानहेमस्याप्युपाधित्वं न स्यात्। अ

थ न किंचिद्व्यवच्छेद्यं तदा विशेषणत्वासिद्धिरेव। न हि प्रयोजनमात्रात् विशेषणमर्थवद्भवति किंतु किंचिद्व्यवच्छेदादिति। अन

था। शरीरजन्यत्वमिवाकर्तृकत्वे व्यक्तमसिद्ध्युपर्यवस्येति किंच। भासंव्यतिरेकिणी पक्षधर्म्मे हेतौ जीवच्छरीरे रष्टार्थमाघेष्टद्व्या

तिरिक्तानेकद्रव्यवत्त्वाणादिमत्त्वादित्यादौ कथमिदमुपाधिलक्षणं व्यवस्थाप्यं। तथा भासंव्यतिरेकस्तु भानात्मनियतत्वात्साध्य ४६

तदुपाधिनाव्याप्तिमिष्यते तस्य परामिमतस्य कचित्सिध्यापत्तेः व्यतिरेकव्याप्तावुपधिश्चेत्तर्हि व्यतिरेके यद्यापात्तं तस्य व्याप्यउपा

देवव्याघातात् अथ यस्य व्यभिचारस्यापि प्रमितापत्तेः। अनादिसिद्धव्याप्तिकास्तितकाइ तिचेत्। नातद्वेद्वेः प्रमितित्वासिद्धेः। शरीरेख्या
त्मग्रत्ययस्यतादृशस्याप्रमात्वोपगमात्। अनादित्वासिद्धेश्चाभयत्राविशेषात्। नापि यद्यन्नव्यभिचारः शंकेत तदा व्याघातः स्यादिति
वं रूपात्मकव्याघातावगमः। व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वाभासत्वापातात्। नादृशस्यापि व्याघातोपना
यकत्वे व्याघातापत्तेः साम्यं शक्यत एव तर्काभासाद्भवतोपि व्याघात उपनेतुं। अथ तस्य तर्कस्य व्याप्तिर्मूलभूताभ्युपगम्यते तत्रापि
व्यभिचारिशंकया पुनरनवस्थैव तत्रापि व्याघातापादने पुनरिच्छमनवस्थैव वेदान्तमास्त्विव नचेत्क्वाकानतस्तर। व्याघाताव
धिराशंकातर्कः शंकावधिर्गतः तस्मादस्माभिरप्यास्मिन्नर्थे न खलु दुःपर। तद्ग्राथ्यैवान्यथाकारमन्तरा। किं यस्यापि व्याघातो
यदि शंकास्तितचेत्क्वाकानतस्तरां। व्याघातावधिराशंकातर्कः शंकावधिः कुतः। अव्यभिचारश्चैकपरिसामग्र्यवच्छेदेनापूर्णव्येयः
समकालजातदृष्टनष्टदृष्टश्शंकयत इत्याकुः। स्वाभाविकः। सम्बन्धो व्याप्तिरित्यपरः। सम्प्रष्टव्यः। कस्य स्वाभाविकः किं संबंधि
नोनुतानस्य। न चरमः। विपरीतापत्तेः। आद्यः कः स्वभाववशादार्थ इति प्रष्टव्यं किं संबंधिस्वभावाश्रितः। अथ संबंधिस्वभावजन्यः
अथ संबंधित्वविवक्षितत्वभावानतिरिक्तः। अथवा संबंधिस्वभावव्याप्यः। अथवा संबंधिस्वभावाद्भेतनप्रयुक्तः। उतान्य एव
काश्चिद्विवक्षितः। आद्ये पार्थिवत्वलोहलेख्यात्वयोरपि व्याप्तित्वप्रसंगः। न द्वितीयः। अतिव्याप्तेरव्याप्तेश्च। अतएव न तृतीयः। ना
पि चतुर्थः। व्याप्यनिरुक्तौ व्याप्यत्वानिरुक्तेः संबंधस्य व्याप्यत्वे च संबंधिनोर्व्यापकयोः संभावितसंबंधाधिकदेशकालतया एक
संबंधिदर्शनेऽपरानुमानापनियामकायोगात्। नापि पंचमः। न प्रयुक्त इति यदि न जनितः तदा संबंधस्याकृतकत्वपक्षेऽ
स्मिन्नेति विशेषणवैयर्थ्यम्। अत एकस्य संबंधिस्वभावेनाप्यजनितत्वात्। संबंधस्य कृतकत्वपक्षे स्वरूपासिद्धिरेव स्यात्। सामग्र्याः

स्वं·प्र· त्वात् हेतुनाचयत्तन्निरूपणात्। स्वार्थानुमाने च हेतोरप्रयोऽसत्वात्। पक्षत्वाभावे चानुमानानुदयप्रसंगात्। विरुद्धहेतौ नैव च पक्षता
४७ भावप्रसंगात्। तत्र साध्यस्य हेतुविषयत्वाभावात्। हेतोरेव च साध्यविपरीतव्याप्त्या दुष्टत्वात्। एतेन संदिग्धसाध्यधर्म्मिविशिष्टो धर्म्मी प
क्षः। साध्यत्वं च स्वपरार्थानुमानसाधारणमुत्साध्येज्ञानत्वमिति निरस्तं। प्रतीतिव्याप्तिबलेन सामान्यतो व्यापकावगाहनेऽस्तु तावि
शेषमादाय पर्यवसापयितुं साध्यस्य सामर्थ्यमस्तीति चेत्। न तस्याः सामान्यविषयायाः अनुत्पन्नेरसिद्धव्याप्तिकत्वसंभवात्। अनुपप
त्तिव्याप्त्यनुप्रवेशात्। अधिकविषयाकांक्षिविरम्यव्यापारापत्तेः मानान्तरत्वापत्तेर्वा विशेषविषयायाश्चानुपपत्तेश्च अति
प्रसंगात्। पक्षधर्म्मतया च यदि साध्यव्यक्तिभेदः सिध्येत्तदानुमायतां प्रत्यक्षेणापश्यत् पुंशशाश्वगुरुणानुमायीप्रत्यक्षेणापुरु
षदर्शनेन तद्विशेषांशदर्शी स्यात्। अविशेषादर्शनात्तथा स्यादिति चेत्। नाद्यस्यानन्तरं तद्दर्शित्वान्न संशयीतेति उपमानमपि
किमुच्यते। सादृश्यज्ञानमुपमानमित्येके। तन्न स्मृतावपि प्रसंगात्। अनुभवत्वं सन्निधानेन च सदृशाविभावितीन्द्रियजेपि प्रसंगा
त्। सोपि गवयो गवा सदृश इति गवयत्वावगमवत्प्रत्यक्षत्वादस्यानुमानस्यापि तत्त्वापत्तेः। एवमाद्योक्तिर्जोपि। किं चोपमितिलक्षणमिति
करणलक्षणं वा स्यात्। नाद्यः। सादृश्यस्योपमेयतापत्तेः सदृशे चोपमेयव्यवहारोऽस्ति चन्द्रोपमेयं मुखमित्यादि सदृशमिति। सेति
चेत्। अत्रादिकरणसंभवेन दुदाहरणसिद्धेः। नापि द्वितीयः। सादृश्यज्ञानस्य सर्वस्यासंभवत्प्रमाणान्तरव्यापारफलजनक
तायादर्शयितुमशक्यत्वात्। न च सादृश्यमेकमनुगमकमस्ति मुखसादृश्यं हस्तसादृश्यस्य च भेदेनैवोपरामात्। न च सादृश्यरू
पत्वामनुगतं तेष्वपीत्यदोषः। तथापि सादृश्येन सहसादृश्येऽनेकस्थत्वाद्दोसादृश्यरूपत्वाश्रितसादृश्यरूपत्वस्याश्रयणा रामः
पगमे परस्पराश्रयभावोऽनभ्युपगमे वाऽननुगमतयोः सादृश्यानुपगमे चान्यत्रापि तथात्वोपपत्तेः। किंचैवंधर्म्मप्रतीतेरपि प्रमाणान्त ४७

रत्वमेवं स्यादविशेषात्। एवमेवाभ्युपगमे च परिगणितप्रमाणाधिक्यप्रसंगो वा। सदृशबुद्धेरपि वा परिगणितेष्वेवांतर्भावः स्यादि
ति। अप्रतीयमानस्य प्रतीयमानेन सह सादृश्यप्रमितिरूपमानमित्यपि न। आप्तवाक्यादपि तथा प्रमितेः। यत्र द्यापारो नास्तीति चेत्त
न। स चायं चाभिज्ञाविति वृत्तः स चायं च सदृशाविति पूर्वप्रतीतस्य प्रतीयमानेन सहेंद्रियकस्य सादृश्यप्रतीतावपि प्रसंगात्। इंद्रियासंप्र
क्तस्येति चेत्। न। प्रत्यक्षतो गोगवयसादृश्यं प्रतीतस्य सापि गोगवयेन सदृशी गौर्वादियं क्रिवेत्यनुमितावपि प्रसंगात्। अलिंगजापी
ति चेत्। न चैवं प्रत्यक्षानुमानशब्दजन्यत्वे सतीत्युक्तं स्यात्तथा च विशेषणमेव समर्थमित्यप्रतीयमानस्येत्यादि व्यर्थं। नोपादेय
मेव पदान्तरमिति चेत्। न। अर्थापत्तेरेवं संभवात्। तेन सादृश्यमितरत्र सादृश्यस्यान्येन सादृश्यं तत्सादृश्यप्रतीतिरेकेणानुपपद्यमानेनैकत्वा
त्। अन्यथा वैधर्म्यप्रतीतौ तस्य विषयं वैधर्म्यप्रमाणान्तरमापद्येत। तस्मादयं ह्रस्व इति प्रतीतेः अस्मात्स दीर्घः इति चान्यथा
कतमा प्रमा स्यात्। अर्थापत्तिप्रमाणान्तरमनिच्छतापीयमर्थापत्तिरनुमानेऽन्तर्भाव्या पृथक्प्रमाणीकर्तव्या वा। एतेनाप्र
तीतगवयगवान्तरसाम्यस्य दृष्टान्तानुमानासंभवात् गवयेनानेन सादृशी सा गौरिति मितिरूपमितिरिति तत्प्रसिद्धसं।
तये तत्सादृश्यस्येति न तत्सादृश्यं विनानुपपत्त्यैव सिद्धेरिति। अनवगतसंगतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञित्वनुसं
धानमुपमानमित्यपि न। प्रस्मृतसंगतेरेवंभूतत्वायमित्यापनात्। अस्मृतसंगतीत्यभिधेयमिति चेत्। न। अननुभूतस्मृतत्वका
लान्तरप्रस्मृतसंगतेः ख्यापनात्। अस्मर्यमाणेति चेत्। न कदापि स्मर्यमाणतायास्तत्रापि संभवात् सर्वदास्मर्यमाणतायाः क्व
चिदप्यसंभवात्। उपमितिप्राक्कालमिति चेत्। स्यादेवैतद्यद्युपमितिर्लिंगिता स्यात्। तदर्थमिवत्तर्के दन्तुमिदं भवतः। किंच सर्वैरन
वगतसंगतित्वस्य ग्रहणेऽप्यसिद्धेः केनाप्यनवगतसंगतित्वस्य वाक्येऽपि संभवात्। उपमानेति च पूर्ववन्निरस्तं। यस्याः प्रमितेर्येन
प्रमात्रेति चाभिधाने तु गतत्वरूपाभावाद्व्यक्तौ पनेन तल्लक्षणाव्यनुगतस्यापत्तेः। संज्ञेस ज्ञाप्याकुलं। गौसदृशो गवयः प्रायः क्वान नेम

ख·मू· हतिदृश्यत इतिश्रुतवाक्यस्य काननयद्यविदितसंगतेर्गवयपदविदितसंगतेश्च संज्ञासंज्ञिसंबंधप्रतिपत्तिफलाप्रामीदृशप्रतिपत्ते
५८ गतत्वेनातिव्यापकत्वात् । विनापि वाक्यार्थशब्दमभिहितस्य तस्यानुसंधानेप्रसंगः । तत्रैकाननसंज्ञासंज्ञिसंबंधस्यावधारणोप्यन्य
त्रैवपदांतरसमभिव्याहारोच्छायाअन्यथानुपपत्तेः प्रमाणत्वात् । न तूपमानस्य उपमेयसंज्ञासमभिव्याहृतेति विशेषणेनान्वपूर्वी
क एव निरासः वाक्यार्थस्यपितादृगेव । प्रतिपत्तिकालास्मृतातिदिशवाक्यगतत्वाननादिपदार्थस्य तथाविधप्रत्ययाव्यापनात् । वा
क्यार्थैकदेशस्यापि वाक्यार्थत्वेन विवक्षितत्वे सहशोगवयइत्यादिनास्मारितोपि प्रसंगात् । प्रतीतस्मृतिं प्रतिप्रयोजकीभूतं
यावत्तावद्वाक्यं विवक्षितमितिचेत् । न । अंतर्भावितत्वलाघिकरणतादृश्यप्रतिपत्तिं प्रतितस्यापिप्रयोजकत्वात् । उपमितिं प्रतितुपू
र्ववन्निरस्तमिति । यावत्संज्ञासंज्ञिसंबंधबुद्धौपयिकं तावद्विवक्षितमितिचेत् । नालक्षणसहचरितसंज्ञोपदेशार्थानुसंधाने
पिप्रसंगात् । किंच यदातत्कीनुसंधानविरहिणः सत्यप्येवंविधानुसंधाने सादृश्यमेव गवयपदप्रवृत्तिनिमित्तमितिमतिःफलं
समुत्पद्यते । तदातस्याऽप्रमाकरणस्यापि उपमानत्वमापद्येतेति । प्रमाफलकमितिविशेषणप्रक्षेपपक्षे चानुसंहितरूपव्य
वहार्यत्वानुमितिरूपादेनाप्येतादृशानुसंधानमुपमानं स्यात् । अव्याप्तविषयप्रमाफलकमितिविशेषणीयमितिचेत् । नावकृ
गता अव्याप्तत्वस्योपमेऽप्यभावात् व्याप्ततया न च गम्यमानस्यूतिक्तेयत्ताति लिंगातिन सहव्याप्तत्वावगतमुपमितिकरणम
पिनव्याप्नुयात् । उपमेयेन सहव्याप्तत्वानवगतत्वोक्तावप्यनुमानेप्रसंगः तदवस्थः । अनुमेयेन सहेति तत्कौतेपि तदनपायाद्व्याप्ति
स्तदवस्थैव । संज्ञासंज्ञिसंबंधप्रमितिकरणमितिचेत् । न तथात्वासिद्धेः अर्थापत्त्यादितः तत्सिद्धेर्वक्ष्यमाणत्वात् । अननुमितिजन राम:
कैतादृशप्रतिसंधानमुपमानमितिचेत् । न । तज्जातीयस्यानुमितिजनकत्वात् । व्यक्त्यपेक्षायां च जनकत्वस्य सामान्याकार ५८

षिरवश्यंमन्तव्यो ऽन्यथोपाधेरन्वयेसाध्यान्वयापत्तेरितिउपाधिव्यतिरेकव्याप्यवश्यंभावस्याभ्युपगम्ययोपाधेर्व्यापकं तद्व्यतिरेक
उपाधिव्यतिरेकस्य व्याप्यतयामन्तव्य इतिपरं साध्यापत्तिः। असमव्याप्तिकयोरन्वयव्याप्तिसाध्यसाधनभावे वैपरीत्येनव्यतिरेकव्या
प्तिरितिनचरेषांतरमेवनहिवाच्यमितिवाच्यं हेतोःपक्षधर्मत्वस्थितौव्याप्तिहेत्वर्थत्वयोपाध्युपगमश्रौव्यात्। भवतुवापाकाचि
द्व्याप्तिर्नामतत्सत्त्वएवानुमितिभावात्। तस्यास्त्वानुमितेस्त्वव्याप्तिरेष्व्याततस्त्वात्माश्रयतद्भेदेचाननुगमाविनिगमौस्यातामि
तिव्याप्तिपक्षधर्मानुमितिभावयतरइतिवदंति। तत्रकेयंपक्षधर्मताज्ञाश्रितत्वेतिचेत्। नानैयायिकादीनांअतिप्रमेयत्वस्याहेतुत्वप्र
संगात्। विषयविषयिभावस्यज्ञेयज्ञानस्वरूपातिरिक्तस्यानंगीकारात्। तयोश्चज्ञेयाश्रितत्वायोगात्। कश्चायंपक्षोनाम यदिधर्मि
त्वंपक्षधर्मत्वंसिसाधयिषितधर्म्मीधर्म्मीतिचेत्। सिसाधयिषाहिप्रतिपिपादयिषावास्यात्प्रतिपित्सावा। आद्ये स्वार्थानुमि
त्यनुदयप्रसंगः। द्वितीयेचाऽसुरभिगंधानुमेयकुत्सितरसविषयस्वार्थानुमित्यनुदयप्रसंगः। नचाऽनवधारितधर्मीधर्मी
पक्षः हेतुमत्तयाप्यनवधारणेऽनुमानोदयदानभावासंभवात्। अवधारणेवाऽनवधारितधर्मत्वानुपपत्तेः। नवाऽनवधारि
तहेतुविषयधर्म्मीधर्म्मीपक्षः। तथाहिकेनानवधारितधर्म्मानुनाम्वदनुमानप्रयोक्त्रास्वयमज्ञातेपरंप्रतिप्रयोगात्प्रतिवादि
नेतिचेत्। नप्रतिवादिविदितेप्यर्थवादितयापरस्परविद्योत्कर्षापकर्षनिरूपणार्थमनुमानदर्शनात्। तथानवधारणाया
लिंगविद्धेतुविषयधर्मगोचरंवावादिप्रयोज्यहेतुविषयगोचरंवा। नाद्यः अग्निमत्त्वनिश्चयदशायामपितत्त्वोद्भूतविषयत्वहुत
रपरापरधर्म्मानवधारणात्। धूमंप्रतिपर्वतस्यपक्षत्वप्रसंगात्। नद्वितीयः। तथापितत्रप्रसंगात्। तद्धेतूनामपिवादिप्रयोज्य
त्वात्। असाधारणविवक्षायांचाननुगतत्वात् इतरेतराश्रयदोषात्। तच्चपक्षधर्मत्वेनहेतुनिरूपणात् मात्रपक्षधर्म्मस्यहेतु

पर्यवसायिनोनित्यंव्यक्तावसंभावितत्वाच्चानुगमेनवाऽयुक्तत्वादिति।किंचागोसादृश्यंविहायगवयत्वजातौगवयशब्दार्थ
ताप्रतीतिःकल्पनालाघवाख्यंतर्कमयास्यन्नस्यादितितदुपन्यासस्थितौकिमानुमानिक्येकत्तत्रगवयत्वस्यगवयपदवाच्यताप्रमि
तिरियंतेष्यतेसंभवतिहिप्रयोगः।विमतिपदंगवयशब्दप्रवृत्तिनिमित्तंतथात्वेतर्केणविषयीक्रियमाणविपर्ययकत्वात्।तयदेवंन
तत्स्वेयथागोत्वंतथाचेदत्ततस्तथेति।नह्यस्तिसंभवोमूलशैथिल्यादिदोषविरहिततर्कातिवाहितविपर्ययश्चार्थोनचतथेति।अथवा
गवयपदमसंभवत्प्रवृत्तिनिमित्तान्तरमनुपपद्यमानाश्लोकगोसदृशसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तकतामा
त्निपतेत्त्यर्थापत्तिरेवात्रप्रमाणमस्तु।साचत्वयाव्यतिरेकीकृतपूर्वेणपृथग्गवावश्यप्रमाणनीयेति॥शब्दोपिकुउच्यते।आ
सवाक्यशब्दःप्रमाणमितिनयुक्तंविकल्पानुपपत्तेः।तथाहिकोयमाप्तोनाम।यथार्थदृष्टवादीतिचेत्।नभ्रांतिप्रतिपन्न
वादिवाक्येपिप्रसंगात्।प्रमाणदृष्टेतिविशेषणेवतथाभूतस्यान्यथावादव्यापनात्।यथाप्रमाणेतिकरणेचाशितथा
भूतवादिवाक्यस्यायथार्थस्यापिव्यापनात्।यावद्यथाप्रमाणदृष्टनिरुक्तौचप्रायेणतथाभूतवादेवलक्षणात्तद्व्याप्तेः
नहियावत्प्रमितंतावदभिधीयते।यथाप्रमितस्यैववक्तुर्वाक्यमितिव्याकारेचयुधिष्ठिरवाक्यस्याप्येवंभूतत्वेनाव्याप्त्याप
तेः।तत्रविषयतिविशेषणेभ्यविशेषरूपस्यासाधारणेपनाव्यापकत्वापातात्।अथनिर्दोषवाक्यत्वंयथेतिचिन्त्या।सदोषस्यनास्ति
घटइत्यभिवित्सितोऽस्तिघटःशतिदेवान्निर्गतयथार्थवाक्याव्याप्तेः।तत्प्रमाणंतुनभवत्येवेतिचेत्।नपूर्वमुक्तोत्तरत्वात्प्रवृत्तिसामर्थ्य
नप्रामाण्यावधारणसंभवात्।आपाततःसंदेहप्यदोषात्।सामान्यतोनिर्दोषत्वस्यचमीमांसायेऽप्यभावात्।विशेषतस्तथात्वसा

खं·मू साधारणपपर्यवसायित्वात्। यथार्थवाक्यं शब्दः प्रमाणमित्यत्र को दोष इति चेत्। पूर्वोक्तयाथार्थ्यदूषणानि तावत्प्र
४९ थमः यथार्थमिति विशेषणस्य व्यवच्छेदकत्वाव्यवच्छेदकत्वयोः पूर्वदोषश्च द्वितीयः वाक्यत्वानिरुक्तिश्च तृतीयः तथा हि
किमिदं वाक्यं नाम एकार्थावच्छिन्नः पदसमुदायो वाक्यमिति चेत्। न। एकत्वविषयत्वात्तच्छिन्नत्वानां वाच्यातिदूषणा
नि तावत्संतु। पदपदार्थस्तु चिंत्यामः सुप्तिङंतं पदमिति केचित्। वर्णा विभक्त्यन्ताः पदमित्यन्ये। तत्र नाद्यः। प्रत्येक
मिति तस्य वाख्यापकत्वात्। पृथक्प्रवृत्तिनिमित्ततायां च वाक्यलक्षणाव्यापकत्वापातात्। नापि द्वितीयः। विभक्त्य
र्थस्यानुगतस्यासंभवात्। विभक्तिरित्यनेन सुप्तिङोः आग्दिशा विभक्तिरित्यनेन च तसिलादेः पृथगेव विभक्तिसं
ज्ञाविधानात्। शब्दसाम्येन च लक्षणायोगात्। किंच वर्णा इति बहुत्वस्य विवक्षितत्वे हमित्यादेरपदत्वप्रसंगः।
अविवक्षिते त्वेवं दत्त इत्यत्राकारस्य पदत्वापातात्। तस्य विभक्त्यन्तत्वात्। सार्थकस्तथेति चेत्। भवतीत्यादौ शचकारा
९ तस्य दीनां पदत्वप्रसंगः कर्तृवाचकत्वात्। यतो विहिता विभक्तिस्तदिति चेत्। न। शचकारं परित्यज्य पदप्रसंगात्। तन्म
ध्यपतितत्वाच्छप्कारिणि गृह्यत इति चेत्। तर्हि यत्र विभक्तिर्विधीयते तच्चेत् तद्विभक्तिमध्यपतितं च पदमिति वाविवक्षि
त। यत्र विभक्तिर्विधीयते तत्तद्विभक्तिमध्यवर्त्तिसहितं पदमिति वा। आद्ये शवकारस्यापि पृथगेव पदत्वप्रसं
गः। लक्षणस्याव्यापकता। द्वितीये देवदत्त इत्यस्यापदत्वप्रसंगः। मध्यवर्त्तिनोऽभावेन मध्यवर्त्तिसहितविशेषणा ४९
भावात्। कचिन्मध्यवर्त्तिसहितस्य कचित्केवलस्य चेति यथासंभवमिति चेत्। न। एकानुगतरूपानभिधानेलक्षणा

स्याव्यापकतापत्तेर्दुर्निवारत्वात्। किंच देवदत्तस्तित्पिपदं स्यात्। अथापशब्दोयं पदत्वे सतिरुत्वादेर्विधानताव
श्यंभावित्वदिति चेत्। नायत एवायमपशब्दस्तत एव भवतो दोषः प्रसज्जेत अपशब्दोपि पदलक्षणांगतमिति। त
स्मात् ॥ नावार्येण शब्दसिद्ध्यर्थं पदसंज्ञेयं रुत्वादिविध्युपरोधेनापशब्ददशायां मन्येवक्तृता। नदीसंज्ञावत्।
ननु लौकिकपदव्यहारसिद्ध्यर्थं साकृशब्दविशेषित तन्श्चतस्यान्यदेव लक्षणं वाच्यमन्यथा दाक्षीनंदनो
दीरित नदीसंज्ञा प्रसभिज्ञायां पाथः प्रार्थयमानः कानानस्थलीमलिकामिमानीहत। अथोच्यते विभक्त्य
तमेव सर्वलक्षणप्रवृत्त्यानिःपातं व्यावहारिकं पदलक्षणमस्तु। मैवं। सर्वलक्षणप्रवृत्तेः सर्वत्राभावात् संभवत्सर्वलक्ष
णप्रवृत्त्येति चेत्। न। संभवत्त्वं तत्कालिकालान्तरेवाविवक्षितं। आद्ये देवदत्तरुत्वस्पिपदं स्यात्। रुत्वविधानकाले विसर्गस्यासं
भावितत्वात्। कालान्तरेपीति देवदत्तेत्यस्पिपदं न स्यात्। इत्यादिपदपूर्वकालभावित्वपलोपादेरकरणात्। शब्दान्तरसन्निधिव्य
तिरेकेण पदावलिक्षणं तद्विवक्षितमिति चेत्। नजीविकार्त्तस्य व्याचष्ट इत्यत्र जीविकार्त्तत्वाव्याचष्ट इति प्रयुज्यमानेवाक्यस्या
त्व त्। एकार्थावच्छिन्नपदसमुदायस्यत्रापिगतत्वात्। केवलस्य नेसंकदद्जीविकामित्यस्यात्र पदलक्षणेन संगृहीतत्वात्। यदुपाधि
कायल्लक्षणप्रवृत्तिः तदुपाधिसंपत्तौ तेन निःपत्रेतथेति चेत्। यत्र नास्त्युपाधिसंपत्तिः तत्र केवलितस्यास्तामिमस्याभावा
दयत्वापत्तेः। यस्याभवस्थायां यस्य लक्षणं सोपनिपातः तत्सर्वसंपत्तौ विभक्त्यन्तं पदमिति चेत्। यस्यास्तवस्थायामित्यव
स्थानां भिन्नभिन्नाकारेण परामर्शे लक्षणस्याननुगमादव्यापकता दोषः। अवस्था नामैकत्वविवक्षितमसंभावितं च।
सर्वदा सर्वावस्थाविषयलक्षणप्रसंगादिति। स च भवति भवति भवतीति भवत्यस्तीति वा पदं स्यादिति वाच्यं घटं घट इति चे

गात्वापत्तेः। न द्वितीयस्तदनुव्यवसायोत्पत्तेस्तद्विषयाप्रतीतिप्रसंभवात्। न तृतीयः सामान्यस्यानंतर्भावितात्रयस्यापेक्षत्वप्रश
क्यत्वात् प्रागेवतत्सिद्धेः। नापि चतुर्थः तद्धिप्रतीयमानविरोधिव्यतिरिक्तत्वमसिद्धं स्यात्। नान्त्यः। तत्प्रतीतौ सामर्थ्यादनुपदर्शने
नानियमप्रसंगात्। न प्रथमः अनुगताननुगतजातिव्यक्तिचाक्षुषाचाक्षुषादिव्यक्तिगंधादौ तत्त्वादिनियतद्भयप्रमाता द्वात्म
विषयतीक्ष्णदा सविना विरोधासिद्धेः। तदुभयप्रतीतौ च तदवधारणे प्रागेव तत्प्रतीतेस्तार्थ्यात् पुनरनुवाद
कत्वापत्तेः। छ्या। योग्यानुपलंभोऽभावप्रमाकारणमित्यप्ययुक्तं प्रमाऽभावस्य तथात्वे भ्रमानुदयप्रसंगात्। उपलंभाभाव
मात्रस्य तथात्वे शंखधवलिमप्रतिसंख्यानवतः पीतभ्रमानुदयप्रसंगात्। कालभेदान्नत्राविरोध इति चेत्। तथापि संस्कृत्योर
न्योन्याभावाग्रहणप्रसंगात्। तादात्म्यस्य स्वरूपमात्रानतिरेकात्। अभावस्फुरणं च तत्प्रतीतिमानसंबंधीव्यात्। किंच योग्य
ता हि तत्सद्भविनाभूतान्यप्रतियोगित्रयापकस्याकेवलमिष्यते। तथा सति च यत्र भावोपलंभस्तत्राप्यभावप्रमा स्यात्। न हि तत्र हेतुव्य
तिरेकेणैव वा सत्त्वे वा भावप्रमोत्पद्यते। तत्तदविनाभूततद्विरहसहितः सत्तथेति चेत्। तदविनाभूतत्वं व्यतिरेकस्य तद्व्यतिरेकेण वा
न्यथासिद्धसन्निधेरपि हेतुत्वांगीकारे प्रमाणाभावात्। अत एवालोकस्याप्यन्तरेण न लोकांतरवत्तादवयवेनावयविनावालोके
नान्यथासिद्धसन्निधिरहेतुरित्यालोकाभावग्रहे सा नापद्यते। अर्थात्तद्योगस्तु नाव्याप्तोंश इत्यन्तरद्विरहसहितः सत्तथेति चे
त्। नाइंद्रियसन्निकर्षस्य हि प्रतियोग्युपलंभेता वद्धेतुतांगीक्रियते। तत्र किं सन्निकर्षव्यतिरेककार्योदयोदाहरणे मेघ्य्येन वान
यदि तदा सन्निकर्षस्य हेतुत्वे तत् कुतो मतत्वान्यथैव कर्यातस्त्रुपपत्तेः प्रसंगेवेत्। तर्हि तत्रैवोदाहरणे व्यवधायके नेंद्रियसन्निकर्ष
भ्रमे परमार्थतस्थाभावज्ञप्तकारणसंपत्तेरभावप्रमा स्यात्। तत्र व्यवधायकाभावः प्रतियोग्युपलंभको नास्तीति चेत्। न सन्निक

खं·प्र॰ ५१

व्यतिरेकस्य प्रमाव्यतिरेकप्रयोजकत्वावधारणोदाहरणमेव तर्हि तन्न स्यात्। अवधापकस्य सन्निकर्षविरोधित्वेनैव प्रमाविरोधित्वमिति चेत्। तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं न भावप्रमाविशेषोत्पत्ताविति स्थिते सप्रसंगसन्दंशस्थ एव। न च सन्निकर्षाभावादेव तदानीमुक्तकारणासंपत्तिः प्रतियोगिसन्निकर्षस्याभावप्रमोत्पादकत्वे नियते तदनुपपत्त्यापत्तेः। अत एव नाव्यवधानमधिकं कारणमेष्टव्यमिन्द्रियसन्निकर्ष एव तदुपपत्तेः। न चाभावसाक्षात्कारेऽपि प्राङ्नास्तिताग्रहे व्यभिचारात्। ननु व्यवधायकसद्भावे यत्र परमार्थतोऽस्त्यभावस्तत्रोक्तकारणात्तदभावावधारणमस्त्येव को विरोधो न तावज्ज्ञानयोगिन्यपि तावत्तत्तद्विरहप्रमाप्रसंष्ठित। तर्हि प्रतियोग्यभावसहितोऽनुपलम्भ एवाभावप्रमाणमस्तु। जहीहि योग्यताविशेषणनिवेशनव्यसनं योग्यताविशेषणाऽप्रत्नेऽप्यनुपलम्भमात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः कदाचित्तु संशयो जायते तत्कथं तथ्यं गीयते इति चेत्। तर्हि व्यवधानेऽप्येवमेव नियोग्यताविशेषणप्रयत्नेऽपि तुल्यं अपि च। मेयस्य वास्तवं सत्त्वं प्रमाणकोटावनिवेश्यमेव मेयवस्तुसत्त्वनिर्धारणार्थमेव हि प्रमाणाप्रमाणविवेचनं विचारकाणाम्। अन्यथानुमानेऽपि व्याप्त्युपाधिनिरासार्थमायासो व्यर्थः स्यात् व्याप्तपक्षमिताज्ञानमात्रस्यैव कारणत्वाङ्गीकारे सौस्थ्यात्। प्राङ्नास्तिताप्रमितौ च यद्यभावप्रमाणतां मन्यसे तर्हि सा न स्यामो तन्नेदानीं जायमानाभावप्रमोत्तवाऽभाववास्तवसत्ताविरहस्यापीदानीं क्वचित्संभवात् तत्फलविषयकालीकाभावोपलक्षिताप्रयादेः करणकोटिनिवेशने विशेषाभावात्। तदुपलक्षितस्यैव विशेषणस्य विशेषणत्वे चातिप्रसंगात्। तथापि सामान्यतो विशेषाभावोऽसिद्ध इति चेत्। न तथा सत्त्वे निर्वचनापातात्। कस्यापमसिद्धो नाम॥ ॥इति श्रीहर्षकृतौ प्रमाखण्डनं समाप्तम्॥ ॥

रामः ५१

तथा हि व्याप्तत्वपक्षधर्म्मताभ्यामप्रमितो ऽसिद्ध इत्यलक्षणं हेत्वाभासांतराणामपि ह्यसिद्धप्रवेशः एवं सति स्यात् । व्याप्तिय
क्षधर्म्मतांतत्वतीति चाविरुद्धतो हेतुदोषत्वासंभवात् ननु नेदमीदृशं । तथा हि केचिद्दोषा व्याप्तिपक्षधर्म्मतातत्प्रमितिवि
रहात्मानः केचित्तु व्याप्त्यादिमंगलिंगभूताः प्रतिबंधकतथानुमितेस्तेनि विरुध्यमानाश्च केचिद्दोषम्भूयं भजंते । तत्र प्रथम
तावदसिद्धमध्यमभ्यासते । तद्यथा व्याप्तत्वासिद्धः सोपाधित्वरूपः अनौपाधिकसंबंधता हि व्याप्तिः सोपाधिता ऽनुपाधि
ताविरहरूपैव । एवमधिकरणासिद्धिरथसिद्धावेवांतर्भविष्णुः पक्षदोषात्तस्य अन्वयस्य व्यतिरेकरूपा हि साऽसिद्ध
साधनमपि तथैव सिसाधयिषितधर्मविशिष्टो हि पक्ष उच्यते यत्र सिद्धं न तत्र सिसाधयिषास्ति ततो विशेषणाभा
वात्पक्षो विशिष्टस्य पक्षरूपस्य तत्राभावः । तत्र वाच्यं यथा सव्यभिचारत्वाद्द्व्याप्तिकमिति पृथगेव सव्यभिचारस्य
दोषत्वं तथासिद्धत्वात्तत्र सिसाधयिषा नास्तीति सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति लिंगद्वारेणासिद्धिपर्यवसायि
त्वात् । अन्यथा व्याप्त्यादिविरहपर्यवसायितामात्रेण सव्यभिचारत्वादीनामप्यसिद्धावेवांतर्भावः स्यादिति । य
तः सिसाधयिषाभावान प्रतीयते ऽसिद्धत्वाल्लिंगाक्रम्यते किंनामेच्छाभावस्य तस्य यथादर्शनं प्रत्यक्षादेरेवाधिग
मः । इच्छैव तु तत्र यत्रास्ति तत्र सिद्धत्वं प्रयोजकमित्येतावन्मात्रेणासिद्धत्वमुपन्यस्यते सिद्धसाधनेन न विच्छाभावमनुमातुं
लिंगतयेति । एवंस्वरूपासिद्धिरपि पक्षधर्मताविरहरूपैव पक्षव्याप्तिपक्षधर्म्मताविरहलिंगभूतास्ते सिद्धतः पृथगेव हेत्वा
भासाः तद्यथा विरुद्धः साध्यविपरीतव्याप्तः तत्र साध्यव्यतिरेकव्याप्तता हेतौ न साध्यव्याप्तता ऽभावः किंनामसाध्यव्य

ख॰म॰ तिरेकेण सहानौपाधिकः संबंधेन्य एवासौ। इष्ट एव पक्षधर्मताविरहात्मापि नायं किं नाम तत्तः साध्यव्यतिरेकेण स
५२ हनिरुपाधिसंबंधत्वात् साध्यव्याप्तिरसंतासौ समनुमीयते। तथा सति विसाध्यव्याप्तिव्यतिरेकलिंगं सिद्धिरूद्धः पृथगेव हेत्वाभा
सो भवति। एवमेनकान्तिकोपि न व्याप्तिव्यतिरेकरूपः किंतु तल्लिंगमेव। तथाहि। हेतोरत्वपस्यव्यतिरेकस्य वाव्यभिचारो
न साध्यसाधनव्याप्तिविरहात्मा किं नाम व्यभिचारो हेतोः साध्यव्याप्तिविरहं विना न संभवतीति लिंगाभावे न व्याप्तिभंगं
बोधयति यदि हि निरुपाधिः साध्येन संबंधोस्य भवेत् कथं व्यभिचरितुं शक्नुयात्। तस्माद्व्याप्तिविरहलिंगं व्यभिचारो न तु व्या
प्तिविरहः। पक्षधर्मताविरहरूपता त्वनैकान्तिकस्याऽसंभाविते व सत्वात्तिपक्षतायांचानवगम्यमानविशेषप्रतिप
क्षप्रतिरुद्धतया यत्साध्यानिश्चयाजनकत्वं हेतोः सप्रतिबंधकसङ्ग्रोक्ता यीजनकत्वमितरकारणसाकल्ये वस्तु
स्वभावः तस्य व्याप्तिपक्षधर्मताविरहरूपताऽसंभाविते च बाधकस्य साधनवतिपक्षे साध्याभावबोधनात्मा भवन्नपि तव्याप्तिविरहात्मा वग
मरूपः सामान्यतो नौपाधिकसंबंधरूपा हि व्याप्तिः साधनवति च साध्यविरहो न सोपाधिता साध्याविरोधिस्वभावत्वात्तस्याः नाप्यसौ सा
मान्यतः साध्यसाधनसंबंधविरहरूपः बाधेसत्यपि सामान्येन साध्यसाधनयोः संबंधस्य दृष्टान्तावगतत्सानपतायात्। बाधस्य किं रामः
चिद्विशेषविषयत्वात्। सामान्याकारपरिगृहीतस्य च संबंधस्य विशेषान्तरमात्रपर्यवसायिताविरोधात्। तस्माद्विशेषबाधेन सामा
न्यतः संबंधस्य सोपाधिता अनुमीयते निरुपाधित्वे बाधानुपपत्तेः। यथा ह। बाधको पाधिरनुमीयते। नव्यावतिन कश्चिद्विशेषः इति। अ
न्यस्तु सप्रतिपक्षवत्बाधस्यापि प्रतिबंधकत्वमेव तेन बाधे सति प्रतिबंधाभावान्निश्चयं न करोति हेतुः इति व्याप्तिपक्षधर्मतादोषमनालो ५२
च्यान्यथैव बाधस्य दोषत्वमित्याह। तस्माद्व्याप्तिपक्षधर्मताप्रमितत्वानां यत्र साक्षादेव विरहस्तोऽज्ञानं तत्रासिद्धः। यत्र तु व्याप्त्या

ख॰म॰ एवानन्यादृत्तीन्द्रियोपाध्यादिलिंगानां येषां पूर्वमनभिधानं समर्थितं तेषामनभिधाने यमपि हेतुः। तानि धुपाधिलिंगानि नार्थवशादुपा
५३ धिमनपेक्षाणि गमयंति न तेषां व्याप्तिग्रहावधारिता तत्प्रतिपादनमंतरेणाऽप्रतिपादकत्वस्यापि संभवात्। अनैकांतिकत्वाद्यवगतेस्तु भा
ष्यादिविरहवीक्षयन प्रतिपादनीयांतरोपन्यासकस्य चित्तचेतसः संभवतीति पूर्वपक्षसंक्षेपः। एवमसिद्धलक्षणे व्यवस्थापिते बाधोपमसि
धीयते एतेनेकीदृशमसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति। ननु त्वपक्षधर्मत्वाभावमप्रमितेऽसिद्ध इति तावत् विरुद्धादिष्वुल
क्षणं किं नास्ति किं वास्ति यदि नास्ति तदाव्याप्तिपक्षधर्मत्वाभावप्रमिति विरुद्धादयः प्राप्नुवंति। अथास्ति तदा तेषामसिद्धभेदाः। अथैतस्मि
ल्लक्षणे सत्यपि ते नासिद्धान्तर्भूताः तर्हि लक्षणमिदमतिव्यापकमापन्नं। अथ यत्र व्याप्तिपक्षधर्मत्वाप्रमितत्वं साक्षादुद्भाव्यते तत्र
सिद्धमित्युच्यते। न तर्हि लक्षणांतरमिदमुक्तं स्यात्। न चेदमपि युक्तं। यत्र व्याप्यत्वासिद्धिर्व्याप्तिविरहमात्रं प्रतिपाद्यते तत्र व्याप्तिपक्षधर्मताप्रमि
तत्वानांहानं मिलितं नोद्भाव्यत इति नासावसिद्धः स्यात्। एवं सर्वासिद्धिविशेषेष्वुदाहृत्य प्रसंगो विभावितव्यः। अथ प्रत्येकमिदं लक्षणं व्या
प्यप्रमितत्वासाक्षादुद्भाव्योऽसिद्धः पक्षधर्मत्वाप्रमिततया चेति। तर्हि अमीमीदाहरणाव्याप्तेरव्यापकत्वमुच्यते। अथोभयोरप्य
सिद्धविशेषणलक्षणत्वादस्मोमविषयाव्यापकता न दोषायेति मन्यसे। न सामान्यलक्षणं निर्वक्तुमशक्यं कथमिदं विशेषल राम:
क्षणमपि घटेत। अथानुमितेरसाधारणहेतुव्यतिरेकोद्भावनं सामान्यलक्षणमस्त्वमेवं सत्प्रतिपक्षोद्भावने तथैव स्यादिति व्याप्तेः भा ५३
वरूपतया हेतोर्विशेषणेन च निरूपाधित्वमतिरेकोद्भावना व्याप्तेः। स्वरूपासिद्धिः सर्वप्रमाणासाधारणो दोष इति तदुद्भावना व्या
प्तेश्च। अथोच्यते। व्याप्तत्वपक्षधर्मतां प्रति तत्त्वस्य व्यभिचारेको व्यतिरेको यत्र साक्षादुपन्यस्यते सोऽसिद्ध इति। इदम
प्युलक्षणमव्यापकत्वात्। यत्र व्याप्त्यादिव्यतिरेकः उपलस्यते तत्र व्यस्तगमा व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तकनाम नेनूप

न्यस्यतेपिप्रयोजनाभावात्व्याप्तिव्यतिरेकदर्शनादेवानुमानांगवैकल्यात्मनोदोषस्योद्भावनपर्यवसानात्।तस्मात्तत्र
तत्प्रमितत्वव्यतिरेकोद्भावनेनास्तीत्यव्यापकत्वंदोषः।ननुविशेषणाद्यभावोपिवस्तुतोविशिष्टाभावएवेतिनोक्तदोषः।न
यदिविशेषणाद्यधिकोविशिष्टस्तदातदभावभेदोपिस्यात्।अथनाधिकस्तदाविशेषणाभावान्नान्यास्यविशिष्टाभावतेति
विशेष्याभावस्यापितथात्वेपृथगेवविशिष्टाभावार्थस्तयोरित्यननुगमएव।स्वार्थानुमितसिद्धावव्याप्तिस्यानुद्भावनादि
ति।अथत्रुषे।यत्रव्याप्तत्वपक्षधर्मत्वप्रमितिव्यतिरेकःसाक्षाच्छक्योपमासः।तदसिद्धंशक्योपमासत्वस्यानुपमस्तेपिसंभवा
ज्ञास्यव्यापकतेति।नैतदपियुक्तं।तथाहि।शक्योपमासत्वंकिंशक्यस्वरूपनिर्देशमात्रेउतशक्यप्रमापणत्वं।आद्येनैकांति
कादावपिव्याप्तिस्फूर्त्तेशक्यप्रतिज्ञंभवत्येवेतिव्याप्तिः।द्वितीयेपियदिसोपाद्यादितिप्रसक्तेनसमर्थःतदाप्रसक्तेनप्रमापणी
यत्वंव्याप्तिधर्मताप्रमितिविरहस्यप्रसक्तप्रतियोगिकाभावप्रसक्तताबादिमतेविरुद्धादावप्रसक्तीसतिव्याप्तिः।अप्रममेत
नकेचिदपीतिसर्वाव्याप्तिः।अथव्याप्तिपक्षधर्मताविरहस्यापिप्रसक्तत्वप्रमापणीयताविवक्षितासानयुक्ता।उक्तलक्षणवाक्य
स्यव्याप्तिपक्षधर्मताविरहमनभिधायित्वात्।तद्विरहेपितात्पर्याभ्युपगमप्रसक्तकेसमुक्तिलक्षणाक्लिष्टेनाव्यापकत्वापातात्।अती
न्द्रियपक्षादिविरहेचविपर्ययतदभावाद्व्यापकस्यापत्तेः।एतेनयदिलिंगानपेक्षत्वेसाक्षादर्थःसोपिनिरस्तः।अथोच्यतेयत्रव्या
प्तत्वपक्षधर्मत्वप्रमितिव्यतिरेकाप्रतिपादनीयात्तरानपेक्षतेपातत्समापकेस्यलिंगस्योपमासव्यतिरेकेणशक्योद्भावनंतदासि
द्धंतस्यपपक्षेप्रतिव्यापकत्वात्।तथाहिविरुद्धादावपिशक्यतेतावद्विपक्षचरत्निदेशभूततर्काभावात्सोपचिंताऽवगंतुयदाह
यत्रानुकूलःतर्कोनास्तिसोप्रयोजकइति।तस्मात्तेषामप्यवलक्षसायोगित्वादसिद्धत्वप्रसंगः।नचनादृशतर्काविषयत्वम

स्व॰मू॰ विप्रतिपाद्यनीयात्तरानपेक्षत्वात्तिस्य स्वधर्म्मताप्रमितिविरहप्रमापकं लिंगमुक्तमेवेति वाच्यात्। तथा सति विरुद्धत्वादिवत्तस्य हेत्वा
भासांतरत्वप्रसंगात्। अथोच्यते तथोपन्यस्यमानं तदसिद्धं भवतु साध्यविपरीतव्याप्तत्वादिनात्वस्यमानं विरुद्धाद्येव तत्। उ
५४ पन्यासप्रकारभेदात् भेदव्यवहेत्वाभासानां। नहि अगोत्वाणुत्वादिवदत्यंतासंकरस्त्विष्यते किं नाम प्रमाणप्रमेयभाववत् प्रकारा
संकरमात्रमिति तदप्ययुक्तमभिधानं वक्तव्यं हि किं न प्रकारेणासिद्धत्वं भवति न तावद्दुष्कलक्षणेन तथा यक्योद्भावनत्वस्य विरु
द्धोचितप्रकारेणोपन्यस्यमानस्य संभवात्। सर्वथा निःप्रकारकस्यासिद्धधर्म्मिणउद्भावनाशक्यत्वात्। न च तथा शक्योद्भावन
त्वमप्यहाप्यते असिद्धे येन प्रकारभेदव्यवस्थितिरनेन न भवेत्। न च शक्योद्भावनपदस्थाने उद्भाव्यमानत्वमिति निवेश्य निस्ताः
सोपाधिकत्वे नेप्रमितस्याभावोद्भावने व्यर्थत्वात् क्रियतइति तद्व्यापकत्वं प्रसज्येत प्रागेवोक्तत्वादिति। एतेनासिद्धः साध्यसम
इति प्रत्युक्तं यथा कथंचित्साध्यसाध्यस्य सर्व्वसाधारणत्वात्। साध्यशेषस्य चोक्तप्रकारपर्यवसानव्यतिरेकेणान्यस्याभावा
त्। लक्षणांतरेष्वप्युक्तदूषणप्रकारा यथासंभवमिह योजनीया इत्यलं विस्तरेणेति। अपि चासिद्धलक्षणविशेषणेषु प्रमा
णक्वचेद्धेदकव्यतिरिक्तेन यद्यवच्छेद्यं किं तत्। केनचित्तु विरुद्धे केनचिदन्यदिति चेत्। विरुद्धमेवात् किमुच्यते। तथा हि साध्यविप
रीतव्याप्तो विरुद्ध इत्याह। तत्र साध्यव्यतिरेकेण हि व्याप्तिः कार्त्स्न्येन वा नोपाधिको वा स्वाभाविको वा संबंध इत्यायुक्तिभिः स रामः
विशेषणः सहभाव एव निरूप्यते। तथा च सति साध्यव्यतिरेकेण सामानाधिकरण्यमेव विशेषणं विशेष्यमुक्तं विरुद्धमित्युक्ते
स्यात्। यदि चैवं तत्साध्यव्यतिरेकेण सामानाधिकरण्यमेव हेतोरवगमकत्वे समर्थमिति तन्मात्रमुद्भाव्यं हि तथा विशेषणप्रवृत्त ५४
पः। तथा चानैकांतिक एवायं स्यात्। ननु साध्यव्यतिरेकसंबंधो यद्यपि विरुद्धानैकांतिकयोर्द्वयोरप्यस्ति तथापि वस्तुगत्या स्वा

भाविकोसौविरुद्ध एवेत्येतावन्मात्रविशेषविवक्षयाविरुद्धस्यानैकांतिकाद्भेदायन्मासःमैवं दृत्तोत्तरत्वात्तावस्कगतास
त्प्पयविशेषणोद्भावनाहीइत्युपेक्षणीयइत्युक्तं तथाहि। नेदमस्यसाधकं एतत्साध्यप्रतिविरुद्धत्वादित्तिभिधीयमाने
विरुद्धशब्दार्थानिरुक्तौविशेषणाधिक्यस्याक्रमायेन दुःपरिहरित्वात्। अतस्त्वानैकांतिकेसंदेहेनप्रस्तवस्यानविरु
द्धेतुव्यतिरेकनिश्चयेनेतिविशेषणदूषणदोषत्वात्तावन्मात्रंज्ञाप्यत्वेचहेतुविपक्षसंबंधोद्भावनमात्रादेवगम्यतेतस्माद्धेतु
मितिहेतुव्याप्तिव्यतिरेकबाधनायसंशयेव्यतिरेकनिश्चयेवोद्भाव्यमानेपिकृतस्त्वावबेस्त्रविपक्षसंबंधतन्नियतत्त्वसंबंधा
वस्थायमस्याविततिन्नसंबंधमात्रमेवास्त्वात्तत्संस्मितेश्चव्यतिरेकस्यलिंगत्वादुद्भाव्यंकतमितराम्यामितिलकोरेमदृश्य
योगतेस्मैलेकारेःकालविषयविशेषप्रतिपादनवत्विभक्तिभिर्लिङ्गसंख्याज्ञापनवत्। यद्वतोग्रिमानिमादेविर्म्यादिप्रति
पादनवच्चनेदंष्टेतेतत्रतेषामतात्पर्यविषयानामपिपदप्रयोगविशिष्टबोधनेवान्यथासिद्धानांयथाबोधनेतथापदत्र
पिव्याप्तेरतात्पर्यविषयत्वंतदानैकांतिकसाधारणादेवअन्यथोक्तदोषापरिहाराद्देवेति। अनैकांतिकत्वंचानुद्भावयतानपि
गच्छतावाविरुद्धमशक्योद्भावनमशक्याधिगमंचेतितदुपजीवितान्नपृथगुहूषणविशेष्यप्रतिपादनेविशेष्यावगमंचापि
नाविशिष्टप्रतिपादनस्यविशिष्टावगमस्यवाऽशक्यत्वात्। एवमन्यत्रापिविशेषणस्याप्रयोजकताविशेष्यणामर्थ्येषयमू
हनीयातद्यथा। इदमसाधनंसाधारणानैकांतिकत्वादित्यत्रसाधारणेतिविशेषणेसपक्षविपक्षगामित्वादित्यत्रसपक्षगतत्व
स्युद्भाव्यमाना एवमसाधारणेपीति इदमसाधकंजातित्वादितिजातित्वविशेषेचनेघव्याघातकमुत्तरंजातिरितिस्वव्याघातस्यैवस

खं·मः र्व्वपसत्त्वज्ञेयत्वादित्यादिजातीति साधारणस्वरूपेण समर्थत्वेनोत्तराभिधानं किंच साध्यविपरीतेति साध्याभावेत्यर्थे यदात्र
५५ भावातेनैव साध्यं क्वचिद्वृत्तितत्र तद्विपरीतस्य भावत्वं न दमापकत्वे लक्षणस्य न च विपरीतशब्दस्य विरोधिमात्रार्थत्वे भावा
भावोभयव्याप्तिरिति वाच्यं। सहानवस्थानं हि भावाभावयोर्विरोधत्वं प्रकल्पयते। अनवस्थानं न संसर्गनिषेधः। स च भावा
भावयोरन्योन्यस्यानवस्थानमेव परस्परप्रतिषेधरूपत्वात्तयोः। तथा सति च भावाभावयोः स्वरूपस्यानुपसंग्रहेण
त्यैकमव्याप्तिर्मिलितस्यासंभव एवेति विहायामत्र भावाभावयोर्विरोधं निरुक्तिनिराकरणमुपरिष्टादिति। किंच। व्याप्तेप
दिनलक्षणप्रविष्टेन किंस्यव्वछेद्यं। अनैकांतिकमिति चेन्न। किं तदनैकांतिकं। तथाहि। अनैकांतिकः सव्यभिचार इत्यल
क्षणं सव्यभिचारत्वं यदि विपक्षवर्त्तिता तदानीं विरुद्धेपि प्रसंगः। असाधारणानैकांतिकाव्याप्तिश्च। अथ सपक्षविपक्ष न
गताभावता तदा साधारणोदाहरणाव्यापकत्वात्। अथोच्यते सव्यभिचारित्वं सपक्षविपक्षसाधारणता भिन्नता सा च अन्वयेन सा
धारणस्य व्यतिरेकेण साधारणस्याऽनैकांतिकस्य संग्राहिका सपक्षविपक्षसाधारणतामात्रत्वं चान्वयेन व्यतिरेकेण चेति शि
धारणस्यव्यतिरेकेण साधारणस्याऽनैकांतिकयोरुभयोरपि संग्रहः। विवादाध्यासितद्व्यणुकं सत्त्वादित्यादेर
षवत्त्वया नवविवक्षितत्वात्साधारणासाधारणानैकांतिकयोरुभयोरपि सग्रहः। विचार्यमेतद्व्याख्यानं परमस्कृता राम:
नुपसंहार्यस्यापि सपक्षविपक्षव्यावृत्तत्वादेव सपक्षविपक्षगतस्वाभावेन साम्यमिति। विचार्यमेतद्व्याख्यानं परमस्कृता ५५
वदापातततः। तथापि व्यतिरेकेण सपक्षविपक्षसाधारणतायाः सपक्षाव्यापके सद्धेतौघूमविशेषादौ गतत्वेनातिव्यापक
त्वां यदित्वस्य दोषस्य परिहारार्थं सर्व्वसपक्षविपक्षसाधारणमनैकांतिकमिति ब्रूषे। तदा व्यतिरेकमात्रेण सर्व्वसपक्षवि

पक्षसाधारणता।धूमानुमानादिगामिनी सा भवतु नाम। अन्यपेतत्तु सर्वसपक्षविपक्षसाधारणता।। विपक्षसपक्षैकदेश
गामिनं साधारणानैकांतिकं शब्दो ननित्यः प्रत्यक्षग्राह्यत्वादित्यादिकं न संगृह्णाति। तस्मात्रिरितिस्कं सर्वेपितस्ततोपरम्प्रच्युवते।
अपि चान्वयव्यतिरेकाभ्यां सर्वसपक्षविपक्षगतत्वाद्धूमानुमानादौ सर्वप्रसंगः विशेषणरूपेण तयोरविवक्षितत्वादिति
किंच सर्वसपक्षविपक्षसाधारणमनैकांतिकमितिवाक्ये यदि सर्वेति विपक्षस्यापि विशेषणं तदा विपक्षैकदेशवृत्तेः सपक्ष
व्यापिनः साधारणानैकांतिकस्य त्रसरेणुः कार्यावयवकोमहत्त्वानुद्घट्वादित्यादेरव्यापकं लक्षणमिदं। अथ सर्वेति विपक्षस्य न वि
शेषणं तदा व्यतिरेकमादाय विपक्षसर्वपक्षसाधारणमनैकांतिकमिति विपक्षैकदेशमात्रवृत्तौ विरुद्धेतिव्याप्तिर्नित्या सावयवत्वादि
त्यादेगतत्वादतिव्यापकमिति। कालेयं वाचोयुक्तिः सपक्षविपक्षे साधारणमनैकांतिकमिति लक्षणे सर्वं संगृह्यते। अन्वयेन
व्यतिरेकेण चेति कथमनुपसंहार्यस्याऽसत्त्वपक्षविपक्षस्य सपक्षे विपक्षे वान्वयेन व्यतिरेकेण वा साधारण्यस्यात्तयोरेवा
भावात्। यद्यपि सपक्षे विपक्षे च साधारणत्वमुभयत्र तत्स्वरूपानुगमो विवक्षितस्तदानीमसाधारणानैकांतिकासंग्रहः।।
अथोभयस्मिन्नुतास्मिन्नसत्त्वं तद्विवक्षितं तदा सर्वाव्याप्तिः। तत्सत्त्वे स्यात् तद्धर्मित्वात्। अथ तदुभयवृत्त्यभावप्रतियोगित्वं तदु
भयसंबंधस्याऽभावः तदाश्रयत्वं वाभिप्रेतं। तदापि साध्यकरणोदाहरणाव्याप्तिः। अथ मन्यसे तदुभयसाधारणं नाम एक
स्मिन्नरूपहेतोः सत्त्वमसत्त्वं वा तादृग्रूपपरास्मिन्नपि यत्तदुच्यते। तथा सति नाव्यापकतादोष इति। मैवं मुख्यस्यावद्वचना
र्थो नोपपद्यते हेतोरेकरूपस्य सपक्षविपक्षाश्रयत्वविति। किं नाम एकरूपवतो हेतोस्तावाश्रयो इति स्यात् तदा चासाधा

र्व॰ मू॰
५६

रणाव्याप्तिः। तत्र सपक्षे विपक्षे हेतोरसत्त्वेन तदाश्रयत्वासंभवात्। तस्मात्सपक्षे विपक्षे वा साधारणत्वे हेतोरनैकांतिकत्वमितरनु
पपन्नमेव। असत्त्वपक्षे च हेतोस्तदाश्रयत्वानुपपत्त्या सपक्षे विपक्षे वेति सप्तमीनिर्देशस्यासंगतत्वात्। तदभावापेक्षपात्र
श्रयत्वस्योपपत्तौ हेतोस्तदाश्रयत्वे किमायातं। आयातु वा किंचित् तथापि साधारणोदाहरणेषु हेत्वभावापेक्षया सप
क्षविपक्षयोर्नाश्रयतासन्नम्यर्थः किंतु हेत्वपक्षतयैवेत्येकार्थीययावसायित्ववाक्यस्य लक्षणव्यापकतापत्तिरेव। किंच स
पक्षविपक्षसाधारणत्वं यदि सामान्यतो लक्षणं साधारणासाधारणानैकांतिकभेदद्वयसंग्रहार्थमुच्यते। तदा सपक्ष
विपक्षयोरसत्त्वादिभिर्हेतोः साधारणमस्त्वन्यत्रापी सति व्याप्तिः अथातिव्याप्तिपरिजिहीर्षया अन्वयव्यतिरेकाभ्यां स
पक्षविपक्षसाधारणमनैकांतिकमित्युच्यते। तदान्वयव्यतिरेकयोः प्रत्येकमिलितत्वविकल्पानुपपत्त्याऽव्यापकत्वापातः
स्यादेतत् स्वस्वाभावविरोधाश्रयाश्रितसपक्षविपक्षत्वं सपक्षविपक्षसाधारणपविवक्षितमेवं नाव्याप्त्यतिव्याप्ती इति॥
तदसत्। तथाहि। अस्तु तावत्सर्वपदविशेषणोपादानानुपादानपक्षोक्तदोषापातः। सर्वशब्दोपादाने धूमानुमान
दोषसंगमः स्वस्वाभावविरोधपदार्थस्याननुगतस्यासंभवेन लक्षणाननुगमाभावो दोषः। तत्तद्भावयोर्हि विरोधे सह
नवस्थानं अनवस्थानं अनवस्थानं वाऽवस्थानप्रतिषेधे न च तत्तदवस्थाभावस्वरूपादन्यत् नवाभावसाम्यनवस्था
नभावस्वरूपादन्यत्। किंतु तदेवभावविरोधाश्रयइत्यस्य नार्थैक्यं किंचिन्मूल्यप्रमाणमभवाप्यते। स्वभावविरोधाश्रयइ
तिवचनैर्विचारमर्हति। स्वस्वाभावयोर्विरोधविशेषणतयाऽऽधेयकोटिनिवेशात्। विशेषणघटितमूर्त्तित्वाद्विशिष्ट

राम॰
५६

पदार्थस्य तदाधारत्वानुपपत्तेः। अतिव्यापकता वा स्यात्। अन्वयमादाय सपक्षे व्यतिरेकमादाय च विपक्षे वर्त्तमानस्या
प्युक्तलक्षणोपेतत्वात् स्वस्वाभावाविशेषितस्य विरोधस्याश्रये ऽभिधीयमाने सर्वानुमानव्यापकत्वम् अनैकान्तिकलक्षण
स्यापतेत्। न च वाच्यं स्वस्वाभावोपलक्षितो विरोधो ऽभिमतः तेन विशेषणपक्षोक्तस्य दोषस्यनावकाश इति यतः स्वस्वा
भावाभ्यां विरोधमात्रं वा लक्ष्यते तद्व्यक्तिर्वा काचित्। आद्ये यदेव स्वस्वाभावाभ्यां लक्षितं विरोधमात्रं तदेवामदपीष्टक्ता
तिप्रसक्तिस्तदवस्थैव स्वस्वाभावयदोपादाने चैयर्थ्यं च॥ अथ द्वितीयः। तदा लक्षणस्याननुगमः एकस्य विरोधव्य
क्तिविशेषस्यापरिगृहीतस्यापरविरोधव्यक्त्युपनायकत्वात्। अथ यावत्यो ऽपेक्षिता विरोधव्यक्तयः ता उपलक्ष्यन्तामित्युच्य
ते किं नोपलक्ष्यन्ते किंतु केनचिदनुगतेन रूपेण उत प्रतिस्वं व्यावृत्तेनात्मना। प्रथममेतदेवोच्यतां किमुपलक्षणप्रया
सेन न च तत्संभवति विरोधमात्रादेरतिप्रसंजकत्वात्। प्रतिस्वं व्यावृत्तेन व्यक्तीनामात्मनोपलक्ष्यत्वे तथैव ता
सां लक्षणप्रवेश इति मिलितानां लक्षणत्वे सर्वाव्याप्तिः प्रत्येकं लक्षणत्वे परस्परोदाहरणाव्याप्तिरिति स्यादेतत्। स
पक्ष एव विपक्ष एव वर्त्तते न पुनः सो ऽनैकान्तिक इति लक्षणमस्तु तेन साधारणासाधारणानैकान्तिकोदाहरणाव्याप्तिर्भ
वतीति। एतदप्युक्तलक्षणं सद्धेतौ धूमादावपि गतत्वात् नस्तसो विपक्ष एव वर्त्तते। सर्वथा तत्राप्रवृत्तेः। नापि सपक्ष एव प
क्षेऽपि वर्त्तमानत्वात्। अथ पक्षवृत्तिरिति विशेषयसि तथापि सद्धेतोरपरित्यागः पक्षवृत्तित्वादेव सपक्ष एव वृत्तेरभा
वात्। असिद्धानैकान्तिकसंकराव्याप्तेश्च। अथ पक्षव्यतिरिक्त इति प्रक्षिपसि तदानीमप्रसक्त्या चर्चनमनुपप

खं·म· न्नं। नहिपक्षाद्व्यतिरिक्तः सपक्षो विपक्षो वा संभवतीति सपक्षस्य विपक्षस्य च कुतश्चिद्व्यावर्त्तकविशेषणमेवेदं तयोः
कथं घटते अथ पक्षव्यतिरिक्ते वर्त्तमान इति विशेषणे सति तदानीमसाधारणाव्याप्तिः नासौ पक्षव्यतिरिक्ते वर्त्तमानः। अ
५७ थ पक्षव्यतिरेकेणेति विशेषणमुपादत्से। तदापि पक्षव्यतिरेकस्य पक्षाविरहरूपस्योपलक्षणत्वे वा हेतुत्वे वा द्वयमपि
पक्षमात्रवृत्तावसाधारणानैकान्तिके न संभवति पक्षविरहस्य तत्रासंभवादेव निष्प्रयविशेषणत्वे तस्य सद्धेतौ गमनं स्या
त्। एतेन पक्षं विना पक्षमंतरेण आद्यपक्षेरेघविशेषणाभिधानमपास्तं। अथ यदि पक्षव्यतिरिक्ते वर्त्तते तदा सपक्ष एव वर्त्त
तेनयः सोनैकान्तिकः तथा सत्यसाधारणस्यापि व्याप्तिः। सद्धेतौ वा प्रसक्तिरिति मन्यसे। तदा भ्रान्तोसितरां। एवं हि सति नो
भयस्यापि संग्रहः। असाधारणे तावत् यदि पक्षव्यतिरिक्ते वर्त्तेत इत्येतन्न संभवति। तस्य पक्षमात्रवृत्तेः कदाचिदपि पक्षव्य
तिरिक्तवृत्तिसंभावनानुपपत्तेः साधारणेपि निश्चितसपक्षविपक्षवृत्तौ यदर्थं न पश्यामो यदि पक्षव्यतिरिक्ते वर्त्तेत इति। न
हि निश्चितवृत्त्यभावायां संशयायां प्रयुज्यते यदि संशयाद्वृत्तिः स्यादिति। तत्कस्य हेतोः संशयो यस्यापि तत्कोटिद्वया
दिकस्यां कोटौ तदा अयं किंचिद्धर्मोपदर्शनार्थमारोप्यमाणायां यदीति प्रयुज्यते। ननु निश्चित एव वर्त्तनी। तस्मादसाध
रणानैकान्तिकसंग्रहाय यदीत्याद्युपात्तं तन्न साधारणमपि संगृह्णीत। अथ विपक्ष एव हेत्वाभासत्वावधारणे तत एव रमः
हेतोरसाधकत्वं सिद्धमिति कृतं तदुपजीविनवैकान्तिकत्वोपन्यासेन। अथाग्रे हेत्वाभासत्वं नावधार्यते। तदा लक्षणस्य ५७
दुरवधारणत्वं विशेषणस्य हेत्वाभासत्वस्यानवधारणात्। अथ स्वरूपे। असिद्धविरुद्धप्रकरणसमकालात्ययापदि

तं

षादृशो हेत्वाभासोऽनैकांतिक इति तद्दूषकत्वं न्याये नैव निरस्तं। किंचैवमसिद्धादिसंकीर्णस्यानैकांतिकस्य न संग्रहः स्या
त्। न च तत्र तदसिद्धत्वादेवाहेतुत्वं भविष्यतीति वाच्यं। इतरानैकांतिकवत् विपक्षगतत्वादिनाप्युद्भावने दोषत्वसंभवात्।
अत्र मन्यसे साधारणत्वासाधारणत्वयोर्व्यतिरेकाभ्यां मिलिताभ्यां विशिष्टादन्यत्वं साधारणासाधारणानैकांति
कसामान्यलक्षणमस्तु मैवं यदि व्यतिरेकद्वयविशिष्टादन्यत्वं तर्हि तस्य विशिष्टस्य विशेष्यविशेषणे चेदमस्तीत्य
तिव्याप्तिः। यदि च व्यतिरेकद्वयवनोपलक्षणं तदोपलक्षणरूपाणां यद्विभेदेनैवोपलक्षता तदा व्यतिरेकोप्यविशि
ष्टे तस्मिन्नस्ति। न हि यद्देवाविशिष्टं तन्मात्रं विशिष्टं एवमभेदेनापि भेदाभेदात्तद्देव तदपीति चेत्। न। अत्र तदपीति प्र
संगतादवस्थ्यात्। ततो लक्षणासत्वं लक्षणमिति चेत्। नासिद्धादिसंकीर्णानैकांतिकोदाहरणाव्यापनात्। स्व
रूपाणां नानात्वेन तत्प्रतियोगिकान्यत्वावधारणस्यात्तु शक्यत्वात्। तेषामानंत्यात्। तन्मध्यव्यतितकतिय
यान्यत्वे चासत्रकतिपयेप्रसंगतादवस्थ्यात्। उपलक्षणत्वे न चोभयव्यतिरेकस्यान्यत्वप्रतियोगिकोटिप्रवेशनात्तत्स्व
गृहीतव्यतिरेकपक्षपातात् एवं चाहृष्टवाणादिनागात्वादेर्वेभूताहारणादिविपाणित्वाद्नुमानौचित्यापातात्। हेत्वा
भासान्तरमध्ये वं किं तत्समग्राहीदिति वा समानायदेवानुयोरितरेभ्यो वैधर्म्यं वाच्यमस्य वैलक्षणस्य निर्वचनाप
त्तेरिति असिद्धत्वादिप्रकारादन्येन प्रकारेण हेत्वाभासो नैकांतिक इति चेत्। वाच्यस्तर्हि स प्रकारः। कस्यान्यथात्व
तस्तितो मतं दोषाः। किं चैवं तर्हि असिद्धादन्यदनैकांतिकमिति कृत्वा विरुद्धादीनामप्यनैकांतिकत्वेनैव संग्रहे शक्ये

खं·मू· विरुद्धादिवद्दूषणांतरसंग्रहार्थयोः साधारणासाधारणयोरेवयदनेनप्रकारेणसंग्रहमकुर्यात्तत्रनिपतंतरुचिरेवभवतोनियं
५८ त्री।यदप्यचलत्वमसिद्धादिव्यतिरिक्ततयानैकांतिकलक्षणसिद्धादिभेदकंप्रकारमनवगम्यतदसत्त्वमशक्याधिगममितितद
भिधानेप्रसक्ततदाश्रयापायदोषादर्शिताः।तैःस्मृतिव्यतिरिक्तचोक्तदोषेष्वनिराकर्तव्योसिसाध्येनाव्याप्तत्वेसतितदभाव
व्याप्तोनैकांतिकइत्यपिन।साध्याविशिष्टेपिगतत्वात्।विशेषणीभूतसाध्यव्यापकत्वावगमाच्चप्राथमिकात्तद्व्याप्यत्वासि
द्धिरेवोपजीव्यादूषणंस्यात्तद्विशेषणांशस्यैवचासाधकत्वसाधनसामर्थ्यात्समर्थविशेष्यतापि।वस्तुगतव्यापकत्वमा
त्रपर्यवसायिनितदभावव्याप्तत्रपर्यवसायिनिवातत्कालसंदिग्धमानान्तरव्यापकत्वेश्रद्धोनिलः।श्रोत्रगुणत्वादिसा
धावसाधारणोपिमाभूत्तत्त्वात्तद्वस्तुतःसाध्याव्याप्तेतस्मिंस्ततत्कालेपिसत्प्रतिपक्षततयाऽनिर्द्धारितसाध्यव्याप्तिकेप्रकर
णसमगतत्वाच्चेति।एतेनानैकांतिकःसव्यभिचारइत्यपिप्रयुक्तंवेदितव्यं।सव्यभिचारत्वस्योक्तप्रकाराधिकस्यवस्तुतमशा
क्यत्वादितित्रापिवोक्तलक्षणाविशेषणेनप्रमाणाव्यवच्छेदकादमेनकिंचव्यवच्छेद्यकेनचित्सत्प्रतिपक्षःकेनचिदन्यतरइति
चेत्।कथंनसत्प्रतिपक्षः।तथाहि।सत्प्रतिपक्षत्वलक्षणमनुयुक्तोयद्याह।समानबलेनबोधितसाध्यविपर्ययकोहेतुस्तेनाभिमतः
सत्प्रतिपक्षइति।तन्न।तथाहि।किमिहबलंविवक्षितंसामर्थ्यमितिचेत्।तत्कुत्रकार्येभिमतंनतावत्सर्वस्मिन्नेववस्वकार्येसत्प्र
तिपक्षहेतोभिन्नविषयबुद्ध्यादिजनकतयासर्वत्रकार्येसमशक्तिकताऽसंभवात्।नापियत्रक्वचित्कार्येप्रकृतसाध्यप्रति ५८
प्रतीयमाणस्फुटत्वादितरोपेणापिप्रमेयत्वप्रतिपादनादौसमर्थनप्रतिहितुतासत्प्रतिपक्षताप्रसक्त्यासव्यहेतुनाशक्यप्रक

न

रणसमहेत्वाभासत्वापत्तेः। नापि प्रत्यक्षहेतुसाध्याभावबोधकत्वरूपे कार्ये उत्तरहेतोरेवमसत्प्रतिपक्षत्वे स्वसाध्यसाधकत्वापत्तेः।
प्रतिहेतोरिति चेत्। तत्र प्रतिहेतोः सामर्थ्यादेव समशक्तिकत्वानुपपत्तेः। इदं च मेव न प्रथमहेतुसाध्यस्य बोधकेनापि। अथोच्यते स्वकी
यस्वकीये प्रकृतसाध्ये यत् सामर्थ्यं पक्षसपक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितत्वलक्षणं सत्प्रतिपक्षहेत्वोस्तुल्यं तदभिप्रायेण
देसमबलाभिधानं तेनेदमुक्तं भवति पक्षसपक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितत्वलक्षणे सत्प्रतिपक्षहेत्वोस्तुल्यं तदभिप्रायेणादेस
मबलाभिधानं तेनेदमुक्तं भवति पक्षसपक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितविषयत्वे कलेनबोधितसाध्यव्यतिरेकः सत्प्रतिपक्ष
इति। नैतदपि युक्तं प्रतीयमानभागासिद्धत्वेनापि प्रतिहेतुना सत्प्रतिपक्षत्वप्रसंगात्। कियत्स्वपि पक्षेषु सत्त्वेन पक्षस
त्त्वाभावात्। न चेष्टव्यमेव भागासिद्धेन सत्प्रतिपक्षत्वं प्रतीयमानदोषान्तरेण प्रतिबन्धात् सति सत्प्रतिपक्षत्वस्येष्टव्यत्वोप
पत्तेः हेत्वाभासान्तरत्वाविशेषात्। न च सर्वपक्षेति विशेषणेन नायं दोष इति वाच्यं यत्रैव पक्षः प्रतिहेतोः तस्य सत्प्रतिपक्षत्वस्याव्याप
नात्। तत्र पक्षस्य सर्वांशवृत्त्यर्थत्वाभावादेव सर्वपक्षसत्त्वाभावे नोक्तलक्षणानुपपत्तेः। एतेन यावदितरपक्षविशेषणे
दोष उक्तप्रायः। किं चान्वयव्यतिरेकिणः केवलव्यतिरेकिणा केवलव्यतिरेकिणा चान्वयव्यतिरेकिणा सत्प्रतिपक्षे लक्षण
मिदं नास्ति पक्षसत्त्वया तुल्यतायास्तत्राभावात्। न च सपक्षसत्त्वया तुल्ये नेत्थं लक्षणे तदनुरोधात् कर्तव्यमेव तथा सति त्वसा
धारणानैकान्तिकतया निश्चितेनापि सत्प्रतिपक्षत्वप्रसंगात्। न चान्वयव्यतिरेकिणो चान्वयव्यतिरेकिणः केवलव्यतिरेकिणे
व केवलव्यतिरेकिणः सत्प्रतिपक्षता न त्वन्यत्रासनापीति नियमोऽभ्युपगन्तुं शक्यः उभयोरप्यनवगम्यमानदोषान्तरत्वे

शाखायामेकसंबंधिनो दोषस्यावश्यंभावित्वे तत्रैकतरस्य व्याप्यत्वपक्षधर्मतावगमो मे भ्रांतिरिति बुद्धिसाधारण्यं प्रतिपक्षत्वं त्रिरूपे
खं॰ म॰ त्पत्तिप्रतिबंधमात्रत्वं तु केवलव्यतिरेकिणाऽन्वयव्यतिरेकिणोऽन्वयव्यतिरेकिणा वा केवलव्यतिरेकिणः प्रतिहेतोः सामर्थ्यस्य तु
५८ रपह्नवत्वात् एतेन द्वयोः सत्प्रतिपक्षत्वं सद्दोषत्वाभ्युपगमे मूलं यत्र समव्याप्तिपक्षधर्मताप्रमितिरस्मिन् सति न भवितुमर्हतीति। अथ
प्रतिपक्षत्वे सपक्षसत्त्वविपक्षव्यावृत्त्यबाधितविषयत्वयोगिना बाधितसाध्यविपर्ययस्य सत्प्रतिपक्षत्वे इति नानिरस्तप्रायत्वात्। पक्ष
पदे सर्वशब्दविशेषणात् न्यूनत्वेऽपपन्नोक्तदोषस्य केवलव्यतिरेकव्यापकत्वस्यापि भावात्। किंच सोपाधिमात्रसिद्धभेदं वदतो म
ते सोपाधितया निश्चीयमानेऽपि सर्वथैवोक्तमिदं लक्षणमनीतित नापि सत्प्रतिपक्षता स्यात्। अथ ब्रूषे। असिद्धत्वविरुद्धत्वाने
कान्तिकत्वबाधितविषयत्वहीनेन बाधितसाध्यासत्त्वः प्रकरणसमः। नित्यद्विप्रयुक्ते। आपाततोऽस्फुरद्दोषेणाक्रमकगत्या चासि त्वा
द्ध्यादिदोषवत्ता सत्प्रतिपक्षतास्वीकारात् तद्व्यापकत्वात्। किंच विरुद्धार्थगोचरयोः सत्प्रतिपक्षहेत्वोरन्यतरस्या
सिद्ध्यादिदोषेणाभवितव्यं अन्यथा धर्मिणो विरुद्धधर्माध्यासप्रसंगात् तत्रैकस्यावश्यंभाविदोषानिश्चयात् प्रतिहेतोश्चोपप्रसि
द्धत्वादिशंकितयामायतितायां असिद्ध्यादिहीनेतेति लक्षणांशस्यानिश्चयात् लक्षणस्य दुरवधारणत्वात् न च वाच्यं किमर्थं राम:
सत्प्रतिपक्षहेत्वोरेकतरस्यासिद्ध्यादिकमभ्युपेयं सत्प्रतिपक्षत्वलक्षणे दोषवत्त्वास्वीकारेण तयोर्न धर्मिणो विरुद्धधर्माध्यासस्तवे ५८
मापत्स्यत इति। यतो वश्यं दुष्टहेतौ व्याप्तिपक्षधर्मतायाश्चाभावे नैव भवितव्यं तत्सत्ताभ्युपगमे साध्यसत्ताया अभ्युपगम
प्रसंगात् बाधादीनामप्युपाधिरव्यापनादिद्वारा व्याप्त्यादिभंग एव पर्यवसानात् सत्प्रतिपक्षतायाद्वितीयमानोऽपि व्याप्तिपक्ष

धर्म्मताभंगो न विशिष्टैकास्मिन् हेतौ र्न्नतु शकः अनन्तरस्य व्याप्यादिभंगेनापि सत्प्रतिपक्षत्वस्योपपत्तेः अतो विशेषनि
ष्टतया तदुन्नयने स्थितयद्धिसाह्यादेः सावयवधार्यते तदानीमसिद्धिः अथ लिंगतोनुमीयते तदा नैकांतिकादेरन्यतमत्वदूषणं
वस्तुगत्या अस्ति सत्प्रतिपक्षे तत्कथमसिद्ध्याधम्मतमन्याभ्युपेय तत्रैतस्मात्कस्य दोषस्य कुत्र द्वयोर्मध्ये प्रवृत्तित्वमस्थितेर्निर्द्धा
रणे प्रतिहतावपितच्छंकायां सत्यां असिद्ध्यादिहीनेनेति लक्षणांशस्य दुरवधारणत्वं दुःपरिहरमेवा स्यादेतत्। अस्तु लक्ष्णा
णांशस्यासिद्ध्यादिहीनत्वस्यानिश्चयः। संशयोपितावदस्ति तत्संशयेन शंकितसत्प्रतिपक्षतादोषग्रहस्तत्वादेवासाधकत्वं हे
ष्वानुमानस्याशंकितोपाधिकविवासिद्धिशंकया। न च यामसिद्ध्यादिशंकामुपजीव्य सत्प्रतिपक्षताशंकासौ कः स्यात्सैव तदादा
पइतिवाच्यं। असिद्ध्यादिशंकाया एव नाहशप्रतिहेतुदर्शनमूलकत्वपातदुपजीवकत्वादिति मैवं यतः शंकितोपाधिनाऽसि
द्धेनाप्येवं सत्प्रतिपक्षताप्रसंगेन। ननु भवत्वेवमपि तेन किंनाम भवेत्। तस्मात्सिद्धतया हीनत्वेन स्वसिद्ध्यादिमतापक्षवाधं
विधूय न किंचिद्रम्यत्। वाधादेवताहि नृतेन सत्प्रतिपक्षेति चेत्। न। संदिग्धासिद्धतया सत्प्रतिपक्षहेतोरप्यतर्हि कथं पर
हेत्वसाधकत्वप्रसाधकत्वं भविष्यति। हेत्वाभासत्वाविशेषात्। हेत्वाभासांतरनदोषसंशयापादकमतो नेत्वमिति चेत्।
नातर्हि यमुपाधिमादाय मूनवेलतया वाध्यता तमादायैव तथा सोपाधेर्दोषसंशयजनकत्वादेवा किंचित्कविसत्प्रतिपक्षत्वमि
त्ययाभावेसंशयानुपपत्तेः। अथान्यथाकारव्यक्तृणामभिधत्से। असिद्धिविरोधव्यभिचारकालात्ययापदेशविरहितया प्रतीय
मानेन वोधितो यद्वितीयसाध्यस्य विपर्ययः सप्रकरणसम इति। एतदपि विचारासहं केन तथा प्रतीयमानत्वमभिमतं किंप्र

त्यनुमानप्रयोक्त्रा अथ प्रथमानुमानवादिना। द्वाभ्याममपि वा येनैकेन विद्वान्न तावदाद्यः स्वपरदोषं जानतोपि दूषणां
तरापरिस्फूर्त्तौ यद्यस्य दोषं न प्रतिसंधास्यति तदाभीष्टमेव। अथ प्रतिसंधास्यति तदानीमन्यथापि ममास्फुरद्दोषांतरास्य प
राजयः अनेन कृत्ताततरानूढायां कथायां शास्त्रांतरं वा संक्रमितमवकाशमासादयिष्यामीत्यभिप्रायवतोत्तरं कस्यामपि वक्तृत
समस्तोपि निर्वहतीति लोके एककर्तृदर्शनार्थं कथमपि ग्रंथकारादिभिरुक्तस्य वा तथाविधप्रतिहिते निर्वाहार्थमनानुयुक्त
स्य प्रौढप्रज्ञस्य स्फुरद्दोषेणापि प्रतिहेतुना सत्प्रतिपक्षीकरणादर्शनात्। तत्र परेणादोषानुज्ञावने जयस्यास्यापि भावात्।
किंच प्रतीयमानतायां दिनिश्चीयमानताविवक्षिता तदानीमसंभव एवेयतावि रुद्धार्थयोरेकस्यावश्यं दोषः स्वचकस्या
स्त्विति तदा निर्द्धारयितुमशक्यतया प्रतिहितावपि संशयात्। अथ संभावनाप्रतीयमानमानत्रऽउद्भवेन संभावनाहृषयं
तो यद्धस्यामस्तदेव दूषणमिति देष्टव्यं। नापि द्वितीयतृतीयचेत्तु र्थः। परवुद्धेर्दुरवक्षरणतया परस्यासिद्ध्यादिविरहितेऽ
ह्रिरत्र भविष्यतीत्यग्रेव धारयितुं प्रमाणाभावेनाशक्यत्वात् कथं सत्प्रतिपक्षतां प्रतिज्ञाय स्फुरत्साद्दयेत्। शंकोतरं चात्र नि
रशिष्यामः। एतेनासिद्धिविरोधकालात्ययापदेशव्यभिचारा स्वतत्तया व्याप्तिपक्षधर्म्मताविरहवत्तया वा अगृह्यमाणेन
बाधितसाध्यविपर्ययः सत्प्रतिपक्ष इति निरस्तं। केनागृह्यमाणत्वमिति निर्वक्तुमशक्यत्वात्। किंच सर्वेषामेवैषां लक्ष
णानां धर्म्मादिग्राहकानुमानवाधितेपि गतत्वादतिव्यापकत्वं एतेन स्वार्थानुमाने न दाभासेवा सत्प्रतिपक्षस्य दोष
त्वमपोढं। अथोच्यते अगृह्यमाणविशेषेणावाधितसाध्यविपर्ययः प्रकरणसम इति। अस्तु तावत् नागृह्यमा

एतावमित्यादिविकल्पदोषाभिधानं। यद्वियः कश्चिद्विशेषो विशेषशब्देनाभिप्रेतस्तदा तद्ग्रहणं कश्चिदपि नास्तीति स
र्वाव्याप्तिः। अथ हेतुदोषलक्षणो विशेषोऽभिमतः। तदा धर्म्यादिग्राहकानुमानबाधितेपि गतत्वात्। अतिव्यापकत्वं। अ
गृह्यमाणहेतुदोषरूपविशेषेण बाधितसाध्यविपर्ययत्वात् तत्स्थापितत्वे हेतुदोषस्याभावादेवागृह्यमाणविशेषत्वात्। नच
गृह्यमाणपरमार्थास्थितहेतुदोषरूपविशेषेणेति कृते निस्सारः। तथा सति सत्प्रतिहेतुकः सत्प्रतिपक्षो न व्याप्येत। पर
मार्थतः तिष्ठतीति च दर्शनीयं न च ज्ञेयमिति महती प्रज्ञा। न चागृह्यमाणहेतुदोषहेतुगुणरूपविशेषेणेति। विवक्षिते भिन्ना
रः व्यतिरेकिणि। अन्वयव्यतिरेकिणा सत्प्रतिपक्षे तु हेतुगुणरूपो विशेषः सपक्षसत्त्वलक्षणो गृह्यत इति तदव्यापकत्वा
पत्तेः। अथागृह्यमाणव्याप्तिपक्षधर्मताभंगरूपविशेषेणेति क्रियते। तदा प्रष्टव्यं। किमपक्षविशेषत्वमिदमिष्टं। यद्वियत्किं
चिदपेक्षस्तदा प्रसिद्धादिमात्रे हेत्वाभासमपेक्ष्य विशेषो गृह्यते सदमानुमानात्मके प्रतिहेताविति तत्राव्यापकत्वं। अथ प्र
कृतविरोधिनं हेतुमपेक्ष्य तदा लक्षणवाक्यमीदृशं पर्यवस्यति व्याप्तिपक्षधर्मताभंगाभंगरूपः प्रकृतहेतोर्यस्य विशे
षो न गृह्यते तेन बाधितो यदीयसाध्यव्यतिरेकः स प्रकरणसम इति। ईदृशमप्येतद्वाक्यं व्याकारमर्हति। तथाहि व्याप्तिपक्ष
धर्मते मिलिते स्पष्टभंगाभंगपदसंबंधे विवक्षिते प्रसेकोदाहरणाव्याप्तिः तद्भंगाभंगरूपद्वयस्य च मिलितस्य विशेषप रामः
दसंबंधेऽभिप्रेते सद्योऽप्यसंभवितया सर्वाव्याप्तिः। अपि चैवमस्य वाक्यस्यार्थो वक्तव्यः। व्याप्तिभंगरूपो व्याप्यभंगरूपः प
क्षधर्मताभंगरूपः पक्षधर्मिताभंगरूपः प्रकृतहेतुतो विशेषो न गृह्यते यस्य तेन बाधितो यदीयसाध्यस्य व्यतिरेकः स प्र
करणसमः। तथा सति परमाणुर्निरवयवो विश्रान्तपरिमाणतरतमादिभावत्वात्। व्योमादिवदित्युक्ते परमाणुः सावय

खं·मू·
६१

वोमूर्त्तत्वात् घटवदितिप्रत्यनुमानेनप्रतिवाधकेनपरमाणुधर्म्मियाहिणोप्परउपरिमाणतरतमादिभावः क्वचिद्वि
श्रान्तः परिमाणतरतमादिभावत्वान्महत्परिमाणतरतमादिभाववदित्यादेः सदनुमानतयेष्टस्यपक्षधर्म्मतावलेनतद्वा
निरवयवत्वेपिप्रमाणतांगतस्यसत्प्रतिपक्षतास्यात्। यच्चास्यसदनुमानेतांनमन्येतेतंप्रत्येवंप्रायाणिवहून्युदाहर
णानिसन्तीतितेषुप्रसंगः। नचसोपितथास्त्वेवंतस्यधर्म्मिसिद्ध्यर्थमुपजीव्यत्वेनवलवत्वात्। तद्व्यवच्छेदार्थंसप्र
ह्मतः प्रकरणसमइतिकर्त्तव्यमितिचेत्। तथाप्यनुपपत्तिः। अत्रहियदियस्यनगृह्यतइतिसंवंधः तेनयत्संवंधितया
नगृह्यतइत्यर्थोविवक्षितः। तदाऽव्यापकत्वंदोषस्तथाहियत्रद्वयोरपिहेत्वोःपरमार्थतः साधारण्याव्याप्त्यादिभंगः
सत्प्रतिपक्षतादशायामगृह्यमाणस्तत्रनास्येतल्लक्षणंनहितत्रव्याप्त्यादिभंगोविशेषोपितुप्रकृत्तहेत्वनास
हसाधारणएवनन्वत्रनास्तिव्याप्त्यादिभंगरूपस्यविशेषणस्यापितावत्तत्राग्रहणमस्तितदाद्यैवलक्षणंतद्वा
प्तिभविष्यति। तत्रहिवादीयत्रस्वहेतुसाधारण्यव्याप्तिभंगादिदोषंजानन्नपिप्रतिहेतुनिष्ठतयापरस्योद्भावयितुंपरश्चप
रिहर्त्तुंनशक्नोतितत्राप्येवंसत्प्रतिपक्षताञ्चैतेस्यात्। यतउक्तरूपविशेषवत्तयातेनासौनगृहीतउक्तरूपस्यसम
न्तयैवतेनगृहीतत्वात्। तथापिप्रतिहेतुवादिनातद्विशेषवत्तयैवगृहीतस्तस्यतत्साधारण्याभावस्फुरणात्। भ्रांस
भ्रांतिसाधारण्यस्यवात्रग्रहणमात्रस्यविवक्षितत्वादितिचेत्। न। प्रतिहेतुवाद्यभिप्रायेणगृह्यमाणतापक्षस्यप्रा
गेवनिरस्तत्वात्। किंचप्रतिहेतुवाद्यपियदिसाधारण्यंतांतस्यदोषस्यतदैवयस्यैतद्वाकागतिः यद्यसौवादिहेत्वा

रामः
६१

वपि दोषं पश्येत्तदा तमुद्भावयेत्तथा सति च तत्रैव कथा संक्रमः स्यात् सत्प्रतिपक्षमुपेक्षेतेति चेत्। यद्यपि पश्यन्नपि
प्रतिवादी तत्र दोषमेवं मन्त्रयेत्। यदिदानीं सत्प्रतिपक्षतां प्रतिज्ञातां विहाय दोषान्तरमुद्भावयामि। तदापि प्रतिज्ञातत्या
न्म गात्मम भंगो, अथ नोद्भावयामि तथापि प्रतिज्ञातदोषानिर्व्वाहान्मम पराजयः। तदेवं च तथा दोषान्तरमुत्सादनायास
इति परामृष्य सन्तूष्णीमास्ते तदा का गतिः अथ यस्य विशेषइत्युक्तलक्षणवाक्यपदसंबंधस्तवाभिमतः। तद्
उक्तस्तावद्द्वयोर्दोषोत्तरं च स्यात्। व्याप्यत्वभंगादेर्विरुद्धार्थहेतोः साधारणस्यासंभवाद्विशेषपदेनाव्यवच्छेदके
न सह विशेषणविशेष्यभावानुपपत्तेः। अथोच्यते। व्याप्तिपक्षधर्म्मताभंगाभंगरूपप्रकृतहेत्वपेक्षविशेष
वन्नयोद्भाव्यमाने नवोधितो यदीयसाध्यस्य विपर्ययः स प्रकृतः सत्प्रतिपक्ष इति तदपि नोपपन्नं यद्यपि परः
त्वदीयोऽयं प्रतिहेतुरित्युद्भावयं व्याप्तिकरस्तेनाभिधत्ते न तु सद्धेतुतायं विशेषइत्सापि ब्रूते। आभासान्तरत्वकृतादना
देवप्रतिहेतोः सत्प्रतिपक्षताभंगात् तदोपीह सत्प्रतिपक्षताभंगनिवर्त्ते। तात्तथा सति च प्रतीयमानासिद्ध्यादिनापि सत्प्रति
पक्षीकरणमिति साधकत्वकृतादिति सर्वानुमानानुकूलं स्यात्। किं च कस्मिंश्चित्काले तथानुद्भाव्यमानत्वेऽपि पक्षेति। यद्युदप्र
तिहेतूद्भावनेन परहेतुं दूषयति प्रतिवादी तस्मिन्काले तदुद्भावनेन तत्पश्चादुक्तोऽपि प्रतिहेतुदोषः पूर्वकालिकानुद्भावनप्रति
कारेण कश्चिदिति सर्वहेत्वाभासैः सत्प्रतिपक्षीकरणमदुष्टमिति गतमनुमानवादिनावधारणीयमयमत्र विशेषदो
षं नोद्भावयिष्यतीति पक्षताकरणं संभवति तत्र परेण दोषेऽनुद्भाविते जयश्च भवतीति। किं च विशेषदोषस्य स्वत्वमपि स्व
कीयहेतोः कथमयमवधारयेत् विरुद्धार्थत्वोरेकस्यावश्यं दोषेणाभाव्यं तत्र यथा तेन स्वहेतोर्दोषो न दृश्यते तथा परहेतो

खं॰म॰ वपितद्दर्शनेतमेवोद्भावयेत्तु। को हि स्वचेता निश्चितं दोषमुपेक्ष्य सदोषस्य निर्दोषसाम्येन प्रत्यवतिष्ठते। तस्मात्स्वदोषेपि दोषम
प्रश्यन्नस्वेनादर्शनं दोषाभावे प्रमाणयितुमर्हतीति। अथोच्यते। आक्षिपत्स्वधर्मता भंगाभंगरूपप्रकृतेत्र हेत्वपेक्षविशेषकत्वेनानुद्भा
६१ व्यमानतया संभाव्यमानेन वोधितो यदीयसाध्यस्य विपर्ययः स प्रकृतः प्रकरणसम इति। नैतदपि सुस्थं। यद्युद्भावनकालात्पूर्वका
६२ लिका संभावना विवक्षिता तदा त्वकालिकानुद्भावनपक्षोक्त एव दोषेतिदृष्टव्यः। अथोद्भावनसमयावसरो भविष्यतीति तत्कालिकतयातद्दा
सत्प्रतिपक्षतायुत्पादनकाले सा नास्तीति विशेषणाभावाल्लक्षणाभावः। अथोच्यते। यावत्संभावनानुवर्त्तते तावत्सत्प्रतिपक्षता किं
संभावनायाः कालनियमगवेषणेन। मैवं। एवं हि प्रतिहेतोद्दूषितेनुद्भाविते प्रस्तुतनिर्दोषितत्येव स्वीकृते दोषोद्भावनसंभावनायामि
वृत्तेः सत्प्रतिपक्षतानिवर्त्तेत तथा चेत्यंकारमेव वादी सत्प्रतिपक्षतां परिहरेतेति साधकस्यात्मतिहेतोः प्रतिक्षेपमकृत्वा स्वीकृतस्यैव दो
सत्प्रतिपक्षताप्रतिक्षेपव्याप्ति। न च स्वीकारे वप्रतिहेतोः पराजयः स्यात्। सत्प्रतिपक्षतापरिहारोपायतया स्वीकारस्यकरणा
त्स्वीकारे सति संभावनानिवृत्त्या तल्लक्षणाकस्य सत्प्रतिपक्षस्यापि निवृत्तेः। तस्मात्स्वीकारोप्ययं परस्यानिष्टार्थसिद्धसाधनेपरकी
यसाध्यस्वीकारखंडणाय स्वीकर्त्तुर्न दोषायेति। यदि च सत्प्रतिपक्षो वादिनोः समानप्रतिपक्षदर्शनजनितात्स्वहेत्वाभासत्व राम॰
संशयात्तदा कचिदपि नास्ति सत्प्रतिपक्षता। स्वहेतुपक्षपातेन परहेतौ वक्रो वृषः कश्चिदस्ति मयात्तु नपृष्यत इति तान्प्रामन्यमा
नत्वात्। यदाह निश्चितो हि वादं कुरुत इति। अथोच्यते विमारस्य वुर्जित संशये न सत्प्रतिपक्षता स्यात्तत्तदा सर्वत्रैवैक्यादेस्तु वोनुमाना ६१
नां सत्प्रतिपक्षता दुर्निवारा। तद्यथा शब्दानित्यत्वानुमानेन बुद्धिमजिः शातस्य शब्दनित्यत्ववादिजयात्शब्दनित्यत्वानु
मानेन चाप्तेः शातस्य शब्दानित्यत्ववादिजयात्तद्वयोः पक्षयोरनुमानेषु कृतस्वरक्षतः सदनुमानमित्यर्हतो दोषसंशय

स्यदुर्बीरत्वादिति। प्रकारभेदाभावेन न कालात्ययापदिष्टः पृथक् कृतः। यथा बाधितविषयः कालात्ययापदिष्ट इति लक्षणं तथा हि बा
धितविषयत्वं किं विवक्षितं। न तावद् बलवत्प्रमाणबाधकेन बाधितो विपर्ययो यस्य तत्त्वं यथा अतः सत्प्रतिपक्षेऽपि गतत्वात्। तत्र प्रत्यनु
मानस्य प्रथमानुमानविषयविपर्ययप्रबोधकस्य पक्षधर्मता बलसंभवात्। अथ बलवता साधिकबले नेति विवक्षिते तदापि केव
लव्यतिरेकिणाऽन्वयव्यतिरेकिणा सत्प्रतिपक्षे गतत्वादतिव्यापकत्वं तत्रान्वयव्यतिरेकिणः प्रतिहेतोः सपक्षसत्त्वलक्षणबला
धिक्यसंभवात्। किं चैवं प्रत्यक्षेणानुमानाभासबाधो न स्यात् प्रत्यक्षस्येन्द्रियार्थसन्निकर्षोत्पन्नत्वेन तज्ज्ञानकारणत्वमात्रं बलम
नुमानस्य तु पक्षधर्मत्वादि भूयिष्ठं बलमिति। अथ मन्यसे अनन्यथासिद्धत्वं बलं विवक्षितमुच्यते। तेनानन्यथासिद्धेन बा
धितो यदीयस्य साध्यस्य व्यतिरेकस्तत्त्वं बाधितविषयत्वमिति मैवं। तथापि हि वस्तुतोऽनन्यथासिद्धेन सत्प्रतिपक्षेऽपि गतत्वात् किं
चान्यथेति अनेन प्रकारेणोच्यते अन्यथेति चाऽनन्येन प्रकारेण यस्मादन्यत्वं तेनैव समर्थः संपद्यते तथा च वक्तव्यं तदन्यता
प्रतियोगीति। प्रमाणं च तदिति चेन्न। अहो दुर्वैदग्ध्यमेव तत्। प्रमाणेनेति वक्तव्ये प्रमाणात्ययोऽस्यः सयो न भवति तेन प्रकारेण यः प्रतीतः
उत्पन्नो वा तेनेति ब्रुवाणस्य तथापि प्रमाणेन बाधितविपर्ययो विषयो यस्य स कालात्ययापदिष्ट इति। इदं रजतमिति शुक्तिविषयी
कुर्वतिप्रसक्ताभासे नेदं रजतमिति प्रमाणेन बाध्यमानेऽपि हेत्वाभासविशेषलक्षणमिदं गच्छतीत्यव्यापकमापद्यते। एवं बाध्यवि
षयिणामपिक्षायामपि गच्छेत्। प्रमाणेन बाधितो यदीयविषयस्यान्यथाभावः स हेतुः कालात्ययापदिष्ट इति चेत्। यदि मुख्यार्थो
हेतुशब्दस्तदा हेत्वाभासत्वव्याघातः। अथ अमुख्यार्थस्तदा कोऽसावर्थो यत्रैष व्यवस्थाप्य इति सोऽभिधातव्यः। प्रमाणेन बा

खं. मू. ६३

रामा।श्रीगौरीशाय नमः
श्रीगुरुभ्यो नमः

घितोयदीयविषयस्यव्यतिरेकः सहेत्वाभासः कालात्ययापदिष्टइतिचेत्।यद्विषयेहेत्वाभासत्वानिश्चयस्तदालक्षणस्यदुर
वधारणत्वं।अथकालात्ययापदिष्टत्वेऽनिरूपितएवहेत्वाभासत्वस्यनिर्णयस्तदाततएवदुष्टत्वसिद्धेः कृतंपश्चात्तनीतिकस्यकाला
त्ययापदेशस्योपन्यासेनेति।तद्विदंत्वन्मतेलक्षणमसत्कावाभूत्सामुद्रिकप्रामाण्येनपुनर्म्महत्तदलक्षणंकालात्ययापदेशस्ययेना
स्यनामहेत्वाभासभेदपदंपदमश्रेशः प्रासाधि।अथस्वरूपेहेत्वाभासत्वंहेत्वाभासमानत्वंहेतुसदृशतयाप्रतियमानत्वंनतुहेतु
दोषवत्त्वमिति।मैवंहेतुनत्वलक्षणाऽग्रहेतुतावगमंविनानशक्यप्रतिपत्तिःसादृश्यस्यभेदाविषयानस्यत्तथैवप्रतीतेः।अन्यथाहेतोर
पिहेत्वाभासत्वापातात्।ततश्चहेतुरूपवैकल्यस्यावश्यमपेक्षितत्वेनप्रागुक्तदोषानिवृत्तिः।प्रमाणेनबाध्यमानोयदीयपक्षव्यतिरेकः
सकालात्ययापदिष्टइतिचेत्।नाश्रयासिद्धव्यापनात्।आश्रयासिद्धव्यतिरिक्तइतिविशेषणीयमितिचेत्।न।नविशेषणासिद्ध्याश्र
यासिद्धेनसहसंकीर्णकालात्ययापदिष्टोदाहरणमेवंनव्याप्तेः।प्रमाणेनबाध्यमानोयदीयसाध्यव्यतिरेकःसकालात्ययापदिष्टइति
चेत्।नप्रत्यक्षाभासव्यापनात्तत्रापिहिसाध्यस्यज्ञानरूपस्यव्यतिरेकोबाध्यतएवप्रमाणेन।प्रमाणेनबाध्यमानोयदीयसाध्यस्य
व्यापकस्यव्यतिरेकःसकालात्ययापदिष्टइतिचेत्।नाप्रमाणेनबाध्यमानाभावस्यप्रकृतहेतुव्यापकत्वासंभवात्।प्रमाणेनबाध्य
मानोयदीयसाध्यस्यप्रतिज्ञातस्याभावःसकालात्ययापदिष्टइतिचेत्।स्वार्थानुमानेकालात्ययापदिष्टस्यैवमव्यापनात्।त
त्रशब्दरूपस्यप्रतिज्ञानस्याभावात्शब्दस्यपरार्थत्वात्।प्रमाणेनबाध्यमानोयदीयसाध्यस्यपक्षनिविष्टस्यव्यतिरेकःसकाला रामः
त्ययापदिष्टइतिचेत्।नातथाभूतस्यपक्षाभासत्वात्प्रकृतेत्रतीतनाम्नोमाभावप्रतिप्रतियोगितानास्तिवस्तुनोः।ननुयस्तत्रतस्त ६३

पगमेनमुख्यपक्षार्थत्वासंभवात्पक्षाभासनिविष्टस्यतत्क्रियप्रमाणेह्युपूर्वंपक्षाभासत्वप्रतीतिसप्रतीतिपक्षोक्तदोषद्वैविध्योद्भवः
पक्षत्वाभिमतांशभूतस्येतिक्रियमाणोपपद्यं।किंपक्षत्वाभिमतत्वं।किंतुपक्षतयाभ्युपगम्यमानत्वं।अथतत्तथाप्रमितत्वं।उत्तपक्ष
तयाप्रतीतत्वमात्रं।नाद्यः।दूषकंप्रतितत्संभवात्।तेनवाध्यसाध्यस्यपक्षाभासतयैवप्रकृतांगीकारात्।अनुमानवाद्यपेक्षयापि
नियमाभावः।सहेतुमानापारिस्फूर्तेरिदंप्रज्ञेनप्रज्ञाभिमानभृतामपिवदतिस्फुटदोषमपिकोदूषयितुंशक्तइत्यभिप्रायेण
यदृच्छयाज्ञातदोषस्यापिप्रयोगसंभवात्।तत्रानुमानवादिनापक्षत्वांगीकाराभावेनतथाभूतवाधितानुमानाव्यापकमिदं
लक्षणंस्यात्।नचपक्षतयोपगम्यमानत्वमंगीकार्यमितियुक्तं।तथासतिस्वार्थानुमानकालात्ययापदेशाव्याप्तिः।नापिद्वि
तीयः।पक्षत्वेनप्रमितेविषयेकालात्ययापदेशानवकाशात्।नापितृतीयः।तथाचैवंलक्षणमिदंसंपद्यते।प्रमाणेनवोधितेय
दीयसाध्यस्यपक्षप्रतीतिविषयांशस्यव्यतिरेकःसकालात्ययापदिष्टइति।अस्यचवाक्यार्थस्यनकदाचिदपिसंभवंपश्यामः।यदा
तावत्प्रमाणेनसाध्यस्यव्यतिरेकवोधःतदापक्षप्रतीतिर्नास्तिविशेषदर्शनेभ्रमस्यानवकाशात्।ततश्चतदापक्षप्रतीत्यभावेनतद्वि
षयत्वाभावात्तद्विषयांशस्येतिविशेषणाभावाधीनोविशिष्टस्यलक्षणात्मनोऽभावः।यदापिचप्रमाणेनसाध्यव्यतिरेकवोधनं
नास्तितदातस्यैवलक्षणभागस्याभावात्लक्षणाभावइतिनित्यमसत्वस्यावस्थितेनलक्षणेनलक्ष्यस्यवस्थापयितुमशक्यत्वात्तस्याच
नीयप्रज्ञोभवात्।नचवैशेषिकप्रक्रियामाश्रित्यविनश्यदवस्थायामपिपक्षप्रतीतिस्तत्कालेसंभावनीयातदीयसाध्यव्यतिरेकाव
गमभिवर्तनीयाहिमातत्साध्यव्यभिचारव्यतिरेकाभिमस्यपूर्वमेवंभूतइत्यवश्यमभ्युपगमं।अन्यथाप्रमाणेनवोध्यमानत्वं

ग

रवं·म· कथं साध्यव्यतिरेकस्य तदेगम्यते न च वाच्यं प्रतीतिविषयत्वमिदं विशेषणं न भवति किंतूपलक्षणमुपलक्षणे न चासतापि व्यव
६४ च्छिन्नप्रतीतिरुपजन्यते। यथा काकवतो देवदत्तगृहा इत्युपलक्षणीभूतया काकवत्तया देवदत्तगृहस्य व्यवहारकाल इति। यतस्त
त्रोपलक्ष्यस्य देवदत्तगृहस्य स्वाभाविको विशेषोस्ति व्यवहारकाले तेन काकवत्ताभावेपि तमादाय व्यवहारनियमस्य प्रवृत्तिः नतु
तत्राप्यसतोपलक्षणस्य कारणत्वं। अत्र तु व्यक्तीनामुपलक्ष्यत्वे लक्षणस्याननुगतत्वं। अनुगतं च किंचित्तु उपलक्ष्यं न लक्ष्यामहे।
अत उक्तमेव वाक्यार्थमादाय प्रवर्त्तमानेन लक्षणात्मके साधने विशेषणासिद्धिर्दुर्निवारा। एतेन पूर्वं शंकितस्य हेतुरित्यस्य प्रसं
क्ष्याभासस्य व्यवच्छेदार्थमुपात्तस्य स्थाने हेतुत्वाभिमत इत्येतादृशस्य करणे दूषितप्रायं अथ यद्विषयप्रमाणेन बाधितो यदीयसाध्य
स्याभावः स प्रत्यक्षाभासव्यतिरिक्तः कालात्ययापदिष्ट इति। नेतदपि सुस्थं शब्दोपमानाभासस्याधारणापात्त। तद्व्यतिरिक्त
त्वस्यापि विशेषणीयमिति चेत्। एतदपि विचार्यते। किं प्रत्यक्षाभासादिव्यतिरिक्तत्वं प्रत्यक्षाभासादिभिन्नो वैधर्म्यं किंचित्। उत स्वक
प्रभेदः अथवा अन्योन्याभावः। न तावदाद्यः तद्वदेकस्य धर्मस्य निर्वक्तुमशक्यत्वात्। नापि द्वितीयः स्वरूपस्य परस्परस
रूपावृत्ततयालक्षणानौपयिकत्वात्। नापि तृतीयः व्यतिरिक्तत्वस्यान्योन्याभावात्मनः प्रत्यक्षाभासादावपि भावेन तद्व्यव
च्छेदकत्वानुपपत्तेः। ननु व्यतिरिक्तत्वमात्रमन्योन्याभावरूपं विशेषणमस्माभिरुपात्तं किंनाम प्रत्यक्षाभासादिभेदव्यति रामः
रिक्तत्वं। न च प्रत्यक्षाभासादयः आत्मन एव भिन्नाः तत्कथमुक्तप्रसंगस्यावकाशः। अवगतमिदं तद्विवक्षितं भेदवद्वि ६४
चार्यते किं प्रत्यक्षाभासादिभिर्विशेषितो सावन्योन्याभावस्त्वयोच्यते। उत तैरुपलक्षितः। यं प्रत्यक्षाभासादिविषयसंक्रम

न्यसौ। आद्यस्तावन्न संभवति न हि प्रतियोगिरूपविशेषणसहितोऽभावः क्वचिदप्यस्तीति तत्तादृशस्य विव
क्षितत्वे सर्वाव्याप्तिः। द्वितीये तु घटत्वाभावादिभिन्नरूपलक्षणोर्यद्रूपलक्षणमन्योन्याभावस्य स्वरूपमेकं तत्त्व
त्वाभावादिघुवाचितानुमानेष्वसाधारणमिति कथं नोक्तदोषप्रसंगः। अन्नदरक्तसत्तात्मकविशेषणा
प्रतियोगीत्वभावस्यासन्नेव ज्ञानस्य विशेष्यव्याहृत्तधीजननाविरोधात् विशेषणं भवतीति चेत्। अ
युक्तमेतत्। विशिष्टताव्यवद्भावस्य स्वरूपमिहोपात्तं। तत्र विशेष्यमात्रशरीरं न भवितुमर्हति। तथा म
सति विशेष्यस्वरूपमेवोच्यतां। वृथा विशेषणपदोपन्यासः। तदनुपन्यासे चान्योन्याभाववत्त्वमात्रमु
पन्यस्तं भवति तत्र च घटत्वाभावादेर्व्यवच्छेद्यस्यापि संग्राहकोऽतस्तद्विशेष्यादन्योन्याभावादधिकं
किंचिदन्तर्व्यं तं विशिष्टमुपन्यस्यतां सच यद्विप्रतियोगीत्वदीयोऽभिधीयते। तर्हि तत्स्वाभावान्तरं तद्वीविशि
ष्टाभावः प्रसक्तः विशेष्यमात्रं परिशिष्टं। तत्र केवलमतिप्रसक्तं तस्माद्विशिष्टव्यवहारप्रवर्तका

स्वं·म·

६५

लेविशेष्यातिरिक्तकिंचिदनभ्युपेत्यविशिष्टसत्ताव्यवहर्तुमशक्यात्ऽतःप्रतियोगीनाभाव
स्यविशेषणंभवितुमर्हतिउपलक्षणंतुस्यात्।तत्रचोक्तमेव।नचान्योन्याभावएकोनभवति
भिन्नप्रतियोगिकौद्वावभावौतौ।तथाचप्रतियोगिलक्षितंतत्स्वरूपमन्यदेवेतिसिद्धांतात्।विरो
धिनचयुक्तं।उभयंह्यन्योन्याभावस्यैकात्मतयाप्रतियोगिएकात्मतायाश्चभेदविरोधए
वातस्त्वयेनरूपेणप्रतियोगित्वंतेनरूपेणाभेदानवकाशात्भिन्नप्रतियोगिकताकुतोन्यो
न्याभावस्ययेनरूपेण

खं·मू· त्वे सतीत्यपि विशेषणीयत्वात्। किंच स्वीकृते तस्मिन्नेनाभीष्टमात्रं वाभिधीयते असिद्धेन ष्टेवा। आद्ये केनचिद्रूपेणेष्टस्य रूपां
६६ तरेणापरित्यागः क्वनामनास्तीत्यतिव्याप्तिः स्वीकारपूर्वकोपरित्यागो न च रूपांतरेण तत्र स्वीकारः न तत्त्यागएवासौ न भ
वतीति नातिप्रसंग इति चेत्। नास्वीकारस्यापित्यागपदार्थात् अर्भावि स्वीकृतेनेतिव्यर्थात्तत्यागेपिच नाद्यद्वितीयो। अ
सिद्धेनेष्टस्य रूपांतरेण स्वीकृत्य वानिष्टत्वभावात्। संयोगाद्यव्याप्यवृत्तितावादिपक्षे चैकस्यैव संयोगस्यास्तित्वनास्ति
त्वाभ्यामभ्युपगम्यमानत्वात्। एवं च कालदेशादिभेदेन सत्त्वासत्त्वाभ्युपगमेपि प्रसंगो द्रष्टव्यः तस्यैव तदेव तत्रैव तत्रैव
तथैवेष्टत्वानिष्टत्वविवक्षितेत्यदोषोति चेत् एवंतर्हि कालमभ्युपगम्यात्मभ्युपगच्छतः प्रतिज्ञाहानिर्न स्यात्। तत्र तदेत्यस्य कोवि
शेषणस्यासंभवात्। नहि कालकालांतरं वा स्वात्माभिन्नेभेव वाच्यास्ति काले तदेति विशेषणस्याप्रतिक्षेपेऽन्यत्रेच तत्र प्रक्षेपेल
क्षणैकतापत्तिः कालं प्रतिप्रतिज्ञाहानेरदोषत्वे तद्वदन्यत्रापि दोषत्वापातः यदेकं च स्वीकरस्तदैवास्वीकारासिद्धेः तदेतित
कथाकालोपि विवक्षित इति चेत्। न। तत्कालस्यैककथ्यक्तिपरत्वे लक्षणानुगमः। वादादित्वेन साम्येकदाचिदपि तद्विपरीतत्वा
दात्तराकरणप्रसंगः। एवं तथैव तत्स्यैवेत्यादिपदं च द्रष्टव्यं उक्तपदस्य वापासिद्धांतस्यवच्छेदकस्य किरुद्धमाधेना समर्थविशे
षणत्वा। एवं सर्वनियमस्थानेषु द्रष्टव्यमिति संक्षेपः। प्रतिज्ञाहानादीनामादिपदेन च किं संगृह्यते प्रतिज्ञांतरादीति चेत्। नाप्र राम:
तिज्ञांतरमेव न निरूपयितुं शक्यते। तद्यथा। स्वोक्तस्य परदूषितस्य साध्यभागस्य पूर्वानुक्तविशेषणवत्ताभिधानं प्रति ६६
ज्ञांतरमिति लक्षणं। तथाहि। यत्र वादिनाप्रथमं सविशेषणः प्रतिज्ञाभागोभिहितः परेण च निर्विशेषणोक्तस्य मात्रदूषितः।

ततोवादीप्रथमाभिहितंसविशेषणमेवोपन्यस्येद्दृशंमयोक्तंनतुनिर्विशेषणमतोनिरनुयोज्यानुयोगोभवतइतिसदुत्तरमेव
ब्रूतेतत्रापिगतत्वादतिव्याप्तक्रमेतत्।पूर्वानुक्तविशेषणत्वंतत्रनास्तितत्कथमतिव्याप्तिरितिचेत्।प्रथमोक्तेःप्रागभावस्यदु
र्वाच्यत्वात्।विशेष्योक्तिरपितदानासीदितिचेत्।किमायातंतावताविशेषणानुक्तप्रसंगस्यविशेष्योक्तिकालेविशेष
णानुक्तिर्विवक्षितेतिचेत्।न।एककर्तृकायांवाचोयुगपदसंभवेनसर्वत्रतथाभावस्यैवाभावात्।विशेष्योक्तेरनन्तरकालइति
चेत्।न।नीलोत्पलमित्यादौपूर्वंनिपातितविशेषणेतराभावात्।विशेष्योक्तेरव्यवहितपूर्वकालइतिचेत्।न।उत्पलेनीलमि
त्यादौतदभावात्।अव्यवहितइतिचेत्।बहुविशेषणकेतदभावात्।विशेषणाभिधानोचितकालइतिचेत्।न।नानाविशेषणके
विशेष्यक्रमवृत्तित्वाद्वाचःक्रमेणाभिधीयमानेएकविशेषणाभिधानकालेऽपरेषामपिविशेषणाभिधानानांयोग्य
भवत्येवेतितदानेषांक्रमभाविनांअभावात्तैवातिव्याप्तिःसर्वस्मिन्योग्यकालइतिचेत्।नदूषणानन्तरकालस्ययोग्य
कालत्वाभ्युपगमेऽव्याप्तिःदूषणपूर्वकालस्यतथाभिमतत्वेबहुषणान्तराभावात्विनाविशेषणोक्तिंव्यक्तेःतदानीमभावा
त्पूर्ववदतिव्याप्तिःसर्वस्यास्तस्यास्तज्जातीयायाविशेषणोक्तेरभावोविवक्षितइतिचेत्।नव्यक्तीनामभावप्रतियोगिभूता
नांसर्वासांपृथक्प्रमाणेनैकेनापिअस्मादृशाप्रत्येतुमशक्यतयाऽभावाभिरूपणेनलक्षणस्याज्ञानादसिद्धिप्रसङ्गा
त्सामान्यलक्षणाप्रत्यासत्त्याव्यक्तयःप्रतिभान्तीतिनिरस्तमनुमानखण्डनावसरेएतेनपूर्वमविशिष्टस्योक्तस्यतिवि
शेषणेप्रक्षेपणमितिनिरस्तंउत्तरकालवाच्यविशेषणकविशेष्यस्यप्रथममविशिष्टोक्तत्वसंभवस्यदर्शितत्वात्।किंचप्रथ

ख·मू· ममविशिष्टमुक्त्वाभवतायदिविशेषणाभिदंप्रत्तिष्पेततदाहितंतरंभवेतोपिस्यात्तथापितदभावेवाममापिकृतः प्रतिज्ञान्तरंअ
६७ यथयममेवेदाविशेषणमुपादायत्रीपितहाण्यापि: अथमंमविशेषणमुक्त्वाक्व्यिपराविवेयर्थ्यक्रमेणउभितिसंवरणात्रिविशि
षणेभिहितेपरेणदूषितेपुनः सविशेषणामभिदधतो नैवं प्रतिज्ञान्तरस्यादित्यव्याप्तिः स्वपरसाध्यशब्दपदानाविवेचनेन्यक्षोपतना
दव्याप्तिश्चप्रकरणादिलभ्यतयाप्रागनुक्तस्यपश्चात्परदूषितस्यप्रकरणलभ्यविशेषणवत्तयानुवदतोपिसत्त्वादेति प्रसंगः अ
नुक्तस्थाने चाऽप्रतिपादितकरणेपिदोषः परस्मिन्नजातप्रतिपत्तौ प्रतिपाद्यते त्वनुपपत्तेरिमददिस्वयमूहनीयं। प्रतिज्ञान्तरादिस्था
दिपदेनकिमिदंप्रतिज्ञाविरोधादीतिचेतन्न। यतएकवक्त्रैकैकवाक्यांशयोर्मिथोव्याघातः साध्यविपरीतव्याप्तत्वोद्भावनानये
ष्ठोद्भावनः प्रतिज्ञाविरोधइत्यलक्षणं तथाहि भूतलेघटोनास्तीत्यादावपिगतत्वेनातिव्यापकमिदं वचनयोर्हिव्याघातोऽन्य
विरुद्धार्थत्वं नत्विहास्तिघटोस्तीत्यंशस्यघटसत्त्वबोधकत्वात्। नकारस्यचतन्निषेधकत्वात्। नन्वयुक्तमिदमुच्यते नहिघटे। नास्तीत
त्पदयोपिविधीयतेघटनिषेधोपियेनमिथोव्याघातः स्यात् किंतुघटोनिषिध्यतेघटनिषेधएवतद्विधीयतइतियोवक्तुंतोव्या
हतिरितिचेत्सत्यमेव। घटइत्यस्यतावद्विधिबोधकत्वंनास्तीत्यस्यापितत्प्रतियोगिकार्थत्वंभवतापिमंतव्यंयदिलेकेचनाप्ररूपेषितदातयोर
विरुद्धार्थतयाघटस्थापेक्षितनिषेधास्तित्वेचभूतलाश्रितद्वयमस्यवाक्यस्यबोधनीयंस्यादितितस्मात्तविधिरूपएवघटइतितत्प्र
तिषेधएवचनेति। किमेतावेकवक्त्रैकवाक्यांशौनभवतः परस्परविरुद्धार्थाभिधायकौवानभवतः येनलक्षणमिदंभवतस्तत्र राम·
नगच्छेत्तन्नमिथोविरुद्धत्वमात्रेमिथोव्याघातकत्वंकिंत्वेकदेशकालादौपरस्परविरुद्धार्थयोरस्तित्वंनचघटोनास्तीत्येनएकदे ६७

भिन्नत्वात्तेनान्योन्याभावं प्रति प्रतियोगिता नास्ति घटत्वेनोः। ननु घटत्वे तत्र

पि रेकत्वाभावात्कथमेकतया प्रतियोगित्वमन्योन्याभावं प्रति घटे तेव घटत्वेनोः। यथा वस्तुतो भूतलसंसर्गाभावे पि घटस्य भू
तलसंसर्गितया भूतलसंसर्गाभावं प्रति। तत्र यथा मतं भूतलसंस्पृष्टतया दृष्टान्त यात्रापि तादृक्वसप्रकार भेदैस्तद्दृष्टान्तो दृष्टो सोयं
तद्दर्शनाभिप्रायो नास्माकं निर्वाहार्ह इत्यास्तां विस्तरः। अपि च घटपटयोः स्वरूपभेदे नैवैधर्म्यभेदे न चोभयकोटीकृतयोरन्योन्या
भावनिरूपणं भवति। अत्र तु प्रमेयत्वाभासादेः प्रमेयत्वाभासत्वादिनैककोटिता स्यात् नाम यत्र प्रमेयत्वाभासादिव्यतिरिक्ततया प्रतिपन्न
वंतस्यैकेन रूपेणैककोटीकरणं। न तावत् प्रतिव्यक्तिभिन्नेन तत्स्वरूपेणेति तेषामनन्ततया बुद्धिस्वीकर्तुमशक्यत्वात् नापि यद्रूपोपा
त्तं विशिष्यप्रमेयत्वाभासादिव्यतिरिक्तत्वेन विशेषणविशेष्यरूपं तद्रूपकोटीकृततत्पैवान्योन्याभावनिरूपणमिति युक्तं। तस्य स्व
रूपस्य प्रमेयत्वाभासादिसंग्राहकतया कोटिद्वयभंगापादकत्वेऽन्योन्याभावनिरूपणविरोधित्वात्। तस्मात्स्वरूपभेदे वैधर्म्यभे
दे वा कोटिद्वयव्यवस्थापकमप्रतिसंधायान्योन्याभावनिरूपणमशक्यमिति स्थिते स्वरूपभेदपक्षस्य हि दूषितत्वाद्वैधर्म्यभेदः के
श्चिद्वक्तव्यो न चासौ वक्तुं शक्यः। शक्यत्वे वा तमादायैव लक्षणव्यवस्थितिरस्त्वा कृतमन्योन्यव्यतिरिक्तत्वेनेत्युक्ता तदनेनमाये
नान्यत्राप्यतिप्रसक्त्युद्धरणान्यत्वेनान्यावर्त्तनं लक्षणवादिनो भयस्य शवणमस्त्वं निरसनीयं। अत एव भेदकोत्तरैर्विना तद्व्यति
रिक्तत्वमेव दुर्निरूपणमित्यभिप्रायेण तत्त्वे दमत्वे सतीति विशेष्यमाणो वैशेषिकहेतुं नैतदेवं यिन येन व्यभिचारस्तदमत्वे सति
मेयत्वादि समतिपन्नहेतुरूपमासादुपहसंति संत इति॥ ॥इति श्रीहर्षविरचिते खंडनखंडखाद्ये प्रमाणतर्काभासखंडनं नाम प्रथ
मः परिछेदः॥ ॥ननु यदि दुर्लक्षत्वात्ताभासाः तर्हि निग्रहस्थानानि प्रतिज्ञाहान्यादीनि बाधकानि भविष्यंतीति चेत् का पुनः प्रतिज्ञा
हानिः तद्यथा स्वीकृतार्थपरित्यागः प्रतिज्ञाहानिरिति लक्षणं। तथा हि झटिति सर्वराऽनिग्रहस्थानपि गतत्वेन परद्दूषित पि

शाकालादौ विधिनिषेधौ वर्त्तमानौ बोध्येते इति चेत् न उत्तरत्वात् तद्देशकालानंतर्भावि विरोधस्यैवानुपपत्तेः किंच यद्येकदेशा
दौ विरुद्धास्तित्वं प्रामाणिकमुपेक्षितं स्यात् तदा विरुद्धशब्दस्तत्र वा यमन्यत्रैव सामयिकार्थः कश्चित् प्रमाणेन तथाभूतस्य ग्रहणा
देव विरुद्धार्थत्वाभ्युपगमशक्तेः अथ प्रामाणिकत्वं तत्राभ्युपेक्षितं तदा अप्रामाणिके मिथोव्याघातकत्वं कथं नाम नास्तीति सति मिथोऽपि
अथ मन्यसे यथाप्रयोगेणाभिधीयते अर्थात् मिथो व्याघातकावितिभ्रमः तत्र प्रमाणप्रसरे सैवेति चेत् न कथमपि प्रमाण
स्तेनो विरोधभावाप्रतिभाषामात्रत्वापत्तेः यथा परेणाक्षेप्यः तथा मिथो व्याघातकः इत्यपेक्षितो मिथो व्याघातकमर्थ
मप्रमाय न वक्तुं शक्यं प्रसज्जनं मिथो व्याघातात् न प्रसाध्यत इति चेत् न क्वचिदप्यप्रमितस्य प्रसंजयितुमपि भवताऽशक्य
त्वात् तमाप्रनायि अप्रमेयेव तद्व्यवहार इति चेत् क्वचिदप्यप्रमितमाभासमात्रोपस्थितं कथं नाम नोपस्थापयितुं शक्यमि
त्यक्तेर्वातिव्याप्तिरावर्त्तते अनेकत्र नियतयोरेकं च प्रसंजनमिति चेत् न प्रसंजकस्य तद्द्वयैकत्रास्थितिनियततासमिता
वविरोधस्याऽनेवंभावे चानापादकत्वापत्तेः एकैकव्याप्याभ्यां पृथक् पृथगापादनमिति चेत् न एकैकमव्याघातात् तद्
योरिदृयं स्यादिति चेत् न अर्थापत्त्यर्थत्वेनैवाव्याघातात् अर्थादापादनं न साधनमिति चेत् न मिथोविरोधित्वेन तर्का
भासत्वापत्तेः इष्टापादनाच्च मिथो व्याघातात् कथं तथा स्यादिति चेत् न तद्द्वयधर्मिकत्वान्न व्याघातापत्तेः धर्मिणि प्रमा
णापेक्षायामव्याघातात् एवमादीनां दोषाणां परं प्रत्यभिधानेतवापि सधर्मिदं वस्तुवचमिति चेत् न तवाप्यनात्मदोषा
यमापद्यत इति प्रतिवंदी गृह्यतः किं परपक्षे दोषापादानमात्रं विवक्षितं उत यस्त्वपात्तत्र समाधिरभिधेयस्त्वमयापील

भिप्रायात्स्वपक्षेसमाधिःनतावदाद्यःअप्रसक्तत्वात्परोक्तदोषानुद्धारेतावत्तैवकथायास्तद्वर्द्धस्यैवापर्यवसाना
त्निग्रहापरिहारावधित्वात्तयोः।द्वितीयेतुसएवाभिधीयतांकानोहानिःभवतांतावदभिधीयतांकस्तत्रसमाधिःततो
मयाप्यभिधेयइतिचेत्।नमयातदभिधानस्यप्रागेवतमप्रसक्तत्वात्नहिमयास्वपक्षसाधनंत्वयाचदूषणांप्रक्रांतेवक्तुमा
रब्धमस्तिकिंतुत्वयास्वपक्षोनिर्दोषःतद्दूषणंचमयाभिक्षणीयमितिकथ्याप्रसक्ततावर्त्ततेईदृशिवकथाविभागेमतस्त
समाधानायमांपर्यनुयोक्तुंभवतःकुतोधिकारःअथविशेषतस्तन्निष्टंकुनेकिंप्रयोजनमस्तितावदेवतादृशिचोद्येप
रीहारोयतस्त्वयापिस्वपक्षेसोस्वीकार्यइत्याशयस्तेसोपिनयुक्तःनहिमत्पक्षेचेत्समाधिरस्तितावतात्वत्पक्षेपितेनभवित
व्यमित्यत्रकिंचिदपिप्रमाणमास्तिसाम्येद्वमितिचेत्न।वैषम्यस्यावश्याभ्युपेयत्वात्यदितद्गतमसाधारणंरूपमाद
यमदृर्शनंप्रतिपत्तिसिद्धान्तेवातत्रसमाधिःस्यात्अत्रचेत्तुमस्तेतद्भावान्नस्यात्तथासतिसाम्यमात्रात्कथंसमाधिरसा
वत्रापीतिनिश्चेतुंशक्यतेनासौतत्रविशेषइतिचेत्नमयासांप्रतंतदभिधानस्याप्रसक्तत्वमित्युक्तत्वात्चोद्यसाम्यात्समा
धिसाम्यसिद्धिरितिचेत्नहृष्यगतविशेषभावाभावविशेषितत्वादिनापितद्वैषम्यसंभवात्यथातद्व्यवहारस्यसत्त्वाख्यी
कारेत्वेतुल्येपिसत्तायोत्तदभ्युपामेअनवस्थयातदाश्रयेचतत्स्वभावेनमन्यत्रापिवक्तुलंदर्शनादितिकिंचपरोद्भावितम 
सिद्ध्यादिकमपरिहृत्यप्रतिवंद्याप्रत्यवतिष्ठमानस्यकोभिप्रायःकिंयद्दिंदंदोषतत्यापरेणोद्भावितंतद्दूषणंअदूष्य 
विगतत्वात्उतदूषणंसन्नोद्भावनीयंतुल्ययोगक्षेमत्वात्यद्वाकुःयत्रोभयोरित्यादिनाद्यायघत्रासिद्ध्यादिलक्षण

मस्त्वज्ञाविति दूषणे तदा दोषत्वस्याशक्यपरिहारत्वात्तत्परिहारेपि वा तस्यालक्षणत्वप्रसंगात् यद्येतद्दूषणं कथं तत्
र्हि दूष्यत्वेन वादिनां स्वीकृतेत्प्रतिवंदीस्थानेगतमिति चेत् । न । यद्येतद्दूषणं कथं दोषलक्षणोपपत्रमित्येत्रापि द्वितीय
तोदृष्टिः नियामकाभावे तद्वैतदीयदूषणत्वे संदेहः पर्यवसित इति चेत् । अस्तु दोषसंदेहेपि भवदीयसाधकस्यासाध
कत्वसंदिग्धासिद्धवत् । किंच यल्लक्षणावतोस्य दोषत्वसंदेहस्तल्लक्षणाक एवायमन्यत्रापीति तत्राप्यसिद्ध्यादेरदूषणत्व
मेव स्याद्द्वितीयप्रतिवंदी दुरुत्तरापत्तिवंद्विवादिनेति नापि द्वितीयः तथास्तु भयकादिसमता दूष्यत्वभूमानुमानादि
कं यदि प्रतिवंदीकरोति परः तदा तद्दर्शनेन्यत्र क्वचिदपि असिद्ध्यादिकेनोद्भावनीयं परसाधनेष्वतस्येव धूमानुमानादेः
प्रतिवंधाभयादिवैषम्यापि सुवचैवं तत्प्रतिप्रतिवंदीश्चात्रापि शक्यत एव पठितुं यत्रोभयोः समो दोषस्तादृशार्थं वि
शेषमाश्रयप्रतिवंदी स्यात् तन्मात्रस्यानुद्भावनेन तु सामान्यत एवेति चेत् । न । तत्र विशेषप्रतिवंधात्याजितदुष्टत्वेगत
त्वाल्लक्षणामेव नेति स्यात् विशेषतद्विशेषसाजन्येन चेत् तादृशस्य लक्षणस्यासिद्धिरेव स्यादिति कृतं प्रतिवंधा । अथ
मर्द्दर्शनमात्राभ्युपगताद्दूष्यत्वं कंचित्सदार्थं प्रतिवंदी करोति तदैतदुक्तं तेच वादि हनेदं दूषणं वक्तव्यमभिधानेऽनये
वयुक्तत्वात् वेषप्रसंगप्रसंगादिति । तत्र इदमिह दूषणमेव वक्तव्यमनभिधानेऽस्य वानिष्टस्य परसिसाधयिषितस्यासिद्धिप्रसंगादित्यभि
धानानुकूलाया अपि प्रतिवंधाः संभवात् । नन्वेवमवास्त्वत्तथाचाभिधानेऽनभिधाने चोभयतः पाशाप्रतिवंदी रज्जुर्भवन्
एवदुर्निवारः स्यात् । मैवं । मिथो विरुद्धायाः प्रतिवंधाकीभासत्वान्मिथो विरोधस्य तर्कदूषणत्वात् सत्प्रतिपक्षानुमा

खं॰मू॰ भवद्वयोरपि परस्परप्रतिक्षेपेणैवोपक्षीणत्वादिति न्यायवृत्तौ याद्यायप्रथमाह्निकसूत्रे प्रमेयाणां बहुलाप्रामाण्यवदिस
६९ द्धापादिदोषसाम्येन प्रत्यवस्थितं पूर्वपक्षवादिनं निराकर्तुमाचार्यः सूमानमित्यनुत्तरमभ्युपगमात् तदभ्युपगन्तृता
वद्भवतानास्मत्पक्षे दृष्टान्तोस्तीति ब्रुवन्नुद्योतकरो यत्रो भयपरीत्यो द्विवदतो भदस्यप्रतिभटीकर्त्तव्यः तत्किं प्रतिबंधादिदू
षणं न भवतिनेत्त्वेवं भवतोपसिद्धांतः स्यादितिचेत्। भवतः किमिति नापसिद्धांतः स्यात् सिद्धांतविपरीताभ्युपगमोपसि
द्धांतः प्रतिबंधादिश्च भवतासिद्धांतत्वेनाभ्युपेतं मयेदंदर्शनमाश्रित्याभिधेयमिति वदता दर्शनविशेषस्याभ्युपेतत्वात्॥
दर्शनस्यचतत्तत्पदार्थस्वीकारात्मकत्वात्। तेषु च पदार्थेषु च प्रतिबंदीदूषणादेः प्रविष्टत्वादिति चेत्। लक्षणमेव तावदि
दमपसिद्धांतस्य नोपपद्यते मत्सिद्धांतविपरीतमभ्युपगच्छतो भवतोपसिद्धांतप्रसंगात्। स्वसिद्धांतस्त्वेथाऽपेक्षितत इति चेत्।
न विशेषणस्य स्वरूपमन्तरेण तद्दूलाभात्। अन्यथा सद्धेतुविशेषणोपादानप्रयासवैयर्थ्यं स्यात् एवमेवाभ्युपगमेभ
वत एवापसिद्धांतकस्य निग्रहस्थापत्तेत्वात्सिद्धांते शब्दशो हेत्वादौ विशेषणोपादानदर्शनात्। परसिद्धांतहेतूनांचानुपात्त
विशेषणानामनैकांतिकीकृत्य बहुशो भवच्छास्त्रे दूषितत्वात्। प्रथमं स्वशास्त्रं विशेषणं अनुपादाय दूषणमभ्ये नेदा
नीं तत्करणोचेहेत्वंतरं नाम निग्रहस्थानं भवतः हेत्वन्तरं हि प्रथममविशेषणं साधकमागमभिधाय पश्चाद्विशेषण
वत्तद्वचनं किंचैवं लक्षणमभिदधेन स्य भवतोऽप्राप्तकालपातः अप्राप्तकालोवयवविपर्यास इतिलक्षममभिधाय रामः
हि लक्षणाभिधानं युक्तं तस्यच भवता विपर्यासः कृतः एवमेवमभ्युपगमे वत एवापसिद्धांतत्वापातात् यस्तु स्वैतिप्रथ ६९

खं·म· भिन्नत्वंनममनवातत्वेवेतिअपसिद्धांतविषयोछेदः।अथस्वीकर्त्तुरस्वीकर्त्तृतोनभिन्नत्वंतदायमर्थःस्यात्स्वीकर्त्तृतो
नभिन्नेनैकस्यस्वीकृतस्यास्वीकारोपसिद्धांतःइतितथाचसएवभवतोपसिद्धान्तःमयायदीयस्वीकारःकिंचिस्वीक
७० र्त्तुरभिन्नस्यभवतःतदीयास्वीकर्त्तृत्वात्एतेनैकस्यैकेनस्वीकारावपसिद्धान्तइत्यपास्तंमिलितयोरवयोरपसिद्धान्त
पातात्स्वीकर्त्तुरेवतदस्वीकर्त्तुरभिन्नत्वमेकशब्देनाभिमतंतदापियदिस्वीकारविषयाभिन्नत्वंतच्छब्देनोच्यतेअस्वी
कारविषयस्य।तदास्वीकर्त्तुस्तत्स्वीकारविषयस्यभवता।किंचितस्वीभकर्त्तृभिन्नेनास्वीकारविषयेतयास्वीकारक
र्तृविषयाभिन्नत्वस्वीकारेणाभवतोनसिद्धान्तप्रसंगस्यदुर्वारत्वात्।एकेनस्वीकर्त्रानतुभिन्नेनस्वीकारास्वीकारोवि
वक्षितावितिचेत्।नएकेनस्वीकर्त्रेस्मितदेवविविचयतदन्यस्तदाकर्षिनेभिहितंतद्दूषणव्याहत्यापत्त्याकथायुक्तकथन
घनसमयसमागमोदीयमानतरतरंगिणीवेणीजलविवर्त्तनिर्वर्त्तितावर्त्तचक्रचंक्रम्यमाणान्तरणकदंबविडंबना
मनुभविष्यसि।अथस्वीकृतास्वीकारःसइतिचेत्न।कार्थविवेचनेनोक्तबाधायानात्।अस्वीकृतस्वीकारेचात्त
दभावापत्तेः।किंचसिद्धांतपरित्यक्तोवियदयुसिद्धांतोऽज्ञावनंतत्किंस्वीकृततदर्शनानुमतायसिद्धांतदूषणाभावेवादि रामः
निउत्तानेएवंभूतेआद्यपूर्वसिद्धांतवदयसिद्धांतेनाप्यनेनखुत्यातुंशक्यतेतत्रकिंवक्तव्यंननावत्रवक्तव्यमेवकिंचि ७०
त्स्वसिद्धांतस्यागादेवापसिद्धांतेननिगृहीतत्वादितिनुक्तंअपसिद्धांतेपरिहारस्यतद्दूषणत्वान्यतरासिद्धेःतेनाभिहितत्वा
त्।अन्यथास्वाभिप्रायेणासिद्धिमुद्भाव्यैवकथोविच्छिंदानोविजयेतपरासिद्धिपरिहारंनापेक्षितेसनसिद्धावप्यसिद्धि

मुद्राव्यपरं पराजितःप्रत्युहं गृहान्प्रतिष्ठेत निगृहीतस्य तस्यापरमभिधानमनादरणीयमेवेति चेत् । न । अमतरा
सिद्धान्तनिग्रहपरिहारस्यैव तेनाभिधीयमानत्वात् तथाप्यनादरणेऽनपसिद्धान्तसिद्धिमुद्राव्यपराभिधीयमानमसिद्धिप
रिहारमतऽहसविजयेतं एवेत्युक्तं अथ मध्यस्थैनैव तद्विचारणीयं किमनपसिद्धान्तवेनासिद्धिरुक्तानपसिद्धान्तत्वा
पसिद्धान्तः एतद्विचार्यते केवलजयपराजयं च वचारणीयो एतदर्थमेव मध्यस्थोपुस्थापनमिति न तर्हि वादिनासाधने
भिहिते दुष्टमेतदिति भिधायैव प्रतिवादिना निवर्तनीयं मध्यस्थस्तु परमार्थतो दुष्टत्वमदुष्टत्वं वा तस्य साधनस्य वि
चार्य जयपराजयौ च व्यवस्थापयिष्यति सोयं प्रसूयनिर्वृत्तीभूतयिकदेपत्स्यृतसघोषणाकृतमहायासवायुस्व्यसनं समास्य
दयिष्यति मध्यस्थोवराकस्तावदुष्पूरामर्षप्रकर्षेण अथोच्यते संप्रतिविप्रतिपद्यतामापसिद्धान्तेप्यसौ किमेतावता पूर्व
स्वीकृतापसिद्धान्तदूषणाभावस्य दर्शनस्यतावत्तेन स्वीकरणमकारितद्वादायापसिद्धान्तस्यापन्यासोयमुक्त इति मैवं यदि दा
नीतमऽननुमतिरस्य नाद्रियते असावुपजातायामपि प्राक्तनानुमतिमाश्रयेव च दूषणप्रवृत्तमननुमतिमाश्रित्यैव प्रवर्त्तते वा
न्यथा तस्मात्स्वीकृतापसिद्धान्तभावमपि वादिनं प्रतिविप्रतिपत्तिकाले साधनीय अपसिद्धान्तस्य । द्वितीयानवकाशः यस्य
तु सौगतादेर्मते यः सिद्धान्तो न दूषणानप्रसक्तवशंप साधनीयमेवस्य दूषणत्वं न च वाच्यं योऽपसिद्धान्ते विप्रतिपत्तिक्रोणेति तंप्र
तिव्याघात एवाभिधेयः दर्शनविशेषं स्वीकुर्वता तद्दर्शनान्तर्निवेशिनः प्रतिवंदीदूषणत्वादेः ते न स्वीकारात्पश्चात्तस्यैवास्वी
कारस्तावतोस्वीकारास्तीकारावेकैकस्य व्याहतावितियद्यपमसिद्धान्तात्मैव व्याघातः तदाऽपसिद्धान्तदूषणत्वे विप्रति

खं.मू. पत्रस्य विप्रतिपत्तिनाभिघातुं युक्तः अथ दूषणान्तरमयं व्याघातोऽपसिद्धान्तमनुपजीव्य संभाव्यमानोद्भावनस्तदा साधनिका
पसिद्धान्तोदाहरणीयमेवास्तु किमपसिद्धान्तस्य दूषणत्वाङ्गीकारेण किं चैवं अपसिद्धान्ते प्रतिज्ञाहानिः स्वीकृतोक्तत्यागइ
७१ ति एवं प्रथमं किंचित् दूषणमुक्त्वा तत्परिहारेण दूषणान्तराभिधानेऽपि न प्रतिज्ञाहानिरिति गतं प्रतिज्ञाहान्यादिभिर्निग्रहैः
प्राक्प्रतिज्ञातदोषनिर्वाहार्थमेव निग्रहान्तरकथनान्नैष दोष इति चेत्। न पूर्वनिग्रहपरिहारं अकृत्वा वृत्तितैनेव पराजितनि
ग्रहान्तरोपन्यासस्यायुक्तत्वादिति न चानेन भयेन भ्रूतां व्याघात एवाभिधेयः प्रथमेनापसिद्धान्त इति। वाच्यं अपसिद्धान्तवैयर्थ्य
प्रसङ्गात् सर्वत्रापसिद्धान्तोदाहरणे व्याघाताभिधानस्यैवमङ्गीकर्तव्यत्वात् न हि कश्चिच्छक्यतेऽवधारयितुं मयापसिद्धान्तउ
द्भावितेनायं विप्रतिपत्स्यत इति न च स्वेवं विप्रतिपन्नं प्रति अपसिद्धान्तस्य दूषणत्वमसाधनीयमिति मिवं येनाप्यस्वीकारद
शायां न दूषणेन तत्स्वीकारयिष्यतीति तदनङ्गीकारस्यापि संभवात् उक्तं च सौगतैः न हि शास्त्राश्रया वादा भवन्तीति नायमप
सिद्धान्तो निग्रहाधिकरणमिति रिक्तस्य जन्तोर्जातस्य गुणदोषमपश्यतः। विलक्षणाः वत केनामी सिद्धान्तविषयग्रहा इति
तत्र कश्चिदाह शास्त्रमनाश्रित्य कथारम्भानुपपत्तिः यस्माद्धि लक्षणमङ्गसाधनभूयोक्ता अस्फूर्तिमत्ता स्थिरवादिनापसिद्धान्तसा
धनमनुज्ञाप्य निगृह्यते तत्तदा किं कुर्यात् प्रथमविप्रतिपत्तिविरोधमनुज्ञापयेदिति चेत् एवं तर्हि विप्रतिपन्नस्य गुणमपमेयान्तरव्य रामः
तिक्रममनुज्ञापयेदेव अन्यथा विप्रतिपत्तिव्यतिक्रमभ्रमप्रकोपे हेतुर्न खलु तदनुगुणव्यतिक्रमयोर्विरोधापत्तिं प्रतिकाश्चि ७१
द्विशेषः न चैकगुरुणाथानुगुणाङ्गाङ्गिभावव्यवस्थितियदार्थजातस्य पादनादन्यच्छास्त्रेनाम तस्मात्त्राणिकत्वस्वीकार

मतएवविशेषणमुपादत्तेतं।प्रत्युतानुपात्तविशेषणपक्षाभिहितोदोषोवक्ष्यो।मदीयो।पिहिसिद्धांतःस्वसिद्धांतएवम
मत्रत्रवाक्येभ्युपगमपदश्रवणात्अभ्युपगन्तालभ्यतेतस्ययःस्वकीयःसस्वशब्दार्थःपर्यवस्यतीतिचेत्।न।ममाप्य
भ्युपगतत्वात्।मयापिहिकिंचिदभ्युपगम्यतएवविपरीताभ्युपगंतास्वितइतिचेत्।न।अविशेषात्।सिद्धांतविपरी
ताभ्युपगंतेतिचेत्न।तथाप्यविशेषात्ममापित्वत्सिद्धांतविपरीताभ्युपेतत्वात्।स्वसिद्धांतविपरीताभ्युपग
न्तातथापेक्षितइतिचेत्।न।तत्तूनमतिप्राज्ञोसियत्स्वपदमभ्युपगत्वाविशेषयितुंप्रवृत्तोभ्युपगन्तारमेवस्वपद
द्वाराविशेषयसिपरस्पराश्रयादपिनविभेषिस्वपदेपिसाधारण्यप्रत्यवस्थानंपरोक्तंपुनस्तदवस्थमेवेतिचनप्रति
संधत्से।यस्ययःसिद्धान्तःतेनतत्सरिमागोपसिद्धांतस्तदीयइतिचेत्।मैवं।यस्ययःसिद्धांतइतिपुरुषव्यक्तिविशेषासि
द्धांतव्यक्तिविशेषपरत्वेअसाधारण्यादव्यापकत्वंलक्षणदोषः।यस्येतिसिद्धांतसंबंधिनइत्यर्थश्चेत्तेनेतिसिद्धांतसंबं
धिनेत्यर्थेचभवतोऽयंसिद्धांतः।नतथाहि।सिद्धांतसंबंधिनोमममयःसिद्धांतःतस्यसिद्धांतांतरसंबंधिनाभवतात्यागा
स्तेव।त्यागएवतस्यनास्तिमयापरिगृहीतविषयत्वात्त्यागस्येतिचेत्नयदित्यागोऽस्वीकारःतदानपरिगृहीतविषयतानि
यमः।अथस्वीकृतस्यास्वीकारःतदामयास्वीकृतस्यभवताअस्वीकारोभवत्येवतथेतिविशेषोनास्ति।अथतेनैवस्वीकृत
स्यतेनैवास्वीकारःसोपिनतेनेतिस्वीकर्त्रैवसमर्थंममापिस्वीकर्तृत्वेनमयास्वीकृतस्यभवतास्वीकारेतवायंसिद्धांतायातः।
एकेनैकस्यस्वीकृतस्यास्वीकारापसिद्धान्तइतिचेत्।न।एकेनेतियद्येकत्वसंख्यायोगिनेतितदाममयद्येकसंख्यायोगि
त्वंतथातवापीतिसएवसिद्धांतायातः।अथैकेनेत्यभिन्नेनेतितदापिस्वस्मादभिन्नत्वंतवममचसमानं।अस्माद

तदनुगुणाग्योहादिसमस्तस्वीकारः तदेकपरिहारेवासमस्ततदनुगुणपरिहारइतिसर्वज्ञोपिनात्मथाप्रमातुंक्षमःन
चसमस्ततदनुगुणपदार्थजातंकथारंभेस्वशब्देनाभिधातुमुचितंतद्देवशास्त्रप्रमाणायनप्रसंगात्परिपंथितत्वाच्चनच
तद्व्यतिक्रमोद्भावनायसमस्ततदनुगुणोहः परस्परस्यशास्त्रेमनाश्रितस्यशक्यः नचैतदनुगुणाव्यतिक्रमेतदुपन्यासेणवा
तस्वप्रतिपक्षिजयाविस्मकाभि।नापितदूषिकारप्रवृत्तेशास्त्रमेवाश्रयणीयमिति। तदेतदपेशलं किंतदनुगुणांशमेयावत्तं
यदनभ्युपगमेविरोधमुद्भावयेदितिकच्चेतद्व्यमभ्युपगम्यसंभवतिएकैतावद्यदनभ्युपगमेकथैवप्रवर्त्तयितुमशक्या
यथाप्रमासिकथकेसिद्धइतनुप्रतिदर्शनासिद्धं यथाक्षणभंगेगोक्षुरादितत्रयदिप्रथमभ्युपगम्यैवकथाप्रवृत्तिरितितत्स्वी
कारेपश्चात्तदनंगीकारोपसिद्धात्तस्यममाघातकत्वेनतस्यभवद्भिरेवजातित्वांगीकारात्तज्जातेश्चनिरनुयोज्यानुयोगनि
वेशात्नापिद्वितीयःस्वदर्शनभेदनियतं हिक्षणभंगादियत्कथारंभेभ्युपगंतव्यंतत्किंतदभ्युपगमस्यप्रकृतसाध्यापोहाद्य
यत्तयाउतत्वात्तरीयकतया नप्रथमःक्षणभंगसाधनप्रस्तावेक्षपोहादिपरित्यजतःसौगतस्यापसिद्धांताभावापत्तेः त
दभ्युपगमस्यतदनुपायत्वात्अन्योन्याभ्युपगमोपायत्वेचान्योन्यविचारस्यनिष्पत्तिरेवनस्यात्विचारेसतिप्रामा
णिकत्वप्रतीतेःतदभ्युपगमःतदभ्युपगमेचविचारइतिअभ्युपगतोपायत्वागविषयएवाऽयमपसिद्धांतोनाम
नितिचेत्।नयोहियदुपायःतमभ्युपगम्यविचारःप्रवर्त्तयितव्यइत्येवकृत्वतःतस्योपायतयातेनविचारःप्रवर्त्ततइत्येव
युक्तंनतुतदभ्युपगमोपितावतातदुपायःस्यात्तस्यचतदभ्युपगमस्यचपृथक्कारणात्ताभ्युपगमेप्रमाणास्योपदर्श

खं·म· पितुमशक्यत्वात् शक्यत्वेपि वा तत्राभ्युपगमः किंमित्यभ्युपेयो वैयर्थ्यात् उपायत्वादेव परस्य तथा प्रतीत्युपपत्तेः
अथोच्यते उपेयं उपायेन साधयता उपेयवदुपायस्यापि सत्त्वमभ्युपगन्तव्यमिति पश्चात्तदनभ्युपगमेऽपसिद्धान्तो
७२ पन्यासः सावकाशः असत्त उपायत्वानुपपत्तेः तत्र्छ्रुपायत्वेनोपन्यस्य नान्तः सत्त्वाभ्युगमस्तस्य साक्षादनुक्तत्वेप्य
सत्वेनाभ्युपगम्यमानस्योपायत्वस्वीकारानुपपत्त्याकल्पनीयं कल्पिते न चेत्ते नभ्रूयमाणे तत्सत्त्वानभ्युप
गमविरोधादपसिद्धान्तोभिधेयः एकं च सति सत्त्वानभ्युपगमे ईसूवीपायत्वानुपपत्तिप्रसंगो दूषणमुच्यतामु
पजीव्यत्वात्तदुपन्यासमनन्तरेणाश्रूयमाणतदीयाभ्युपगमस्य दर्शयितुमशक्यत्वात् उक्तं तत्तदुपजीविनाप
श्यान्तनेनापसिद्धान्तेन अत एव न द्वितीयः तत्रान्तरीयकाभ्युपगमोपि हि तत्सत्त्वानभ्युपगमे साध्यस्याभावा
पत्त्यानुमन्तव्यः तथा च मे वदूषणमस्त्वनभ्युपगमे कृतं तथाभ्युगमपरिकल्पनेनानभ्युपगमविरोधा
दपसिद्धान्तोपन्यासे त्वेतिति एवं निग्रहान्तरखण्डनमूहनीयम्॥ ॥इति खंडनखंडे निग्रहानिरुक्तौ द्वितीयः
परिच्छेदः॥ ॥अथ यान्यवलंब्य बहुले वाग्व्यवहारास्तेषां सर्वनाम्नामर्थाः कथं निर्वाच्याः तथाहीश्वरसद्भावे किं प्र
माणमिति ब्रुवाणः प्रतिवक्तव्यः किं शब्दोपमाने पार्थी वा कुत्सितार्थी वा वितर्कार्थी वा प्रश्नार्थी वा स्यात् तत्र ७२
यदि प्रथमः पक्षः तदेश्वरसद्भावे नास्ति प्रमाणमित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रात्साध्यसिद्धिरिति दे

त्वादिकंवाच्यंभवतीतितच्चभवतानाभ्यधायितस्मान्नूनंतवंदोषः अतएवनद्वितीयः ईश्वरसंज्ञावेकुत्सितंप्रमाणमित्यस्यापिप्रतिज्ञा
मात्रत्वात् अपिचसाध्यासाधकत्वाद्यात तत्कुत्सितंभवता अन्यथावा अन्यथाचेद्दलंतदुद्भावनयासाध्यसिद्धेरप्रत्यूहत्वात् नापि
प्रथमः प्रमाणंचसाध्यासाधकंचेतिव्याघातात् गौणोयंप्रमाणशब्दइतिचेत् नप्रमाणत्वयोगिनियद्ययंप्रमाणशब्दप्रयोगः तदा
गौणत्वव्याघातः मुख्यत्वात् अथप्रमाणाभासेतदालंतदुद्भावनयाईश्वरसंज्ञावेयंप्रमाणाभासः सकुत्सितइत्यत्रपरस्यापि
संप्रतिपन्नत्वात् ईश्वरसंज्ञावइतिचविशेषोपादानंव्यर्थंस्यात् अन्यत्रापिहिविषयेप्रमाणाभासः कुत्सितएवसाध्यासाधकत्वात्। ना
पितृतीयः तथासतिहिवितर्कस्यपक्षांतरसापेक्षत्वेनपक्षांतरमपिनिर्वचनीयंभवति ईश्वरसंज्ञावेकिमेतत्प्रमाणमुतान्यदितितच्च
भवतानाभ्यधायि अतोनूनंतवदोषः नापिचतुर्थः प्रश्नार्थात् खलुकिंशब्दात्कस्यचित्पदार्थस्यजिज्ञास्यमानतोप्रतीयते साचेत्प्रमाणप
दसमभिव्याहारात् प्रमाणविषयिणीप्रतीयते यद्विषयश्चप्रश्नः तदुक्तंखादिनाभिधेयंतदयंप्रश्नः ईश्वरसंज्ञावेप्रमाणसामान्यवि
षयस्तद्विशेषविषयोवाभिप्रेत आद्येईश्वरसंज्ञावेप्रमाणमित्येवोत्तरमापद्येत। यद्विषयोहिप्रश्नस्तदभिधेयंप्रमाणसामान्यवि
षयश्चप्रश्नः तच्चप्रमाणशब्देनाभिधीयतएव अथद्वितीयः तथापीश्वरसंज्ञावेप्रमाणमित्येवोत्तरमापद्येत यथाप्रश्नवाक्येप्रमाणशब्दो
विशेषपरस्तथोत्तरवाक्येपिसोविशेषइतिचेत् नपूर्वेदुत्तरत्वात् अस्यापिप्रश्नस्यविशेषोविषयः किंशब्दस्यविशेषशब्देवसामा
नाधिकरण्यात् तथाचसतिविशेषएवोत्तरंस्यात् स्यादेतत् विशेषशब्देननविशेषमात्रमनिर्धारितमत्रविवक्षितं किंतुसाधारणी
व्यक्तिस्तुविशेषशब्दस्यतात्पर्यं तस्मात्कासाचसाधारणीप्रमाणव्यक्तिरितिप्रश्नार्थः तत्रचद्वादशधाप्रमाणव्यक्तेरभिधानमु
त्तरयुक्तंनैवंविधाः प्रलापाइतिनितरांवेदयतोऽत्रापिविशेषशब्दस्येवोत्तरंयथाप्रश्नवाक्यगतस्यविशेषशब्दस्यसर्वतोव्यावृत्तस्वरूपा

खं॰म॰ यांप्रमाणव्यक्तौतात्पर्यंयथोक्तखाक्येऽस्थितस्यापिएवंचसतियत्रविषयेभवदीयस्यब्रह्मवाक्यस्यतात्पर्यंतदेवास्माकमुक्तखाक्येनप्र
७३ तिपादितमितियुक्तमुक्तंअथमनुसेकिमिपृच्छतोयमभिप्रायः अत्रार्थेनुमानेप्रमाणमितरद्धेति अत्राप्यनुमानमितिचेत्तर्हस्माकंकिं
तदनुमानमितिचेत्।अयमपिप्रश्नोनुमानमात्रविषयउततद्विशेषविषयइतिविकल्प्यप्रमाणप्रश्नवदुत्तरंवाच्यमिति अत्रचसंग्रहश्लो
कोयथाविधियविषयंनिजस्यप्रश्नस्यानिर्वाक्तिपरीययोक्त्या॥वाच्यस्तथैवोक्तखादिनापितयेववाचासतथाविधोर्थःप्रश्नस्यपःसो
द्विषयःसवाच्योवाचानयावेषभवेन्निरुक्तःइदंत्वयाप्यास्थितमतयेवगिराख्वपृच्छाविषयस्यवक्त्रा।प्रश्नार्थाचकिंशब्दात्जिज्ञा
साविषयताऽर्थस्यप्रतीयतेजिज्ञासाचज्ञानमिच्छाइच्छाचनाज्ञातेभवत्यतिप्रसंगात्तस्मादीश्वरविषयंप्रमाणंज्ञातुमिच्छता
तत्स्वज्ञानेच्छाकारणीभूतंचवक्तव्यंतदतथाभूतार्थंतथाभूतार्थवासात्यथार्थचेत्।तर्हितेनैवज्ञानेनस्वकीयेविषयःप्रमाण
मुपस्थाप्यतेविषयेप्रमाणप्रवृत्तिमन्तरेणतदीययथार्थत्वस्यवक्तुमशक्यत्वात्तेनापिप्रमाणेनखगोचरईश्वरसकाशउप
स्थाप्यतइत्यनायासेनैवसिद्धोस्माकमीश्वरसिद्धिमनोरथः।अथायथार्थतत्रास्मित्रयथार्थज्ञानविषयेयद्यस्माभिरयथार्थम
वज्ञानमुत्पादनीयमितिभवतःपृच्छतोवांछितंतदाकेयंस्वाधीनेर्थेपरापेक्षाभवानेवायथार्थज्ञानोत्पादनेकुशलोयथैकत्रमि
थ्याज्ञानमजीजनत्तथापरमप्यस्मादयनुवर्पयतुनर्ययथार्थज्ञानस्योत्पादयितारोमिथ्याज्ञानेसर्वथैवाकृतिनःकिमिहनियुङ्क्षेम रामः
हीति।अथमदीयस्यायथार्थज्ञानस्ययोविषयःसमदीययथार्थज्ञानविषयोभवताक्षिप्तामितित्वदीयंवांछितंतदाव्याघातादी
दृशपर्थेभवतःप्रवृत्तिरेवानुपपन्नाशुक्तिकारजतत्वेनमामयथार्थज्ञानविषयोभवत्विसतदर्थमेत्रावाक्यथकारमयतेतथैनदृप ७३
णाऽयथार्थज्ञानविषयत्वेनेनरूपेणयथार्थज्ञानविषयत्वव्याघातात्।अथमन्यसेस्वसिद्धान्तमनुरुध्यानेतत्वयायथार्थज्ञान

खं॰मू॰

७४

७४

तदर्थइतिचेत्‌नसामान्यादीनांतदभावादभावत्वापत्तेः स्वरूपसत्त्वंचनिरुक्तेनापिद्वितीयेः अभावोस्तीप्रतीतेरुक्तत्वात्‌वर्त्ततइत्था
घाकारेणचप्रतीयमानस्याभावत्वप्रसंगात्‌सोप्यस्तिपर्यायइतिचेत्‌नउभयसाधारणैकनिर्वचनमन्तरेणैवपर्यायत्वस्यप्रतिपादयितु
मशक्यत्वात्‌यत्रैकस्यास्तिपदप्रयोगः तत्रैवापरस्यवर्त्ततइतिप्रयोगात्‌सामान्येनतावत्पर्यायत्वंशक्याधिगममितिचेत्‌।नप्रमेयाभिधे
यादिशब्दानांतथात्वेप्यपर्यायत्वात्‌यत्रतस्यप्रवृत्तिनिमित्तार्थेविचते तत्‌निर्वचनप्रसंगस्तदवस्थः सएवार्थोभावत्वमुच्यतां किंच
दोल्लक्षगवेषणया अपरप्रतिषेधात्मकत्वेभावत्वमितिचेत्‌नयत्किंचिद्यासंभवेनअप्रतिषेध्यात्मत्वेनाभावस्यावच्छेदात्‌परपदवैयर्थ्यात्‌भा
वाभावयोः परस्परप्रतिषेधात्मकत्वस्वीकाराच्चतथापिभावोनास्तीत्यभावप्रतिपत्तिवदभावोनास्तीतिभावस्यापीतिमितिचेत्‌।नात
वतापिलक्षणानिरुक्तेः अपरप्रतिषेधमुखेनप्रतीयमानत्वमेवभावत्वमितिचेत्‌नचक्षुरादिभिर्भावत्वाग्रहणप्रसंगात्‌।नहिप्र
तीयमानत्वंचक्षुरादिग्राह्यंअभावोनास्तीतितेनिर्विषयत्वप्रसंगाच्चनहियंभावविषयाभवत्यपिपरप्रतिषेधमुखेनप्रतीयमानत्वा
त्तानाप्यभावविषयैवतन्निषेधार्थत्वात्‌तमेवंप्रतीतिरेवस्यादितिचेत्‌नशाब्दप्रतीतिः संभवात्‌आकांक्षादिमद्भिःपदैःप्रतिष्ठसंसर्गबो
धनात्‌असंसतासत्यपिज्ञानमर्थंशब्दः करोतिहिअसत्स्वप्रतीतिस्तथाविवक्षितत्वात्‌तदयमदोषइतिचेत्‌नसर्वस्याभावस्यप्रसक्तत्वा
भंगीकारात्‌तस्वरूपेणसर्वप्रसिद्धमितिचेत्‌।नतेनपोअपरप्रतिषेधात्मतयाग्रहणेप्रमाणाभावात्‌तेषांविशिष्टरूपतयातथैवग्रहणमितिचे रामः
त्‌नविशिष्टरूपत्वस्यानवधारणात्‌यदपरप्रतिषेधात्मतयाशब्देनापिबोध्यतेतत्त्वात्भावत्वमितिचेत्‌नपरपदवैयर्थ्यात्‌तत्‌आगोप्यचाक्षु
षत्वापत्तेस्तुरनिरुद्धनभिमतादिविशेषोपनीतभागवत्त्वापात्‌तत्रचाक्षुषत्वादिकंनविष्यतीतिचेत्‌।तथाविधविषयविशिष्टायातद्बुद्धि ७४
विषयविशेषणतायहेस्वाश्रयोसंतः स्यात्‌तिनोपलक्षितापास्त्याद्वाभावविशिष्टभावपदार्थस्यग्रहादभावात्तर्थस्यतथात्वा

पातेः यदेवंविधं तद्भाववन्नूपमितिवदेतेवंविधत्वाद्भाववत्वमनन्वद्धाचं अभेदे यदेवंविधं तद्भाववन्नूपमितिनियमानुपपत्तेः अस्योपल
क्षणत्वेचोपलक्ष्यस्यान्यस्यैवाच्युत्वात् अस्यैव भावत्वार्थत्वेऽभावो नास्तीतिप्रत्ययप्रतीयमानस्य भावस्याभावत्वाभावप्रसंगात् भि
न्नेच भावत्वं न संभवति षट्पदार्थव्यतिरेकप्रसंगात् यत्किंचिद्भाववत्वं तत्स्वात्मन्यस्ति न वा आद्ये अस्तिचेत् स्वात्मनि वृत्तिविरोधः नास्तिचेत्
स्वस्यान्यप्रतिषेधे सुखेनाप्रतीयमानस्याभावत्वप्रसंग इति । न चैवमीश्वरेऽप्रमाणानुपदर्शनात्तदभावएवापाद्यत इति चेत् अभावत्वं त्वं
किमभिधीयते निषेधात्मकत्वमिति चेत् न तत्प्रतिक्षेपात्मकत्वं तदा भावेप्यस्ति भावाभावयोर्द्वयोरपि परस्परप्रतिक्षेपात्मकत्व
स्वीकारात् अथाभावत्वमेव तदा न निरुक्तेः पर्यनुयोगः एतेन निषेधमुखेन प्रतीयमानत्वमिति निरस्तं भावविरोधित्वमिति चेत् । न सर्व
भावविरोधित्वं तद्विशेषविरोधित्वं वा नाद्यः असिद्धेः न घटाभावो भूतलादिविरुणद्धि । न द्वितीयः भावानामपि केषांचित्तथाभावात् अथ
सहावस्थानं विरोधो विवक्षितः भावानां नास्तीति चेत् न गोत्वाश्वत्वादीनामपि भावात् एकविधावन्यनिषेधः स इति चेत् न अभेदे भावभे
दयोरेवप्रसंगात् एकविधिरेवापरनिषेधः स इति चेत् न निषेधस्याभावार्थत्वे भावार्थत्वे वासिद्धेः नास्तीति प्रतीतिविषयत्वमिति चे
त् न । घटाभावो नास्तीति घटस्य तथाप्रतीयमानतया अभावत्वापत्तेः अस्तीति भावत्वनिरुक्तौ यदुक्तं दूषणं तदापत्तेश्च । प्रतियोगि
निरूपणाधीननिरूपणत्वमिति चेत् । न प्रतियोगिनः पदार्थत्वेपि प्रसंगात् विशेषार्थत्वे च तदनिरुक्तौ असदर्थत्वे नन्वर्थस्या
सिद्धेः अतीतानागतज्ञानादिविषयादिनाऽतिप्रसंगात् यत्किंचिदभावस्य लक्षणमुच्यते तस्य भावो वास्यात् अभावो वास्यात् नाद्यः भा
वस्याभावानाश्रितत्वात् विषयविधर्म्मेणाच कृत्यमपि तथात्वे तन्निर्वाच्यं स्यात् अस्मदेव तद्धितिचेत् तद्वद्भावस्याभावत्वे स्ववृत्तिः
भावत्वे च व्याघातात् । न द्वितीयः तस्यात्मनि वृत्तौ विरोधापत्तेः अवृत्तौ चाव्यापकत्वप्रसंगात् इति । प्रतिक्षेप्य विशिष्टमेव यत्प्रति

खं॰ म॰ मातिसो भावइतिचेत् । न प्रतिक्षेपातीरुक्तोऽप्रतिक्षेप्यानिरुक्तेः । विशिष्टशब्दार्थश्च निर्वचनीयः स्यात् । तत्र विशिष्टं विशेषणेन विशि
७५ ष्यते तत्संबंधेनाभिन्नमभिन्नं वा नाद्यः दंडपुरुषसंबंधमन्तरेणादंडिनोऽप्यस्याप्रतीतिः दंडेन मानं यत्क्कोऽतदानयनप्रसंगाच्च तत्सं
बंधेनोपलक्षितत्वान्नयेतिचेत् न अतद्धृततउपलक्ष्यत्वेऽतिप्रसंगात् तत्कृतत्वान्मृतत्वात् संबंधोहेतुः स च तदधिकरण एवेति चेत् न ।
संबंधस्य तदधिकरणासंबद्धस्य स्वत्वापत्तेरितिसिद्धपंथाः तत्संबंधिनि तत्त्व्यवहार इति चेत् न तस्यापि विशिष्टत्वेनातत्त्वापत्तौ व्यवहारविष
४० यतातविशेषस्य वक्तुमशक्यत्वात् एवं परंपराकलनायामथनस्थामात्रं ननु व्यवहार्यगतो विशेषः कश्चित्तद्वितीयेतु प्रत्येकं दंडव्य ४०
वहारप्रसंगो विशेषाभावात् न तत्प्रत्येकं दण्डपदार्थः किंतु मिलिताविति चेत् मिलिताविति किं ते च मेवकं चाभिधीयते उत्ततेऽन्यो
५ न्यस्य कश्चित्त्वाद्यप्रत्येकं स एव प्रसंगः मेलकेप्याधिकः द्वितीयस्तु प्रतीतिव्यवहारविरोधस्तत्र्वत्रि रस्ताः । एकज्ञानानु ४
दोवा अविरलनानाज्ञानानुदोवानेकश्च संबंधश्चविशिष्टपदार्थ इतिचेत् न । घटपटाविति बुद्धा वा नूढौ घटपटौ संबंधश्च
घटपटत्वपोविशिष्टः स्यात् घटत्वपटत्व संबंधानां तद्बुद्धावानूढानाम् अभ्युपगमेन संबंधस्यापि तद्बुद्धारोहापगमप्रौव्या
तु अन्यथा घटत्वविशिष्टरूपो घटः पटत्वविशिष्टरूपश्च पटः कथमभ्युपेयस्तन्नच घटपटावित्यपि विशिष्टमेव । स्वतंत्रयो
र्घटपटयोः परस्परासंबद्धयोस्तत्र व्यवहारात् न पुनर्यथा दंडीपुरुषः तथा घटीपटः पटी घट इति वा तत्र व्यवहारः न चैकज्ञा राम॰
नारूढतैव तयोर्निमित्तव्यापतो घटपटाविति द्वित्वतयोः तद्द्वयानवगाहिनाकथंचिद्विज्ञानेनावगाहितेति प्रत्यभिज्ञानुप्र ७५
स्तावोक्तात् दोषानाद्यो सामग्रः अतएवाविरलनानाज्ञानारूढतापि विशिष्टता निरवकाशा अयाप्रकाशमानासंबंधो
निकएकबुद्ध्यारूढस्तथ्यान चैवं घटपटौ तत्कथमुक्तदोषापत्तिरितिचेत् न । अप्रकाशमानो संबंधो ययोरित्ययमर्थोऽवि

खण्डनखण्डखाद्यम् :- श्रीहर्षप्रणीतम् ।

न्नेत्रोत्सादनीयमतस्तदर्थंभवाननुयुज्यतइति।मैवं।यदीश्वरसद्भावविषयोभवतांप्रमाणं।मासस्मप्रमाणतयाज्ञासीत्प्रतीतस्तत्सप्र
माणं।त्वंअस्माभिरुत्सादनीयमितिनोस्माकमीदृशसिद्धांतःप्रस्तुतईश्वरसद्भावविषयंयत्प्रमाणंभवतांप्रमाणभावेनज्ञातंमात्प्रतीतमस्ति
तत्प्रमाणनीयमितिस्यान्नेजईश्वरसद्भावविषयस्यप्रमाणस्यभवताज्ञापनमात्रंक्रियतामित्यभिमतंपृच्छतामस्माकंवृत्तप्रमाणंनवा
प्रमाणेनवेतिविशेषोभिमतइतिनज्ञापनमात्रस्यप्रमाणज्ञानमादायाप्युपपत्तेः।तत्रस्वार्थोनैकेयपरापेक्षेत्साध्युक्तेमन्नुपपद्यनीयस्या
दितत्पेचमीश्वरसद्भावविषयाप्रमाणप्रतीतिरस्माकमुत्पन्नासाव्यभिचारिणीसत्यावेतिसंशयोत्रास्माकंतेनैकपक्षनिर्द्धारणाधी
नयदिदूषणमवादिभवतातन्निरवकाशमितिनैतत्सत्।एवंहितस्याःप्रतीतेर्यथार्थत्वायथार्थत्वसंशयेतस्याःप्रतीतेर्गोचरीयत्प्रमा
णंतस्यापियोसौविषयईश्वरसद्भावःतत्रसुतरामेवसंशयान्नसंभवतःप्रश्नोयंनत्वविप्रतिपन्नस्येतिस्यात्तथाचस्वीकुरुशिष्यभावेन
सापृविरचरणशुश्रूषाभिरस्मात्संशयात्त्वमस्मात्संशयमितिविप्रतिपन्नाएवंवयमाहार्यःसंशयोस्माकमितिचेत्तर्हिवृथैवकक्षोएववयंक
योज्ञरोक्षानुसंशयमालंबामहइत्युक्तंस्यात्।एवंतर्हितदेककोटावधारणंभवतांयथार्थमयथार्थंवेतिविकल्पोक्तमुक्तदूषणी
यं।एतेनानध्यवसायेननस्मादस्माभिःप्रतिपन्नमित्यपिनिरस्तंवेदितव्यंव्यभिचारिविषयमव्यभिचारिविषयंवातदितिविकल्पाभ्यांस्या त
पिग्रस्तत्वात्परस्परविरोधेहिनप्रकारांतरस्थितिरितिन्यायात्।एवमीश्वराभिसंध्याद्यवपित्तेनेस्थानेतत्रसद्भावनार्थत्वरार्थस्यखंड.
नमतंद्रष्टव्यं॥ ॥इतिखंडनखंडेसर्वनामाख्यानिरुक्तिःतृतीयःपरिच्छेदः॥ ॥ननुतथापिभावात्मकेतस्मिन्नीश्वरेविषयके
किंचित्प्रमाणंवक्तव्यमितिचेत्।किंपुनर्भावत्वंविवक्षितमितिचेत्।नपर्यायाऽप्रश्नात्स्वरूपसत्त्वमितिचेत्।न।अभावस्यापितथाभा
वात्प्रतिषेधाव्यवहितत्वेनानुगततत्त्वापन्नस्यअस्तीतिविषयत्वमितिचेत्।नअभावोघटस्यास्तीतिप्रत्ययसंभवेनाऽभावस्यापितथात्व
प्रसंगात्।नास्तीतिप्रतीतिविषयत्वेपिचघटादेर्भावत्वानिवृत्तेः।अस्तीतिचास्त्यर्थोवाशब्दोवाविवक्षितः।नाद्यःतस्यानिरुक्तेःसत्ता